PG SK S2 02 (DSE)

# द्विवर्षीयस्नातकोत्तरः पाठ्यक्रमः

(चि. बि. चि. एच.  एन. इ. पि. २०२० अनुसारम्)

द्वितीयषाण्मासिकः

## धर्मशास्त्रम्

**संस्कृतम्**

**पद्मनाथ-गोहाञिबरुवा-मानविकी-विद्या-अध्ययन-सत्रम्**

## कृष्णकान्त-सन्दिकै-राज्यिक-मुक्त-विश्वविद्यालयः

**विषयविशेषज्ञाः**

आचार्य प्रह्लादः रा. जोशी, कुलपतिः, कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः नलबारी ।
अध्यापिका सुदेष्णा भट्टाचार्या अध्यक्षा, संस्कृतविभागः, गुवाहाटीविश्वविद्यालयः ।
प्रो. जगदीश शर्मा, अध्यापकः, संस्कृतविभागः, गुवाहाटीविश्वविद्यालयः ।

**पाठ्यक्रम-समन्वयकः :** ड. इन्द्रानी डेका, सहायकाचार्या, कृष्णकान्तसन्दिकैराज्यिकमुक्तविश्वविद्यालयः ।
लीना ओजाँ, शैक्षिक परामर्शदाता, कृष्णकान्तसन्दिकैराज्यिकमुक्तविश्वविद्यालयः ।

**पाठ्यक्रम- प्रस्तुतकर्तारः**

| **अध्यायाः** | **प्रस्तुतकर्तारः** |
|---|---|
| १-६ | ड० मृदुस्मिता भरद्वाजः सहायकाचार्या, संस्कृतविभागः दरंगमहाविद्यालयः, शोणितपुरम्, असमः । |
| ७-९ | कंकणा गोस्वामी अतिथि-अध्यापिका, संस्कृतविभागः गौहाटी-विश्वविद्यालयः, गुवाहाटी । |
| १०- ११ | मनीषा तालुकदार सहकारी अध्यापिका, संस्कृत विभागः बगाधर ब्रह्म किषान कॉलेज, जालाह । |
| १२ | हिमाक्षी शर्मा अंशकालीन- अध्यापिका, संस्कृतविभागः कुमारभास्करवर्मसंस्कृतपुरातनाध्ययनविश्वविद्यालयः, नलबारी ।<br>लीना ओजाँ, शैक्षिक परामर्शदाता, कृष्णकान्तसन्दिकैराज्यिकमुक्तविश्वविद्यालयः । |
| १३ | ड० मैत्रेयी गोस्वामी सहायकाचार्या, धर्मशास्त्रविभागः कुमारभास्करवर्मसंस्कृतपुरातनाध्ययनविश्वविद्यालयः, नलबारी । |
| १४ | पुष्पाली बैरागी अतिथि-अध्यापिका, संस्कृतविभाग: रूपहीमहाविद्यालय:,नगाँव, असम: ।<br>लीना ओजाँ, शैक्षिक परामर्शदाता, कृष्णकान्तसन्दिकैराज्यिकमुक्तविश्वविद्यालयः । |

**सम्पादनसमिति :**

**विषयवस्तु- सम्पादना :**

| | |
|---|---|
| १-७ | ड० रञ्जिता गोस्वामी सहयोगी अध्यापक, संस्कृत विभाग आर्यविद्यापीठ महाविद्यालय (स्वायत्तशासित), गुवाहाटी । |
| ८- ११ | ड० रुणिमा शर्मा सहाचार्या, संस्कृतविभाग भट्टदेवविश्वविद्यालयः, बजाली । |
| १२ | ड० शान्ति पोखरेल, प्रोफेसर , संस्कृतविभाग, असम विश्वविद्यालय । |
| १३ | ड० रुणिमा शर्मा सहाचार्या, संस्कृतविभागः भट्टदेवविश्वविद्यालयः, बजाली । |
| १४ | ड० शान्ति पोखरेल , प्रोफेसर , संस्कृतविभाग, असमविश्वविद्यालय । |

**प्रारूप-सम्पादना :** लीना ओजाँ, शैक्षिक परामर्शदाता, कृष्णकान्तसन्दिकैराज्यिकमुक्तविश्वविद्यालयः ।

*This Self Learning Material (SLM) of the Krishna Kanta Handiqui State Open University is made available under a Creative Commons Attribution-Non-Commercial-Share Alike 4.0 License (international) http://creativecommons.org/licenses/by-nc-sa/4.0/*

प्रथमप्रकाशः – मार्च, 2025 ISBN: 978-91-6587-XX-X

**Headquarters : Patgaon, Rani Gate, Guwahati-781017**

**City Office : Resham Nagar, Khanapara, Guwahati-781022 Wed : www.kkhsou.in**

**पाठ्यविषयस्य परिचयः : धर्मशास्त्रम्**

कृष्णकान्तसन्दिकैराज्यिकमुक्तविश्वविद्यालयेन गृहीतस्य स्नातकोत्तरपर्यायगतसंस्कृतविषयस्य द्वितीयषाण्मासिके प्रथमपत्ररूपेण 'धर्मशास्त्रम्' इति पाठ्यविषयः प्रस्तूयते । अस्मिन् पाठ्यविषये धर्मशास्त्रम् सन्दर्भे आलोच्यते । तस्मादेव अस्य पाठ्यविषयस्य नामकरणं वर्तते 'धर्मशास्त्रम्' इति । पाठ्यविषयेऽस्मिन् चतुर्दशोऽध्यायाः सन्ति । ते अध्यायाः क्रमपूर्वकं यथा –

अध्यायः १. धर्मशास्त्रम् (सामान्याध्ययनम्)
अध्यायः २. मनुसंहिता (सामान्याध्ययनम्)
अध्यायः ३. मनुसंहिता (द्वितीयोऽध्यायः, श्लोकाः ४३-५३)
अध्यायः ४. मनुसंहिता (तृतीयोऽध्यायः, श्लोकाः ९९-१०७)
अध्यायः ५. मनुसंहिता (सप्तमोऽध्यायः, श्लोकाः १-१३)
अध्यायः ६. मनुसंहिता (सप्तमोऽध्यायः, श्लोकाः १४-३४)
अध्यायः ७. नारदस्मृतिः (सामान्याध्ययनम्)
अध्यायः ८. नारदस्मृतिः (प्रथमोऽध्यायः, पाठ्याध्ययनम्)
अध्यायः ९. नारदस्मृतिः (चतुर्थोऽध्यायः, दायभागः)
अध्यायः १०. याज्ञवल्क्यस्मृतिः (सामान्याध्ययनम्)
अध्यायः ११. याज्ञवल्क्यस्मृतिः (व्यवहाराध्यायः, व्यवहारस्य धारणा)
अध्यायः १२. याज्ञवल्क्यस्मृतिः (व्यवहाराध्यायः, साक्षीप्रकरणम्)
अध्यायः १३. याज्ञवल्क्यस्मृतिः (व्यवहाराध्यायः, दायभागप्रकरणम्)
अध्यायः १४. याज्ञवल्क्यस्मृतिः (व्यवहाराध्यायः, ऋणदानप्रकरणम्)

पाठ्यविषयस्यास्य अध्ययनसमये मूलपाठेन सह वामपार्श्वे तथा दक्षिणपार्श्वे केचन चतुर्भुजाकृतिषु मञ्जुषासु विषयाः परिलक्ष्यन्ते । ते विषयाः मूलपाठेषु उल्लिखिताः महत्वपूर्णाः धारणाः सरलरूपेण अवबोधने सहायकं भविष्यन्ति । 'ज्ञातव्यम्' इत्यस्मिन् अंशे पाठेन सह सम्बद्धानां महत्वपूर्णानां तथ्यानां वर्णनं प्राप्यते । प्रत्येकं शाखाया अध्ययनान्ते 'अग्रगत्याः निरीक्षणम्' इत्यंशे प्रदीयमानाः प्रश्ना अध्ययनस्य प्रगतये सुविधां प्रदास्यन्ति । अध्ययनात्परं उद्धृतानां प्रश्नानाम् उत्तराणि विलिख्य पाठस्यान्तिमे प्रदीयमानः ' अग्रगत्याः निरुपणम् ' इत्यस्मिन् अंशेन सह यदि सुमेलयिष्यन्ति तर्हि शिक्षार्थीनां कृते लाभप्रदायकं भविष्यन्ति । अध्यायेऽस्मिन् आलोचितानां विषयाणां विस्तृतरूपेण अध्ययनाय ' ज्ञानाधिक्यम् ' इत्यस्मिन् अंशे उल्लिखिताः ग्रन्थाः सहायकाः भविष्यन्ति । अध्यायस्यान्तिमे केचन 'अभ्यासप्रश्नाः' प्रदीयन्ते । अन्तिमाध्यायस्यान्ते केषाञ्चन सहायकग्रन्थानां नामानि उल्लिख्यन्ते । तेषां ग्रन्थानां सहायेन अस्मिन् पाठ्यविषये उद्धृता अध्यायाः प्रस्तूयन्ते । यदि भवन्तो विस्तृतरूपेण कमपि विषयं ज्ञातुमिच्छन्ति तर्हि तान् ग्रन्थान् अध्ययनं कर्तुं शक्नुवन्ति ।

# विषयपरिकल्पनम्

पृष्ठासंख्या

**अध्यायः १. धर्मशास्त्रम् (सामान्याध्ययनम्)**

धर्मशास्त्रस्य परिचयः, धर्मसूत्रस्य परिचयः, स्मृतिशास्त्रस्य परिचयः- मनुस्मृतिः, याज्ञवल्क्यस्मृतिः, पराशरस्मृतिः, नारदस्मृतिः,अन्यानि स्मृतिशास्त्राणि,

**अध्यायः २. मनुसंहिता (सामान्याध्ययनम्)**

धर्मस्य धर्मशास्त्रस्य च परिचयः , मनुसंहितायाः परिचयः

**अध्यायः ३. मनुसंहिता (द्वितीयोऽध्यायः, श्लोकाः ४३-५३)**

श्लोकानां मूलसंस्कृतपाठः, शब्दार्थः, व्याख्या,सरलव्याख्या, असमीयानुवादः, श्लोकानां संस्कृतसारांशः, श्लोकानां असमीयासारांशः, सन्धियुक्तशब्दानां सन्धिविच्छेदः, केषांचन श्लोकानां व्याख्याः

**अध्यायः ४. मनुसंहिता (तृतीयोऽध्यायः, श्लोकाः ९९-१०७)**

श्लोकानां मूलसंस्कृतपाठः , शब्दार्थः , व्याख्या , सरलव्याख्या , असमीयानुवादः, श्लोकानां संस्कृतसारांशः, केषांचन श्लोकानां व्याख्या ,सन्धियुक्तशब्दानां सन्धिविच्छेदः, अध्यायस्य असमीयासारांशः

**अध्यायः ५. मनुसंहिता (सप्तमोऽध्यायः, श्लोकाः १-१३)**

श्लोकानांमूलसंस्कृतपाठःअन्वय : , शब्दार्थः, व्याख्या, सरलव्याख्या, असमीयानुवादः, श्लोकानां संस्कृत सारांशः, केषांचन श्लोकानां व्याख्याः, सन्धियुक्तशब्दानां सन्धिविच्छेदः, अध्यायस्यअसमीयासारांशः

**अध्यायः ६. मनुसंहिता (सप्तमोऽध्यायः, श्लोकाः १४-३४)**

श्लोकानांमूलसंस्कृतपाठःअन्वय : , शब्दार्थः, व्याख्या, सरलव्याख्या, असमीयानुवादः, श्लोकानां संस्कृत सारांशः, केषांचन श्लोकानां व्याख्याः, सन्धियुक्तशब्दानां सन्धिविच्छेदः, अध्यायस्यअसमीयासारांशः

**अध्यायः ७. नारदस्मृतिः (सामान्याध्ययनम्)**

स्मृतेः संक्षिप्तपरिचयः , धर्मशास्त्रस्य स्मृतेः वा मुख्यविषयः, धर्मविषयकप्राचीनग्रंथाः धर्मसूत्राणि , स्मृतीनां संख्या, स्मृत्याः विषयवस्तु , केचन प्रमुखाः स्मृतयः , नारदस्मृतिः, नारदस्मृतेः रचनाकालः , नारदस्मृतिसंविषयकम् , नारदस्मृतिसंकलनम् , नारदस्मृतिव्याख्याकारः , अध्यायस्य असमीयासारांशः,

**अध्यायः ८. नारदस्मृतिः (प्रथमोऽध्यायः, पाठ्यअध्ययनम्)**

प्रथमोऽध्यायः : (मूलपाठः) नारदमातृकायाः विवरणम् , प्रथमोऽध्यायः : व्यवहारमातृका (मूलपाठः), सामान्यचर्चा

**अध्यायः ९. नारदस्मृतिः (चतुर्थोऽध्यायः, दायभागः)**

दायभाग: मूलपाठ, सामान्यपरिचयः अध्यायस्य असमीया सारांशः

**अध्यायः १०. याज्ञवल्क्यस्मृतिः (सामान्याध्ययनम्)**

ग्रन्थकारः याज्ञल्क्यस्य परिचयः ,याज्ञवल्क्यस्मृतेः परिचयः ,याज्ञवल्क्यस्मृतेः रचनाकालः , याज्ञवल्क्यस्मृतेः विषयवस्तु, याज्ञवल्क्यस्मृतेः संकलनम् ,याज्ञवल्क्यस्मृतेः भाष्यम्, अध्यायस्य असमीयासारांशः,

**अध्यायः ११. याज्ञवल्क्यस्मृतिः (व्यवहाराध्यायः, व्यवहारस्य धारणा)**

व्यवहार शब्दस्य अर्थः व्युत्पत्तिः च , स्मृतिशास्त्रे व्यवहारस्य अर्थः, व्यवहारस्य लक्षणम् , व्यवहारस्य प्रयोजनम् , व्यवहारस्य प्रकारभेदः, चतुष्पादानां प्रयोगः , व्यवहारपदम् (विवादस्थानम्), अध्यायस्य असमीयासारांशः,

**अध्यायः १२. याज्ञवल्क्यस्मृतिः (व्यवहाराध्यायः, साक्षीप्रकरणम्)**

साक्षिप्रकरणस्य सारांशः, मूलपाठ(:षोडशश्लोका) :, साक्षिप्रकरणम् संक्षिप्तालोचनम् –, अध्यायस्य असमीयासारांशः, कतिपय महत्वपूर्णश्लोकानां व्याख्या

**अध्यायः १३. याज्ञवल्क्यस्मृतिः (व्यवहाराध्यायः, दायभागप्रकरणम्)**

सम्पत्तिविभागाः, दायविभाजनम् : संक्षिप्तचर्चा

**अध्यायः १४. याज्ञवल्क्यस्मृतिः (व्यवहाराध्यायः, ऋणदानप्रकरणम्)**

मूलपाठ: (विंशति: श्लोका:), ऋणादानप्रकरणम् - संक्षिप्तालोचनम्, महत्त्वपूर्णश्लोकानां व्याख्या

# अध्यायः १ धर्मशास्त्रम् (सामान्याध्ययनम्)

## अध्यायसंरचना

१.१. उद्देश्यम्

१.२. परिचयः

१.३. धर्मः तस्य स्रोतश्च

१.४. धर्मशास्त्रस्य परिचयः

- १.४.१. धर्मशास्त्रं किम्
- १.४.२. धर्मशास्त्राणां रचनाकालः
- १.४.३. धर्मशास्त्रस्मृतिशास्त्रयोर्मध्ये भेदाः

१.५. धर्मसूत्रस्य परिचयः

- १.५.१. गौतमधर्मसूत्रम्
- १.५.२. बौधायनधर्मसूत्रम्
- १.५.३. आपस्तम्बधर्मसूत्रम्
- १.५.४. वशिष्ठधर्मसूत्रम्
- १.५.५. अन्यानि धर्मसूत्राणि

१.६. स्मृतिशास्त्रस्य परिचयः

- १.६.१. मनुस्मृतिः
- १.६.२. याज्ञवल्क्यस्मृतिः
- १.६.३ पराशरस्मृतिः
- १.६.४. नारदस्मृतिः
- १.६.५ अन्यानि स्मृतिशास्त्राणि

१.७. अध्यायात् किमवगतम्

१.८. ज्ञानाधिक्यम्

१.९. अभ्यासप्रश्नाः

## १.१ उद्देश्यम्–

अस्य अध्यायस्य अध्ययनेन –

- धर्मः तस्य स्रोतविषये ज्ञास्यन्ति।
- धर्मशास्त्राणांसामान्यपरिचयः, तेषां लेखनकालः,धर्मशास्त्रस्मृतिशास्त्रयोर्मध्ये भेदा इत्येषु विषयेषु ज्ञानं प्राप्स्यन्ति।

- विविधधर्मसूत्राणि यथा – गौतमधर्मसूत्र-बौधायनधर्मसूत्र-आपस्तम्बधर्मसूत्र-वशिष्ठधर्मसूत्रविषयेविशेषपरिचयं प्राप्स्यन्ति।
- विविधस्मृतिशास्त्राणि यथा – मनुस्मृति-याज्ञवल्क्यस्मृति-पराशरस्मृति-नारदस्मृतिविषये विशेषपरिचयं प्राप्स्यन्ति।

## १.२ परिचयः –

धर्मशास्त्रम् अस्ति संस्कृतसाहित्यस्य एक उल्लेखनीय: विषयः। अस्मिन् अध्याये भवन्तः धर्मशास्त्रस्य सामान्यपरिचयंप्राप्स्यन्ति । अस्मिन् सन्दर्भे भवन्तः धर्मस्य तस्य स्रोतस्य च विषये ज्ञास्यन्ति । धर्मशास्त्राणां लेखनकालः, धर्मसूत्राणां स्मृतिशास्त्राणाञ्च परिचयम् अपि भवन्तः ज्ञास्यन्ति । तदतिरिक्तं केषांचित् विशेषाणां धर्मसूत्राणां स्मृतिशास्त्राणां च विषये ज्ञातुं शक्नुवन्ति।

## १.३ धर्मः तस्य स्रोतः च

**धर्मः**

'धृङ्' धारण-पोषणयोरित्यस्माद् धातोः मन् प्रत्यये कृते धर्मशब्दो निष्पद्यते । धर्मशब्दस्य बहुविधान् अर्थान् शास्त्रकाराः प्रकटयन्ति । तत्रादौ वेदः कथयति यत् धर्मोऽयम् अलौकिकशक्तेः बोधकः- 'अचितोयत्र च धर्मा' (ऋग्वेद. ७/८९/५) । ऋग्वेदस्य मतानुसारं धर्मः नियमव्यवस्थायाः द्योतको भवति । येन नियमेन संसारस्य जनाः सुखपूर्वकंजीवनं यापयेयुः । अथर्ववेदे धर्मशब्दस्य अर्थः धार्मिकसंस्कारस्तथा अर्जितगुणरुपेण निर्दिष्टो वर्तते –'ऋतं संत्यं तपो राष्ट्रम्' (अथर्ववेदः १२/९/१४) । अत्रापि धर्मशब्दस्य अर्थः पुण्यत्वेन व्यवहतो दृश्यते । ऐतरेयब्राहमणे सर्वधार्मिककर्तव्यमेव धर्मशब्दस्य अर्थत्वेन प्रयुक्तम्, 'धर्मस्य गोप्ता' (ऐतरेयब्राह्मणम् ८/२७) । कालक्रमेण धर्मशब्दस्यार्थः व्यापको जातः । मानवजीवनस्याधिकारः, कर्तव्यम्, अनुशासनम्, आचरणम्, सर्वनैतिककार्यञ्चधर्मस्य अर्थत्वेन समाहितम् । वेदेषु सम्पूर्णमानवजातीनां विकासाय सिद्धान्ताः प्रतिपादिताः सन्ति । वेदे सर्वेषां मानवानां कृते सदुपदेशाः सत्प्रेरणाश्च गुम्फिताः वर्तन्ते, येन मानवजातिः पतनोन्मुखिनी न भवति । प्रायशः वेदेषु धर्मस्य अर्थरूपेण धार्मिकविधि-धार्मिकक्रिया-निश्चितनियम-शिष्टाचारप्रभृतयःशब्दाः नियुक्ताः सन्ति । श्रीमद्भगवद्गीतायां'स्वधर्मे निधनं श्रेयः'इत्यपिधर्मशब्दस्य द्योतकः । महाभारतानुसारम् 'अहिंसा परमो धर्मः' इति निर्दिष्टोऽस्ति । मनुनाऽपि'आचारः परमो धर्मः' इति समुद्घोषितम् । मनुस्मृतिटीकाकारेण मेधातिथिना धर्मशब्दः कर्तव्यतावचन इति प्रतिपादितम् । मिताक्षराकारेण विज्ञानेश्वरेणापि धर्मशब्दः षड्विधस्मार्तधर्मविषय इति प्रतिपादितम्। यथा – वर्णधर्मः, आश्रमधर्मः, वर्णाश्रमधर्मः, गुणधर्मः, निमिन्तधर्मः, साधारणधर्मश्चेति।

ध्रियते लोक अनेत इति धर्मः। धरति धारयति वा लोकम् इति धर्मः । ध्रियते लोकः यात्रानिर्वाहार्थंवेतिधर्मः । अर्थात् येन माध्यमेन लोकानां धारणं सम्भवेत् यश्च लोकानां सुनिर्वाहार्थं संसारं धारयेत् स एव धर्मशब्दवाच्यः ।

**धर्मस्य स्रोतः**

पुरुषार्थेषु प्रधानभूतया सनातन वैदिकधर्मस्य वेद-स्मृति-सदाचार – आमनुष्याख्यानि चत्वारि सुप्रसिद्धानि प्रमाणानि सन्ति इति मनुना एवं प्रतिपादितम् –

"वेदः स्मृतिः सदाचार: स्वस्य च प्रियमात्मनः ।

एतच्चतुर्विधः प्राहुः साक्षाद्धर्मस्य लक्षणम् ॥"(मनुस्मृतिः, २/१२)

वेद ऋग्यजुः सामाथर्वलक्षणः । स च पुनः विधिमन्त्रनामधेयनिषेधार्थवादात्मको भवति । अत्र मन्त्रादीनां विधिवाक्यैकवाक्यतयैव धर्मे प्रामाण्यम् । एवंभूतस्थ पञ्चविधात्मकस्य वेदस्य धर्मे प्रामाण्यं यथार्थानुभवकरणस्वरूपं न्यायसिद्धम् । स्मृतिशास्त्रविदां मन्वादीनां स्मृतिरपि वेदमूलकतया धर्मे प्रमाणं भवति । मनुना प्रतिपादितम् एवम् –

"वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।

आचारश्चैवसाधूनामात्मनस्तुष्टिरेव च ॥"(मनुस्मृति, २/६)

अत्र उल्लिखितेषु चतुर्विधेषु प्रमाणेषु वेद एव धर्मस्य मूलं प्रमाणं भवति । वेदोऽङ्गी, तदङ्गभूततया अन्येषां स्मृत्यादीनां धर्मे प्रामाण्यमङ्गीक्रियते । अत्र क्रमशो वेदाभावे धर्मशास्त्रस्य, धर्मशास्त्राभावे आचारस्य च प्रामाण्यं भवति ।

## १.४ धर्मशास्त्रस्य परिचय :

### १.४.१ धर्मशास्त्रं किम्

ध्रियते लोक अनेन इति धर्मः, धरति धारयति वा लोकमिति धर्मः । धृञ् धारणपोषणयोरित्यस्माद्धातोः मन् प्रत्यये कृते धर्मः, शास् धातोः ष्ट्रन् प्रत्यये कृते चशास्त्रमिति पदं निष्पत्यते । धर्म शास्तीति व्युत्पत्त्या धर्मशास्त्रपदं सिध्यति । धर्मः यस्मिन् शास्त्रे प्राधान्येन निर्दिश्यते तदेव शास्त्र धर्मशास्त्रनाम्ना यद्यपि अभिधीयते तथापि 'धर्मशास्त्र तु वै स्मृतिः' इत्यनेन मनुना स्मृतिरूपग्रन्थस्खंय मुख्यतया धर्मशास्त्रत्वं संकेतितम् । अतः व्यवहारविधायकस्य धर्मविधायकस्य च शास्त्रस्य नाम धर्मशास्त्रमिति । धर्मशास्त्रे धर्मार्थकाममोक्षाणां चतुर्वर्गाणां निरपेक्षविचारः परिलक्ष्यते । मुख्यतया धर्मशास्त्रे आचार-व्यवहार-प्रायश्चित्तानां वर्णनं दृश्यते । आचारे तु वर्णधर्म-आश्रमधर्म-वर्णाश्रमधर्म-साधारणधर्माणामन्तर्भावो भवति । व्यवहारे तु अभिषेकादिगुणः तस्य राज्ञः

प्रजापरिपालनाख्यो यो गुणधर्मः सोऽन्तर्भवति । प्रायश्चित्ते तु विहिताकरणप्रतिषिद्धसेवननिमित्तस्य नैमित्तिकधर्मस्यान्तर्भावो भवति । तत्रादौ आचार एव प्रमुखः । आचारः भारतीयधर्मस्य मूलाधारभूतः । व्यक्तेःविकासः समाजस्यः चोन्नतिराचारद्वारेणैव संभवति। 'आचार : परमो धर्म:' इति वचनमिदं स्मृतिषु पुराणेषु च प्रतिपादितमस्ति।

## १.४.२ धर्मशास्त्राणां रचनाकालः

धर्मशास्त्राणां रचनाकालविषये इतिहासकारेषु बहुमतभेदः परिलक्ष्यते । डॉ. पी. वी. काणेमहाभागानांमतानुसारंगौतम-बौधायन-आपस्तम्बधर्मसूत्रादयो ग्रन्थाः ख्री.पू. ६०० तः ३०० मध्ये भवितुमर्हन्ति । निरुक्तग्रन्थात् ज्ञायते यत् यास्कस्य बहुपूर्वादेव धर्मशास्त्रविषये वादविवादः प्रचलित आसीत् । धर्मशास्त्रविषये महर्षिपतञ्जलिनाऽपि महाभाष्ये वर्णितम् । अतएतस्मात्ज्ञायते यत् यास्कात् पूर्वंधर्मशास्त्राणां रचनाऽभूदिति । पुनश्च धर्मशास्त्रेषु सूत्रस्मृतिसाहित्ययोर्मध्ये प्राचीनार्वाचीनविषये मतभेद: परिलक्ष्यते । स्मृतिषु प्राचीनतमा मनुस्मृतिः, सूत्रेषुप्राचीनतमं गौतमधर्मसूत्रम् । धर्मशास्त्रसाहित्यस्य कालो भागत्रयेण विभक्तो वर्तते । सर्वादौ प्राचीनधर्मसूत्र-स्मृत्यादिग्रन्थानां रचनाकालः ख्री.पू. ६००तःप्रारभ्य ख्रीष्टीय प्रथमशतकं यावत् मन्यते । द्वितीये तु अधिकांशपद्यमयाः स्मृतिग्रन्था आगच्छन्ति । कालोऽयं प्रथमशतकादारभ्य ८०० ख्रीष्टाब्दं यावत् मन्यते। तृतीयस्तु भवति भाष्यनिबन्धसाहित्ययोः कालः । स च सप्तमशतकादारभ्योनविंशशतकावधिपरिव्याप्तो वर्तते। तृतीयकालस्य प्रथमो भागः प्रसिद्धभाष्यकाराणां सुवर्णयुग इत्युच्यते।

## १.४.३ धर्मसूत्रस्मृतिशास्त्रयोर्मध्ये भेदाः

धर्मशास्त्रेषु सूत्रस्मृतिसाहित्ययोर्मध्ये प्राचीनार्वाचीनविषये मतभेदः परिलक्ष्यते । स्मृतिषुप्राचीनतमा मनुस्मृतिः सूत्रेषु प्राचीनतमं गौतमधर्मसूत्रञ्चेति । शैलीदृष्ट्या धर्मसुत्राणां रचना स्मृत्यप्रेक्षया पूर्वमेव जातेति पी. भि. काणेमहोदयस्य अभिमतम् । गद्यापेक्षयापद्यस्य प्राचीनत्वात श्लोकस्य सर्वप्राचीनत्वेन गौतमधर्मसूत्रापेक्षया मनुस्मृतिः प्राचीनतमा इति सुप्रसिद्धा। पुनश्च याज्ञवल्क्येन धर्मशास्त्रकारसंग्रहावसरे मनोर्नाम प्रथमं दत्वा गौतमस्य नाम बहुपरं दत्तम् । भाषादृष्ट्या धर्मसूत्राणां रचना स्मृतिशास्त्राणां रचनापेक्षया अतीव कठिना न च बोधगम्या । पुनश्च सूत्रसाहित्यंगद्यात्मकं, गद्यपद्योभयात्मकञ्च । परन्तु स्मृतिसाहित्यं केवलं पद्यात्मकम् । स्मृतिग्रन्थाः सूत्रग्रन्यानामपेक्षया अर्वाचीनाः, यतो हि धर्मसूत्रेषु विषयव्यवस्थापनं व्यवस्थिततया न विहितमस्ति, परन्तु स्मृतिषु विषयव्यवस्थाव्यवस्थिता वर्तते, पुनश्च स्मृतिग्रन्थापेक्षया सूत्रग्रन्थानां संख्या न्यूनतमा।

धर्मसूत्राणां भाषा स्मृत्यपेक्षया अधिकप्राचीना प्रतिभाति । धर्मसुत्राणां विषयवस्तुव्यवस्थितं नास्ति । परन्तु स्मृतिशास्त्राणां विषयवस्तु प्रायः विशिष्टरूपेण व्यवस्थितं भवति । तत्र मुख्यतया आचार-व्यवहार-प्रायश्चित्ताख्यम् अध्यायत्रयं व्यवस्थितं वर्तते ।

## १.५ धर्मसूत्रस्य परिचयः

धर्मसूत्रं वैदिकसाहित्यस्य एक महत्वपूर्णाङ्गत्वेन विराजते । धर्मसूत्राणि प्रमुख्यरूपेण द्विधा विभक्तुं शक्यन्ते । प्राचीनानि धर्मसूत्राणि अनतिप्राचीनानि च धर्मसूत्राणि । प्राचीनेषु धर्मभूतेषु गौतम-बैधायन-आपस्तम्बधर्मसूत्राणि प्रधानानि भवन्ति । अनतिप्राचीनेषु धर्मसूत्रेषु वशिष्ठ-हारीत-हिरण्यकेशि-शङ्खलिखित-विष्णुधर्मसूत्राणिअन्यतमानि । अपि च अत्रि-उपशा-काण्व-कश्यप-गार्ग्य-च्यवन-जातुकर्ण्यदेबल-पैठिनसी-बृहस्पति-भारद्वाज-सुमन्तुप्रभृतयो प्रधानभूताः भवन्ति ।

धर्मप्रतिपादकंसूत्रं धर्मसूत्रमिति । धर्मसूत्राणां वैशिष्ट्यं तेषां रचनाशैल्या सामाजिकजीवनविन्यासदृष्ट्या च प्राप्यते । सूत्रस्मृतिग्रन्ययोर्मध्ये कालविषये मतभेदो विवादश्च विद्यते ।

### १.५.१ गौतमधर्मसूत्रम्

धर्मसूत्राणां मध्ये गौतमधर्मसूत्रस्य स्थानमन्यतममस्ति । गौतमः सर्वप्राचीनतमधर्मसूत्रकारो भवतीति ऐतिहासिकानां धर्मशास्त्रमर्मज्ञानाञ्च मतम् । धर्मशास्त्रेषु यावन्त्येव धर्मभूत्राणि सन्ति प्रायशः तान्येव गौतमधर्मसूत्रेण प्रभावितानि । बौधायनापस्तम्बादयो धर्मसूत्रकाराः विभिन्नेषु स्थलेषु गौतमधर्मसूत्रस्य नामोल्लेखं कृतवन्तः । बौधायनधर्मसूत्रे गौतमस्य प्रभावो प्रायश्चित्तप्रकरणे दृश्यते । कुमारिलभट्टेन तन्त्रवार्तिकग्रन्थे बहूनि सूत्राणि गौतमधर्मसूत्रादुद्धृतानि । गौतमधर्मसूत्रं सम्पूर्णभारतस्य कृते समादरणीयं भवति ।

गौतमधर्मसूत्रे अष्टाविंशत्यध्यायाःसन्ति । भाषादृष्ट्यागौतमधर्मसूत्रस्य भाषा व्याकरणदृष्ट्या शुद्धा प्रतिभाति । धर्मस्य स्त्रोतः, वर्णानां विवाहकालः, शुचि-आचमनविधिः, ब्रह्मचारिणाम् अध्ययनकालः, चतुर्णामाश्रमाणांवर्णनकालः, राज्ञांकर्तव्यानि,स्त्रीधर्मवर्णनं, प्रायश्चित्तस्य कारणानि कालानि च,पञ्चविधपापनिवृत्तयः,महापातक-उपपातकादीनि वर्णनानि गौतमधर्मसूत्रे उपलभ्यन्ते ।

गौतमधर्मसूत्रस्योपरि चतस्त्रः टीकाः सञ्जाताः, यथा – मस्करचार्यस्य मस्करी, हरदत्तस्य मिताक्षरा, असहायस्य असहायटीका, कुलमणिमिश्रस्य सूक्ष्मा च ।

### १.५.२ बौधायनधर्मसूत्रम्

बौधायनधर्मसूत्रम् यजुर्वेदेन सह सम्बद्धम् । धर्मसूत्रमिदंगौतमधर्मसूत्रात्अर्वाचीनम्, आपस्तम्बधर्मसूत्रात्प्राचीनम् । अस्य भाषा प्राचीना सरला च प्रतिभाति । अस्मिन् धर्मसूत्रे अनेके विषयाः बहुषु स्थानेषु चर्चाः कृताः सन्ति । अत्र पुनरुक्तिदोषाः प्रायशो दृश्यन्ते ।

धर्मसूत्रस्य विषयवस्तुनः विभाजनं चतुर्षु प्रश्नेषु कृतमस्ति।

प्रथमः प्रश्नः धर्मस्य प्रभवः, शिष्यः कः, परिषद्, शिष्यस्यनिवासः, संकीर्णवर्णस्य निवासः, गुरुगृहे अध्ययनकालः, विवाहकालः, ब्रह्मचारिणांकर्तव्यम्, स्नातकस्य कर्तव्यम्, जन्ममरणयो अशुद्धता, पञ्चमहापापानि, दण्डनियमः, अष्टविधविवाहा इत्यादयः ।

द्वितीयः प्रश्नः ब्रह्महत्याप्रायश्चित्तम्, सम्पत्तिविभाजनम्, नियोगे विधिः, गृहस्थानां नित्यकर्माणि, पितृतर्पणस्य पञ्चमहायज्ञस्य च वर्णनानिइत्यादयः ।

तृतीयः प्रश्नः ऋषेः कर्तव्यानि जीवनपद्धतयः च, ब्रह्मचारिणः गृहस्थस्य च प्रायश्चित्तम्, कुषुमाण्डहोमः, चान्द्रायणतप इत्यादयः ।

चतुर्थः प्रश्नः विविधप्रायश्चित्तानि,प्राणायामजपहोमइष्टिभिः सिद्धिलाभोपायः, चान्द्रायणतपस्यादयः ।

## १.५.३ आपस्तम्बधर्मसूत्रम्

धर्मसूत्राणां मध्ये आपस्तम्बधर्मसूत्रम् अन्यतममस्ति । आपस्तम्बधर्मसूत्रे मीमांसासम्बन्धिनः बहवो पारिभाषिकशब्दा: प्राप्यन्ते । धर्मसूत्रेऽस्मिन द्वौप्रश्नौ, प्रत्येकस्मिन्चैकादशपटलाः सन्ति । आपस्तम्बधर्मसूत्रम् संक्षिप्तम्, शैली दृष्ट्यासुसंगठितंच प्रतिभाति । भाषा चास्य प्राचीना अपाणिनीया च अवलोकयते ।

भाषादृष्ट्या धर्मसूत्रमिदं पाणिनिव्याकरणात्प्रागेवरचितम् । अस्य धर्मसूत्रस्योपरि हरदत्तेण उज्ज्वला इति भाष्यम् रचितमस्ति ।

**आपस्तम्बधर्मसूत्रस्य विषयवस्तु यथा –**

उपनयनम्, विवाहकालः गृहधर्मः, ब्रह्मचर्यविधिः, वेदाध्ययनस्य परिणामः,स्वाध्यायस्यमहत्त्वम्, धर्मस्य आचरणस्य आवश्यकता, विनिमयस्य नियमः, आत्मज्ञानस्य, पशुवधस्यप्रायश्चित्तानि, गुरुं प्रति शिष्यस्यकर्तव्यानि, होमकरणस्य नियमः, अतिथिसत्कारस्य नियमः, राज्ञः कर्तव्यानि, वानप्रस्थिनः नियमः, धर्माचरणस्यमहत्वम् इत्यादयः ।

## १.५.४ वशिष्ठधर्मसूत्रम्

धर्मसूत्रसाहित्ये वशिष्ठधर्मसूत्रस्य अतिशयं महत्त्वं परिलक्ष्यते । इदं धर्मसूत्रं गद्यपद्यमिश्रितमस्ति । इदं धर्मसूत्रम् ऋग्वेदात् वैदिकसंहिताभ्यश्च उद्धरणानि गृह्णाति । कुत्रचित् ऐतरेयशतपथब्राह्मणयोरपि चर्चा अत्र दृश्यते । अत्र इतिहासपुराणादीनामपि महती चर्चा दृश्यते । मनुस्मृत्या सहधर्मसूत्रस्यास्यघनिष्ठः सम्बन्धोऽपि अस्ति । मनुस्मृतेश्चत्वारिंशत्संख्यकाः श्लोका अत्र गद्यरूपेणैव वर्णिताः सन्ति ।

धर्मसूत्रेऽस्मिन् त्रिंशदध्यायाः सन्ति । प्रथमाध्यायादारभ्य चतुर्दशाध्यायं यावत् प्रायश आचारस्य विविधनियमानामुपरि चर्चा दृश्यते । वशिष्ठेन आचारस्योपरि सर्वाधिकं महत्त्वं प्रदत्तम् । यथा
'आचारः परमो धर्मः सर्वेषामिति निश्चयः ।'

**वशिष्ठधर्मसूत्रस्य विषयवस्तु एवं विधम् –**

धर्मलक्षणं, षट्प्रकारविवाहवर्णनम्, गुरुमाहात्म्यम्,परिषद्-निर्माणम्, आचमनसंस्काराः, ब्राह्मणानां नैतिकवैशिष्ट्यम्, उपनयनविधिः, वेदाध्ययनस्य विधिः न्यायव्यवस्था, नियोगविधिः, राज्ञः कर्तव्यानि, स्त्रीप्रशंसा इत्यादयः ।

## १.५.५ अन्यानि धर्मसूत्राणि

उपर्युक्तानां धर्मसूत्राणाम् अतिरिक्तं हारीतधर्मसूत्रम्, विष्णुधर्मसूत्रम्, हिरण्यकेशीधर्मसूत्रम्, वैखानसधर्मसूत्रम् इत्यादीनि अनेकानि धर्मसूत्राणि सन्ति ।

## १.६ स्मृतिशास्त्रस्य परिचयः

छन्दोबद्धस्मृतिग्रन्थाः धर्मशास्त्रसाहित्ये अतीव महत्वपूर्णाः सन्ति । सूत्रापेक्षया स्मृतिग्रन्था अर्वाचीना इति ऐतिहासिकाः वदन्ति । स्मृतिकारेषु मनुः सर्वप्रथमः । तेन अत्रि-उतथ्यपुत्र-भृगु-वशिष्ठ-वैखानस-शौनकादीनां षण्णामेवस्मृतिकाराणां नामोल्लिखितम् । प्रमुखस्मृतिकारेषु मनु-याज्ञवल्क्य-पराशरादयः प्रधानभूताः सन्ति ।

### १.६.१ मनुस्मृतिः

मनुस्मृतिः छन्दयुक्तस्मृतिषु प्राचीनतमा उल्लेखनीया च अस्ति । वेदेषु मनुः मनुष्याणां पिता इति उल्लिखितः । मनुः निरुक्ते, गौतमधर्मसूत्रे, आपस्तम्बधर्मसूत्रे, महाभारते चापि उद्धृतोऽस्ति । अस्मिन् धर्मशास्त्रे वर्णधर्म-आश्रमधर्म-वर्णाश्रमधर्म-साधारणधर्मश्चेति मनुना प्रतिपादितः ।

मनुस्मृतौ द्वादशाध्यायाः वर्तन्ते । अस्याः भाषा सरला सुगमा च । अस्याः रचनाशैली धाराप्रवाहानुसारेण वर्तते । अत्र व्याकरणदृष्ट्या ये नियमाः सन्ति ते पाणिनिसम्मताः । मनुस्मृतौ आचारव्यवहारप्रायश्चित्तानां विषयत्रयाणां वर्णनं कृतमस्ति।

मनुस्मृतेः नवटीकाः सन्ति । यथा मेधातिथेः मनुभाष्यम्, गोविन्दराजस्य मनुटीका, कुल्लुकस्य मन्वर्थमुक्तावली, सर्वज्ञनारायणस्य मन्वर्थनिबन्धः, राघवानन्दसरस्वत्याः मन्वर्थचन्द्रिका, नन्दनस्य मनुव्याख्यानम्, रामचन्द्रस्य मनुभावार्थचन्द्रिका, मणिरामस्य मत्वर्थबोधिनी, भारुचेः भारुचिटीका चेति । एषु भाष्यकारेषु मेधातिथिः प्राचीनतमः । मनुस्मृतौ वर्णानां चतुर्णाम् आश्रमाणाञ्च धर्माः कर्तव्यकर्म व्यवहारनियमाः राजनैतिकव्यवस्था दण्डविधानानि पापानि प्रायश्चित्तानि च श्लोकरुपेण समुपलभ्यन्ते।

## १.६.२ याज्ञवल्क्यस्मृतिः

याज्ञवल्क्यस्मृतिः मनुस्मृते अनन्तरम् अन्या एका उल्लेखनीया स्मृति अस्ति । यद्यपि एषा स्मृतिः मनुस्मृतिवद् विशाला नास्ति तथापि अतीव सुसंगरीत्या लिखिता । मनुस्मृतेः प्रायशः सर्वे विषयाः याज्ञवल्क्यस्मृतौ अन्तर्भूताः सन्ति । ग्रन्थोऽयं यथा धर्मशास्त्रविषयगुम्फितस्तथैव सामाजिकदृष्टिकोणानुसारं समादृतोऽप्यस्ति। याज्ञवल्क्यस्मृतिः त्रिषु काण्डेषु विभक्ता अस्ति – आचारः व्यवहारः प्रायश्चित्तञ्च।

याज्ञवल्क्यस्मृते शैली सरसा धाराप्रवाहा चास्ति । पाणिनिनियमानां परिपालनं प्रायशः सर्वेषु स्थलेषु भवन्ति । अत्रादौ आचाराध्याये ब्रह्मचर्यप्रकरणात्आरभ्य राजधर्मान्तानि त्रयोदशप्रकरणानि, द्वितीये व्यवहाराध्याये च साधारणव्यवहारमातृकाप्रकरणात्आरभ्य पञ्चविंशतिप्रकरणानि, अन्तिमे प्रायश्चित्ताध्याये च अशौचप्रकरणात्आरभ्य कृच्छादिलक्षणान्तानि चतुर्दशप्रकरणानि सन्ति।

याज्ञवल्क्यस्मृतेरुपरि अनेकैः भाष्यकारैः भाष्यंलिखितम्। यथा – विश्वरूपस्य बालक्रीडा, विज्ञानेश्वरस्य मिताक्षरा, शूलपाणेः दीपकलिका, विश्वेश्वरभट्टस्य मिताक्षरोपरि सुबोधिनीनाम्नी टीका । याज्ञवल्क्यस्मृतेउल्लेखनीया टीका विज्ञानेश्वरस्य मिताक्षरा अस्ति।

## १.६.३ पराशरस्मृति

पराशरस्मृतौ द्वादशाध्यायाः सन्ति । अत्र प्रथमाध्याये धर्माचारादीनां वर्णनम्, द्वितीयेऽध्याये गृहस्थधर्मविचारः, तृतीयाध्याये अशौचव्यवस्था, चतुर्थाध्याये विविधप्रायश्चित्तम्, पञ्चमाध्याये प्रायश्चित्त-श्रोताग्निहोत्रयोः वर्णनम्, षष्ठाध्याये प्राणिहत्याप्रायश्चित्तब्राह्मणमहत्वयोर्वर्णनम्, अष्टमाध्याये धर्माचरण-निन्द्यब्राह्मण-गोरक्षणानां विचारः, नवमाध्याये गोसेवागोवधप्रायश्चित्तविचारः, दशमाध्याये अगम्यगमनप्रायश्चित्तम्,एकादशे अभक्ष्यभक्षणप्रायश्चितम्,द्वादशाध्याये सामान्यप्रायश्चित्तविचारश्च दृश्यते।

अस्याः स्मृतेः रचना याज्ञवल्क्यस्मृतेरनन्तरमेव जातेति मन्यते । काणेमहोदयेन स्मृतेरस्याः कालः प्रथमशताब्दितः पञ्चमशताब्द्यवधि प्रतिपादितः । पाणिनिना पराशरस्य नाम गृहीतम् । निरुक्तग्रन्थेऽपि पराशरस्य चर्चा प्राप्यते । अस्याः स्मृतेः द्वे टीके प्रसिद्धेवर्तेते । यथा माधवाचार्यस्य पराशरमाधवीयटीका, नन्दपण्डितस्य विद्वन्मनोहरा चेति ।

## १.६.४ नारदस्मृतिः

नारदस्मृतौ चत्वार अध्यायाः सन्ति । त्रिषु अध्यायेषु न्यायसम्बन्धिनः विधयः चर्चिताः सन्ति । महर्षिनारदेन लिखिता एषा स्मृतिः स्मृतिषु विशेषस्थानं धारयति । नारदस्मृतौ मनुस्मृतेः बहवः श्लोकाः प्राप्यन्ते । नारदस्मृतेः विषयवस्तुनः वर्णनम् एवं प्रकारकं -

प्रथमाध्याये विचारदर्शनम्, द्वितीयाध्याये व्यवहारमातृका, तृतीयाध्याये सभालक्षणम्, चतुर्थाध्याये व्यवहारपद-ऋणदान-निक्षेप-संभूयसमुत्थान-दत्ताप्रदानिक-अभ्युपेत्याशुश्रूषा-वेतनस्यादानकर्म-अस्वामिविक्रय-सीमाबन्धादयः महर्षिनारदेन उल्लिखिताः सन्ति ।

## १.६.५ अन्यानि स्मृतिशास्त्राणि

उपर्युक्तानां स्मृतिशास्त्राणामतिरिक्तम्अन्येऽपिअनेकाः छन्दयुक्ताः स्मृतयः धर्मशास्त्रसाहित्ये जनप्रियाः सन्ति । ताः यथा – कात्यायनस्मृतिः, दक्षस्मृतिः, व्यासस्मृतिः, संवर्तस्मृतिः ।

## १.७ अध्यायात् किमवगतम्

अस्मिन् अध्याये वयं निम्नलिखित विषयाणां चर्चां कृतवन्तः –

• धर्मं तस्य स्तोतं च वयं ज्ञातवन्तः ।

• शास्त्राणि किम्, तेषां लेखनकालः, धर्मसूत्रस्मृतिशास्त्रयोर्मध्ये भेदा इत्यादिषु विषयेषु सम्यक् ज्ञानं प्राप्तवन्तः।

• विविधधर्मसूत्राणां यथा – गौतमधर्मसूत्र-बौधायनधर्मसूत्र-आपस्तम्बधर्मसूत्र-वसिष्ठधर्मसूत्रविषये विशेषपरिचयं प्राप्तवन्तः ।

• विविधस्मृतिशास्त्राणां यथा – मनुस्मृति-याज्ञवल्क्यस्मृति-पाराशरस्मृति-नारदस्मृतिविषये विशेषपरिचयं लब्धवन्तः ।

## ✓१.८ ज्ञानाधिक्यम्


- काणे,पि.भि.(१९६८)हिष्ट्री अव धर्मशास्त्र, खण्डम्-१, भाण्डारकार ओरियेन्तेल रिचार्स इन्सटिटिउट।
- कालचारेल हेरिटेइजअव्इण्डिया, (१९६२) खण्डम् -२, कलकाता रामकृष्ण मिशन, इन्सटिटिउट अव कालचार।
- झा, गङ्गानाथ (१९२९)मनुस्मृतिः, कलकाता इन्सटिटिउट अवकलकाता।


## ⍰१.९ अभ्यासप्रश्नाः

लघुप्रश्नाः

प्रश्नः१ संक्षिप्तपरिचयं ददातु –

क) गौतमधर्मसूत्रम्

ख) याज्ञवल्क्यस्मृतिः

ग) मनुस्मृतिः

घ) आपस्तम्बधर्मसूत्रम्

रचनात्मका:प्रश्नाः

प्रश्नः १. धर्मः किम ? धर्मस्रोतानां विषये लिखत।

प्रश्नः २. स्मृतिशास्त्रस्य विषये सविस्तरं लिखत।

प्रश्न ३.धर्मसूत्रस्मृतिशास्त्रयोर्मध्ये के भेदाः विराजन्ते ? विलिख्यताम्।

*****

# अध्यायः२ मनुसंहिता (सामान्याध्ययनम्)

## अध्यायसंरचना

२.१. उद्देश्यः
२.२. परिचयः
२.३. धर्मस्य धर्मशास्त्रस्य च परिचयः
२.३.१. धर्मस्य अर्थः
२.३.२. धर्मशास्त्रस्य परिचयः
२.४. मनुसंहितायाः परिचय:
२.४.१. मनो : मनुसंहिताया: च परिचयः
२.४.२. मनुसंहिताया: विषयवस्तु
२.५. अध्यायस्य असमीयासारांशः
२.६. अध्यायात् किमवगतम्
२.७. ज्ञानाधिक्यम्
२.८. अभ्यासप्रश्नाः

## २.१. उद्देश्यम्

अस्य अध्यायस्य अध्ययनेन –

- धर्मस्य धर्मशास्त्रस्य च परिचयं प्राप्स्यन्ति।
- मनुसंहिताया: संक्षिप्तं परिचयं तस्या: विषयवस्तुनः ज्ञानलाभः भविष्यति।

## २.१.परिचयः

धर्मशास्त्रमस्ति संस्कृतसाहित्यस्य एकः महत्वपूर्णः विषय:। अस्मिन् अध्याये भवन्तः धर्मस्य अपि च धर्मशास्त्रस्य संक्षिप्तं परिचयं प्राप्स्यन्ति । मनुस्मृतिः छन्दयुक्तस्मृतिषु प्राचीनतमा उल्लेखनीया च । अस्मिन् अध्याये मनोः मनुसंहितायाः च ज्ञानलाभो भविष्यति । तस्योपरि मनुसंहितायाः विषयवस्तुनः विशदतया ज्ञानं भविष्यति।

## २.३. धर्मस्य धर्मशास्त्रस्य च परिचयः

### २.३.१. धर्मस्य अर्थः

ध्रियते लोकः अनेन इति धर्मः। धरति धारयति वा लोकम् इति धर्मः । अर्थात् येन माध्यमेन लोकानां धारणं सम्भवेत् यश्च लोकानां सुनिर्वाहार्थं संसारं धारयेत् स एव धर्मशब्दवाच्यः । 'धृञ' धारण – पोषणयोरित्यस्माद्धातोर्मन् प्रत्यये कृते धर्मशब्दो निष्पद्यत । मनुस्मृत्यादिग्रन्थेषु धर्मविषयकचर्चा, आध्यात्मिकचर्चा कारणात् धर्मशास्त्रमपि शास्त्ररूपेण गृहीतानि भवन्ति । 'चोदनालक्षणोऽर्थो धर्मः', 'स्वर्गसाधनस्य शास्त्रैकसमधिगम्यातिशयस्य धर्मत्वेन सर्वसम्प्रतिपत्तेः' इति धर्मस्य परिभाषा कृता स्मृतिकारैः ।

प्रायशः वेदेषु धर्मस्यार्थरूपेण धार्मिकविधिः, धार्मिकक्रिया – निश्चित्तनियम – शिष्टाचारप्रभृतयः शब्दाः नियुक्ताः सन्ति । परन्तु उपनिषत्साहित्येषु वेदार्थातिरिक्ताः धर्मशब्दस्यार्था अपि वर्तन्ते । यथा- छान्दोग्योपनिषदि वर्णाश्रमधर्मस्यार्थत्वेन धर्मः प्रयुक्तः । महाभारतानुसारं 'अहिंसा परमो धर्मः', 'आनृशंस्यं परो धर्मो' इत्यापि निर्दिष्टोऽस्ति । मनुनाऽपि 'आचारः परमो धर्मो' इति स्पष्टमुद्घोषितम् । मनुस्मृतिटीकाकारेण मेधातिथिना धर्मशब्दः कर्तव्यतावचन इति प्रतिपादितम् । मिताक्षराकारेण विज्ञानेश्वरेणापि धर्मशब्दः षड्विधस्मार्तधर्मविषय इति प्रतिपादितः। यथा- वर्णधर्मः, आश्रमधर्मः, वर्णाश्रमधर्मः, गुणधर्मः, निमित्तधर्मः, साधारणधर्मश्चेति ।

### २.३.२. धर्मशास्त्रस्य परिचयः

धर्मस्य मूलं वेद एव । स च वेदः सर्वासां वेदानां मूलभूतः । वेदवृक्षमाश्रित्य सर्वाणि शास्त्राणि प्रभवन्ति । वेदस्य षडङ्गेषु कल्पभागे धर्मशास्त्रस्यान्तर्भावः । अतः कल्पभागादेव धर्मशास्त्रस्योत्पत्तिः समभूत् । धर्मसूत्रं वेदाङ्गभूतस्य कल्यसूत्रस्यांगविशेषः । धर्मं शास्तीति ब्युत्पत्त्या धर्मशास्त्रपदं सिद्धयति । धर्मः यस्मिन् शास्त्रे प्राधान्येन निर्दिश्यते तदेव शास्त्रं धर्मशास्त्रनाम्ना अभिधीयते । व्यवहारविधायकस्य धर्मविधायकस्य च शास्त्रस्य नाम धर्मशास्त्रमिति । शास्त्रेऽस्मिन् धर्मार्थकाममोक्षाणां चतुर्वर्गाणां निरपेक्षविचारः परिलक्ष्यते । धर्मशास्त्रे मुख्यतः आचार- व्यवहार – प्रायश्चित्तानां वर्णनं दृश्यते । भारतवर्षे बहुप्राचीनकालादारभ्य धर्मशास्त्रस्य प्राधान्यं वर्तते । धर्मार्थकाममोक्षात्मकचतुर्वर्गफलप्राप्तये जनाः वेदोपनिषद्धर्मशास्त्रोक्त-विहितानि यागादिकर्माणि कुर्वन्ति । धर्मशास्त्राणां रचनाकाल-विषये इतिहासकारेषु बहुमतभेदः परिलक्ष्यते। धर्मशास्त्रेषु सूत्रस्मृतिसाहित्ययोर्मध्ये प्राचीनार्वाचीनविषये मतभेदः परिलक्ष्यते । स्मृतिषु प्राचीनतमा मनुस्मृतिः, सूत्रेषु प्राचीनतमं गौतमधर्मसूत्रम् । धर्मशास्त्रसाहित्यस्य कालो भागत्रयेण विभक्तो वर्तते । प्राचीनधर्मसूत्रस्मृत्यादिग्रन्थानां रचनाकालः ख्री. पू. ६००

तः प्रारभ्य ख्रीष्टीयप्रथमशतकं यावन्मन्यते । द्वितीये तुं अधिकांश पदमयम् स्मृतिग्रन्थानां रचनाकालः प्रथमशतकादारभ्य ८०० ख्रीष्टाब्दं यावन्मन्यते । तृतीयस्तु भवति भाष्यनिबन्धसाहित्ययोः कालः । स च सप्तमशतकादारभ्यो- नविंशशतकावधिपरिव्याप्तो भवति । धर्मसूत्रेषु मध्ये गौतमबौधायनापस्तम्ब धर्मसूत्राणि प्रधानानि भवन्ति । तदतिरिक्तं वसिष्ठ- हारीत-हिरण्यर्कोश-शङ्खलिखित-विष्णुधर्मसुत्राणि अन्यतमानि सन्ति । स्मृतिशास्त्राणां मध्ये मनुस्मृति-याज्ञवल्कस्मृति-पाराशरस्मृति-नारदस्मृति-कात्यायनस्मृति-दक्षस्मृति-व्यासस्मृत्यादीनां प्रामुख्यं वर्तते ।

## २.४. मनुसंहितायाः परिचयः

### २.४.१. मनोः मनुसंहितायाः च परिचयः

स्मृतिकारेषु मनोः प्राथम्यं वर्तते । मनुस्मृतौ वर्णधर्म – आश्रमधर्म – वर्णाश्रमधर्म – गुणधर्म – निमित्तधर्म – साधारणधर्मश्चेति सर्वोविधोऽपि धर्मो भगवता मनुना प्रतिपादितः। मनुसंहिता धर्मशास्त्रग्रन्थेषु सर्वमान्या सर्वप्राचीना च । मनुसंहितायां द्वादशाध्यायाः वर्तन्ते । अस्याः भाषा सरला सुगमा च । अस्याः स्मृतेः सिद्धान्ताः गौतम – बौधायन – आपस्तम्बधर्मसूत्रेषु दृश्यन्ते । मनुसंहितायाः बहवः श्लोकाः वसिष्ठधर्मसूत्रे समुपलभ्यन्ते । ग्रन्थेऽस्मिन् वर्णानां चतुर्णाम् आश्रमाणाञ्च धर्माः कर्तव्यकर्माः व्यवहारनियमा राजनैतिकव्यवस्था दण्डविधानानि पापानि प्रायश्चित्तानि च श्लोकरूपेण समुपलभ्यन्ते । मनुसंहितायाः टीकानां मध्ये मेधातिथेः, कुल्लुकभट्टस्य टीका अतीव समृद्धा ज्ञानगाम्भीर्ययुक्ताश्चास्ति ।

शास्त्रमिदं न केवलं भारतवर्षे मान्यम, अपितुं श्याम – कम्बोज – फिलीपाइन – जावा – वाली – सुमात्रादिस्थानेषु सम्प्रत्यपि मनुस्मृतिसम्मताः धर्मशास्त्रनियमाः स्वीकृताः दृश्यन्ते ।

### २.४.२. मनुसंहितायाः विषयवस्तु

मनुसंहितायां द्वादशाध्यायाः वर्तन्ते । तेषु अध्यायेषु वर्णिताः विषयाः एवं प्रकारेण उपलभ्यन्ते-

प्रथमोऽध्याये जगदुत्पत्तिवर्णनम्, ब्रह्मणः उत्पत्तिः वेदत्रयसृष्टिः, कालादिसष्टिः, स्त्रीपुरुषसृष्टिः, मनोरुत्पत्तिः, यक्षगन्धवाद्युत्पत्तिः, महाप्रलयस्वरूपम्, मन्वन्तरवर्णनम्, चतुर्युगप्रमाणम्, ब्राह्मणस्य कर्माणि, क्षत्रियस्य कर्माणि, वैश्यस्य कर्माणि, शुद्रस्य कर्माणि, ब्राह्मणस्य श्रेष्ठत्वम्, आचारस्य प्राधान्यं इत्यादिविषयाणां वर्णनं समुपलभ्यते ।

द्वितीयोऽध्याये धर्मसामान्यलक्षणम, धर्मप्रमाणानि धर्मस्य वेदमूलत्वम्, श्रुतिस्मृत्योः परिचयः, वर्णधर्मकथनम् वर्णानुक्रमेण उपवीतम्, वर्णानुक्रमेण दण्ठः, भोजने नियमः, आचमनविधिः स्त्रीणां संस्काराद्यमन्त्रकम्, स्त्रीणां वैवाहिकविधिः, प्रणवोत्पत्तिः, सावित्रीजपफलम्, प्रणवप्रशंसा, अभिवादनफलम्, आचार्यलक्षणम्, उपाध्यायलक्षणम्,गुरुलक्षणम्, ऋत्विग्लक्षणम्,आचार्यस्य श्रेष्ठत्वम्, वेदाभ्यासस्य श्रेष्ठत्वम्,

द्विजत्वनिरूपणम्, ब्रह्मचारिणो नियमाः, गुर्वाज्ञाकारित्वम्, स्त्रीस्वभावकथनम् गुरुशुश्रुषाफलम्, त्रिवर्गाणां वर्णनमित्यादीनां विवेचनं समुपलभ्यते । तृतीयोऽध्याये ब्रह्मचर्यावधिः, गृहस्थाश्रमवासकालः, अष्टौ विवाहप्रकाराः, वर्णानां धर्म्यविवाहाः,पैशाचासुरविवाहनिन्दा, ह्मविवाहलक्षणं,दैवविवाहलक्षणं,आर्षविवाहलक्षणं,प्राजापत्यविवाहलक्षणं, आसुरविवाहलक्षणं, गान्धर्वविवाहलक्षणं, राक्षसविवाहलक्षणं, पैशाचविवाहलक्षणं, सवर्णविवाहविधिः,असवर्णविवाहविधिः,पञ्चमहायज्ञानुष्ठानम्, पञ्चयज्ञः, गृहस्थाश्रमप्रशंसा, तर्पणफलम्, पितृणां प्रशंसादीनां विषयाः वर्णिताः सन्ति ।

चतुर्थोऽध्याये वेदोदितं कर्मं कर्तव्यम्, वेदार्थविरोधिकर्मत्यागः नित्यं शास्त्राद्यवेक्षणम्, धर्मप्रशंसा, असत्यकथने निन्दा, ब्रह्मचिन्तादीनां वर्णनम् उपलभ्यते ।

पञ्चमोऽध्याये वेदाविहितहिंसानिषेधः, मांसवर्जनफलम्, अशुचिदर्शने, आशौचान्तकृत्यम्, अशौच्यन्तभक्षणे, ज्ञानादीनि शुद्धिसाधनानि, जलशुद्धिः, आचमनविधिः,स्वामिशुश्रुषा,गृहस्थस्य कालविधिः इत्यादयः वर्णनानि उपलभ्यन्ते ।

षष्ठोऽध्याये अतिथिचर्या, वानप्रस्थनियमाः, भोजनकालादयः, महाप्रस्थानम्, परिव्राजककालः, परिव्राजकाचारः, मोक्षसाधककर्माणि, प्राणायमप्रशंसा, देहस्वरूपम्, वेदसन्यासिकानां कर्म, चत्वार आश्रमाः, सर्वाश्रमफलम् गृहस्थस्य श्रेष्ठत्वम्, दशविधधर्म, दशविधधर्माचरणफलम्, वेदसन्यासफलमादीनां आलोचना कृता वर्तते ।

सप्तमोऽध्याये राजधर्मकथनम्, राजप्रशंसा, दण्डसृष्टिः, दण्डप्रशंसा, विद्याग्रहणम्, इन्द्रियजयम्, व्यसननिरुपणम् मन्त्रीणां नियुक्तिः, सन्धि-विग्रहादि विचारः, दूतनियुक्तिः, राजदूतलक्षणम्, दूतकार्यम्, दूतप्रशंसा, दुर्गप्रकारः, अध्यक्षनियुक्तिः, राजधर्मः, राज्ञां कर्तव्यकर्मः, साम-दण्डयोः प्रशंसा, राज्यरक्षा, बेतनप्रमाणम्, चौरादिभ्यः प्रजारक्षणम्, मन्त्रणासमयः, धर्मार्थकामचिन्तनम्, अष्टविधकर्मादिचिन्तनम्, राजमण्डलस्य द्वादश-प्रकृतयः, षाड्गुण्यचिन्तनम् सन्धिविग्रहादिकालः, राजनीतेः सामान्यलक्षणम्, व्यूहरचना – विधिः, परराष्ट्रपीठनम, मित्रप्रशंसा, राज्ञः भोजनकालः, अन्तःपुरविहारश्च इत्यादिविषयाणां विवेचनं समुपलभ्यते ।

अष्टमोऽध्याये अष्टादशविवादाः, सभाप्रशंसा, अधर्मादिशाशनम्, साक्षिणः वर्णनम्, साक्षिणः सत्यकथनम्, असत्यकथने दोषः, सत्यकथनप्रशंसा, ऋणादाने दण्डनिबन्धनम्, अधर्मनिन्दा, बुद्धिप्रकाराः, अशासने राज्ञः दोषः साक्ष्यभावे, निक्षेपनिर्णयः, साक्ष्यदानविधिः, दण्डपारुष्यम् इत्यादीनां आलोचना कृता वर्तते ।

नवमोऽध्याये स्त्रीपुंधर्माः, स्त्रीस्वभावः, स्त्रीप्रशंसा, स्त्रीधर्मः, नियोगप्रकरणम्, नियोगनिन्दा, स्वयंवरकालः, शुक्लग्रहणनिषेधः, दायभागः, ज्येष्ठप्रशंसा, कुपुत्रनिन्दा, प्रायश्चित्तशब्दव्याख्या, सप्ताङ्गराज्यस्य निरूपणम्, इन्द्रार्कव्रतादिनिरूपणम् इत्यादीनां विषयाणां वर्णनमुपलभ्यते।

दशमोऽध्याये द्विजवर्णकथनम्, वर्णसंकराः, वर्णसंकराणां कर्माणि, वर्णसंकरनिन्दा, ब्राह्मणजीविका, क्षत्रियवैश्यकर्माणि, द्विजानां श्रेष्ठकर्माणि, प्रतिग्रहनिन्दा, राज्ञामापदि कर्तव्यम्, शुद्रवृत्तिकल्पनम् इत्यादीनां विवेचनं प्राप्यते।

एकादशोऽध्याये स्नातकस्य प्रकाराः, यज्ञशीलादिधनप्रशंसा, प्रायश्चित्तमवश्यं कर्तव्यम्, पञ्चमहापातकानि, जातिभ्रंशकरणानि, सुराप्रकाराः, सुरापानप्रायश्चित्तम्, तपःप्रशंसा, वेदाध्यासप्रशंसा, रहस्यप्रायश्चित्तम् इत्यादयः वर्णिताः सन्ति।

द्वादशोऽध्याये शुभाशुभकर्मफलम्, त्रिविधमानसकर्माणि, त्रिदण्डपरिचयः, जीवात्मपरिचयः, त्रिविधगुणकथनम्, सत्वादिलक्षणम्, सात्विकगुणलक्षणम्,राजसगुणलक्षणम्, तामसगुणलक्षणम्, आत्मज्ञानस्य प्राधान्यम्, वेदोदितकर्मणः श्रेष्ठत्वम्, प्रवृत्तिनिवृत्तिकर्मफलम्, वेदप्रशंसा, तपोविद्याभ्यां मोक्षः, धर्मलक्षणम्, आत्मस्वरूपम्, आत्मदर्शनम् इत्यादीनां विषयाणाम् आलोचना उपलभ्यते।

## ২.৫. अध्यायस्य असमीयासारांशः

**धर्मः**

সংস্কৃত ✓धृ ধাতুৰ পৰা ধর্ম শব্দটো নিষ্পন্ন হৈছে। ইয়াৰ অর্থ হৈছে ধাৰণ কৰা অর্থাৎ যিয়ে ধাৰণ কৰে বা ধৰি ৰাখে সেয়াই ধর্ম। ধর্ম শব্দটিৰ বিভিন্ন অর্থ শাস্ত্রকাৰসকলে দাঙি ধৰিছে। ঋগ্বেদত উল্লেখ থকা অনুসৰি ধর্ম হৈছে নিয়মব্যৱস্থাৰ মাধ্যম। ধর্মৰ জৰিয়তে মানুহে সংসাৰত সুখ-আনন্দেৰে জীৱন যাপন কৰিব পাৰে। অথর্ববেদত ধর্মক ধার্মিক সংস্কাৰ তথা আর্জিত গুণৰূপে উল্লেখ কৰিছে- 'ঋতং সত্যং তপো ৰাষ্ট্রম্' (অথর্ববেদ ২২/৯/১৪) ঐতৰেয় ব্রাহ্মণত ধর্মক সর্ব ধার্মিক কর্তব্য হিচাপে উল্লেখ কৰিছে- 'ধর্মস্য গোপ্তা' (ঐতৰেয় ব্রাহ্মণ,৮/২৭)। কালক্রমত ধর্ম শব্দটিৰ অর্থ বিস্তৃত পৰিসৰত ব্যৱহাৰ হ'বলৈ ধৰিলে। মানৱজীৱনৰ অধিকাৰ, কর্তব্য, অনুশাসন, আচৰণ, নৈতিক কার্য্য আদিক বুজাবলৈও ধর্ম শব্দটি ব্যৱহাৰ কৰা হয়। বৈদিক সাহিত্যত ধর্মক ধার্মিকবিধি, ধার্মিক ক্রিয়া, শিষ্টাচাৰ আদিক বুজাবলৈ ব্যৱহাৰ কৰা হয়। বেহিভাগ ক্ষেত্রতেই ধর্মশব্দটোৱে ধর্মীয় বিধি বা আচৰণৰ অর্থ প্রকাশ কৰে। শ্রীমদ্ভগৱদ্গীতাতো উল্লেখ কৰা হৈছে- 'স্বধর্মে নিধনং শ্রেয়ঃ।' মহাভাৰতত কোৱা হৈছে- 'অহিংসা পৰমো ধর্মঃ।' মনুস্মৃতিত আচাৰক বুজাবলৈ ধর্ম শব্দটি ব্যৱহাৰ কৰা হৈছে- 'আচাৰঃ পৰমো ধর্মঃ।' মনুস্মৃতিৰ টীকাকাৰ

বিজ্ঞানেশ্বৰে ধর্মক ছয়টা ভাগত ভাগ কৰিছে । সেইবোৰ হ'ল–বর্ণধর্ম, আশ্রমধর্ম, বর্ণাশ্রমধর্ম, গুণধর্ম, নিমিত্তধর্ম আৰু সাধাৰণ ধর্ম ।

**ধর্মৰ উৎস:**

ধর্মশাস্ত্রত ধর্মৰ উৎস হিচাপে চাৰিপ্রকাৰৰ প্রমাণ স্বীকাৰ কৰা হৈছে– বেদ, স্মৃতি , সদাচাৰ আৰু আত্মতুষ্টি । মনুস্মৃতিত কোৱা হৈছে–

**বেদঃ স্মৃতিঃ সদাচাৰঃ স্বস্য চ প্রিয়তমাত্মনঃ ।**

**এতচ্চতুর্বিধঃ প্রাহুঃ সাক্ষাৎধর্মস্য লক্ষণম্ ।।**

**(মনুস্মৃতি, ২/১২)**

মনুস্মৃতিত উল্লেখ কৰা অনুসৰি চাৰিপ্রকাৰৰ ধর্মৰ উৎস হ'ল - বেদ, স্মৃতি, সদাচাৰ আৰু আত্মতুষ্টি ।

বেদ বুলিলে ঋগ্বেদ, যজুর্বেদ, সামবেদ আৰু অথর্ববেদক বুজোৱা হয় । এই বেদসমূহক ধর্মৰ উৎস বুলি কোৱা হয়। কাৰণ এই সমূহৰ পৰা ধর্ম বা কর্তব্য সম্পর্কে জ্ঞান আহৰণ কৰিব পাৰি মনু আদিৰ দ্বাৰা ৰচিত যিসমূহ স্মৃতিগ্রন্থ আছে সেইবোৰকো ধর্মৰ উৎস হিচাপে অভিহিত কৰা হয় । বেদ আৰু ধর্মশাস্ত্রৰ অভাৱত শীল অথবা আচৰণৰ পৰা ধর্মৰ জ্ঞান লাভ কৰিব লাগে । তদুপৰি কোনো কার্য্য সম্পাদনৰ ক্ষেত্রত জ্ঞানী অথবা সাধুলোকে সন্তুষ্টি লাভ কৰা কার্য্যক উচিত কার্য্য হিচাপে গ্রহণ কৰিব লাগে ।

**ধর্মশাস্ত্র:**

ধর্মশাস্ত্র সংস্কৃত সাহিত্যৰ বিভিন্ন শাখাসমূহৰ ভিতৰত উল্লেখযোগ্য । সকলো ধর্মশাস্ত্রক মনুৱে স্মৃতি বুলি আখ্যা দিছে-

**'ধর্মশাস্ত্রং তু ৱে স্মৃতি ।'**

ধর্মশাস্ত্রত ধর্ম, অর্থ, কাম আৰু মোক্ষ এই চতুবর্গৰেই নিৰপেক্ষ বিচাৰ কৰা হয়। ধর্মশাস্ত্রত মুখ্যৰূপে আচাৰ, ব্যৱহাৰ আৰু প্রায়শ্চিত্ত এই তিনিটা বিষয়ৰ আলোচনা কৰা হয়।

**ধর্মশাস্ত্ৰৰ ৰচনাকাল:**

ধর্মশাস্ত্ৰৰ ৰচনা কাল সম্পর্কে বিভিন্ন ধৰণৰ মতভেদ দেখিবলৈ পোৱা যায় । ডং পী.ৰী. কাণেৰ মত অনুসৰি গৌতমধর্মসূত্র, বৌধায়নধর্মসূত্র, আপস্তম্বধর্মসূত্র আদিৰ ৰচনা খ্ৰী.পূ . ৬০০ৰ পৰা ৩০০ ৰ ভিতৰত বুলি অনুমান কৰা হয় । তদুপৰি ধর্মশাস্ত্ৰৰ ভিতৰত সূত্রগ্রন্থ আৰু স্মৃতিগ্রন্থৰ মাজৰ প্রাচীনতা সম্পর্কেও মতভেদ পৰিলক্ষিত হয় । স্মৃতিগ্রন্থৰ ভিতৰত মনুস্মৃতি আৰু সূত্রগ্রন্থসমূহৰ ভিতৰত গৌতমধর্মসূত্রক প্রাচীনতম বুলি স্বীকাৰ কৰা হয় ।

**ধর্মসূত্র আৰু স্মৃতিশাস্ত্রসমূহৰ মাজৰ পার্থক্য:**

ধর্মসূত্র আৰু স্মৃতিশাস্ত্রসমূহৰ মাজত কিছুমান পার্থক্য পৰিলক্ষিত হয়। ৰচনাকালৰ ক্ষেত্রতো এই দুই ধর্মশাস্ত্ৰৰ শাখাৰ মাজত মতভেদ পৰিলক্ষিত হয় । সংস্কৃত বিশেষজ্ঞ পী. বী . কাণেৰ মত অনুসৰি ৰচনাশৈলীৰ দৃষ্টিৰ পৰা ধর্মসূত্রৰ ৰচনা স্মৃতিশাস্ত্রতকৈ প্রাচীন । কিন্তু ভাষাৰ দৃষ্টিৰ পৰা ধর্মসূত্রৰ ভাষা স্মৃতিশাস্ত্রৰ ভাষাতকৈ কঠিন তথা সহজে বোধগম্য নহয়। সূত্রসাহিত্য গদ্যপদ্যমিশ্রিত । কিন্তু স্মৃতিসাহিত্যপদ্যাত্মক, কেৱল শ্লোকতেই ৰচিত। ধর্মসূত্রসমূহৰ বিষয়বস্তু সুসংবদ্ধভাৱে ব্যৱস্থিত নহয়, কিন্তু ছন্দোবদ্ধ স্মৃতিসমূহৰ বিষয়বস্তু নির্দ্দিষ্টৰূপত ব্যৱস্থিত আৰু আচাৰ, ব্যৱহাৰ আৰু প্রায়চিত্ত এই তিনিটা ভাগত বর্ণিত হয় ।

**ধর্মসূত্রৰ পৰিচয়:**

ধর্মসূত্রক প্রধানকৈ দুটা ভাগত ভাগ কৰা হয়। প্রাচীন ধর্মসূত্র আৰু অর্বাচীন ধর্মসূত্র । প্রাচীন ধর্মসূত্রৰ ভিতৰত গৌতমধর্মসূত্র, বৌধায়নধর্মসূত্র, আপস্তম্বধর্মসূত্র আদি প্রধান । তদুপৰি অর্বাচীন ধর্মসূত্র বুলিলে বশিষ্ট ধর্মসূত্র, হাৰীতধর্মসূত্র, শংখলিখিত ধর্মসূত্র আদিক বুজোৱা হয় ।

**কেইখনমান মুখ্য ধর্মসূত্র:**

ধর্মসূত্রসমূহৰ ভিতৰত গৌতমধর্মসূত্রৰ স্থান অন্যতম । ইতিহাসবিদসকলৰ মতে ধর্মসূত্রসমূহৰ ভিতৰত গৌতমধর্মসূত্র প্রাচীনতম। ধর্মসূত্রসমূহৰ প্রায়বোৰেই গৌতমধর্মসূত্রৰ দ্বাৰা প্রভাৱান্বিত । এই গ্রন্থখনত ২৮টা অধ্যায় পোৱা যায় । এইধর্মসূত্রখন সমগ্র ভা�ৰততেই আদৰণীয় । গৌতমধর্মসূত্রৰ ওপৰত চাৰিটা টীকা ৰচিত হৈছে। সেইসমূহহল - মস্কৰাচার্য্যৰ মস্কৰী, হৰদত্তৰ মিতাক্ষৰা, অসহায়ৰ অসহায়টীকা আৰু কুলমণিমিশ্রৰ সুক্ষ্মা ।

বৌধায়নধর্মসূত্র কৃষ্ণযজুর্বেদৰ লগত সম্বন্ধিত এখন ধর্মসূত্র। এই গ্রন্থৰ ভাষা অতি সৰল । এই ধর্মগ্রন্থখনৰ বিষয়সমূহ চাৰিটা প্রশ্নত আলোচনা কৰা হৈছে । ধর্মৰ উৎস, শিষ্যৰ বিষয়ে, পৰিষদ, শিষ্যৰ নিবাস, গুৰুগৃহত অধ্যয়ন কাল, স্নাতকৰ কর্তব্য আদি প্রথম প্রশ্নত আলোচনা কৰা হৈছে । দ্বিতীয় প্রশ্নত ব্রহ্মহত্যাৰ প্রায়শ্চিত্ত, সম্পত্তিৰ বিভাজন, নিয়োগৰ বিধি, সূর্য্য উপাসনা, চাৰিবর্ণ আৰু সেইসমূহৰ কর্তব্য আদি আলোচনা কৰা হৈছে। ঋষিৰ কর্তব্য, জীৱন ধাৰণৰ উপায়, ব্রহ্মচাৰী আৰু গৃহস্থৰ ব্রত সম্পন্ন নকৰাৰ বাবে প্রায়শ্চিত্ত আদিৰ বর্ণনা তৃতীয় প্রশ্নত পোৱা যায়

। চতুর্থ প্রশ্নত বিভিন্ন ধৰণৰ প্রায়শ্চিত্ত, প্রানায়াম, জপ, ইষ্টি আদিৰ জৰিয়তে সিদ্ধিলাভৰ উপায়, চান্দ্রায়ণ তপস্যা আদিৰ বর্ণনা পোৱা যায় ।

আপস্তম্বধর্মসূত্র ধর্মসূত্রসমূহৰ ভিতৰত অন্যতম।এই ধর্মগ্রন্থত মীমাংসা সম্বন্ধীয় বিভিন্ন পাৰিভাষিক শব্দ পোৱা যায় । এই গ্রন্থত দুটি প্রশ্ন পোৱা যায়, প্রতিটো প্রশ্নত ১১ টা পটল পোৱা যায় । আপস্তম্বধর্মসূত্র সংক্ষিপ্ত আৰু ভাষাৰ দৃষ্টিৰ পৰা সৰল। এই ধর্মসূত্রৰ ওপৰত হৰদত্তই উজ্জ্বলা নামৰ টীকাৰ ৰচনা কৰিছে ।

বশিষ্টধর্মসূত্র এখন মহত্বপূর্ণ ধর্মসূত্র। এই গ্রন্থগদ্যপদ্যমিশ্রিত । ইয়াৰ বহুখিনি সূত্র ঋগ্বেদ আদি বৈদিক গ্রন্থৰ পৰা উদ্ধৃত । এই গ্রন্থত ৩০ টা অধ্যায় পোৱা যায়। ঋষি বশিষ্ঠৰ দ্বাৰা ধর্মগ্রন্থখনত আচাৰৰ ওপৰত যথেষ্ট গুৰুত্ব প্রদান কৰা হৈছে। ধর্মৰ লক্ষণ, ছয়প্রকাৰৰ বিবাহ, চাৰিবর্ণ, আচার্যৰ মহত্ব, পৰিষদ গঠন, আচমনবিধি, অতিথিসৎকাৰ , আচাৰৰ প্রশংসা, ব্রাহ্মণৰ নৈতিক বৈশিষ্ট্য, সন্যাসীৰ কর্তব্য ,বাৰপ্রকাৰৰ পুত্র, ৰজাৰ কর্তব্য, পুৰোহিতৰ গুৰুত্ব , বিভিন্ন পাপৰ প্রায়শ্চিত্ত, স্ত্রীৰ প্রশংসা আদি বিষয় বশিষ্টধর্মসূত্রত আলোচিত হৈছে ।

**স্মৃতিশাস্ত্রৰ পৰিচয়:**

ধর্মশাস্ত্রসাহিত্যত ছন্দোবদ্ধস্মৃতিগ্রন্থসমূহ অতি মহত্বপূর্ণ । স্মৃতিকাৰসকলৰ ভিতৰত মনুক সর্বপ্রথম বুলি অভিহিত কৰা হয় । আন আন প্রমুখ স্মৃতিশাস্ত্রসমূহ হ'ল–যাজ্ঞবল্ক্য,পৰাশৰ,নাৰদ আদি ।

**কেইখনমান মুখ্য স্মৃতিশাস্ত্র:**

ছন্দোবদ্ধস্মৃতিশাস্ত্রসমূহৰ ভিতৰত মনুস্মৃতিক আটাইতকৈ প্রাচীন বুলি স্বীকাৰ কৰা হয় । নিৰুক্ত, গৌতমধর্মসূত্র, আপস্তম্বধর্মসূত্র, মহাভাৰত আদিত মনুস্মৃতিৰ উদ্ধৃতি দিয়া হৈছে । এই গ্রন্থত ১২ টা অধ্যায় আছে, যিসমূহত আচাৰ, ব্যৱহাৰ আৰু প্রায়শ্চিত্ত এই তিনিটা বিষয়ৰ আলোচনা কৰা হৈছে । এই গ্রন্থৰ ভাষা সৰল আৰু সহজ বোধগম্য । মনুস্মৃতিৰ ওপৰত নজন ভাষ্যকাৰে ভাষ্য ৰচনা কৰিছে । সেইসকল হ'ল - মেধাতিথি, গোবিন্দৰাজ, কুল্লুক, নাৰায়ণ, ৰাঘৱানন্দ, নন্দন, ৰামচন্দ্র, মনিৰাম আৰু ভাৰুচি ।

মনুস্মৃতিৰ পাছতেই আনখন উল্লেখযোগ্য স্মৃতিশাস্ত্র হৈছে যাজ্ঞবল্ক্য স্মৃতিশাস্ত্র। যাজ্ঞবল্ক্য তিনিটা কাণ্ডত বিভক্ত । সেইসমূহ হ'ল - আচাৰ, ব্যৱহাৰ আৰু প্রায়শ্চিত্ত । সমগ্র যাজ্ঞবল্ক্য অনুষ্টুপ্ ছন্দত ৰচিত । ইয়াৰ ৰচনা ৰীতি সৰল আৰু মাধুর্য্যপূর্ণ । যাজ্ঞবল্ক্য স্মৃতিৰ ওপৰত বহুজনে টীকা ৰচনা কৰিছে । সেই সমূহৰ ভিতৰত উল্লেখনীয় টীকা হ'ল – বিজ্ঞানেশ্বৰৰ মিতাক্ষৰা টীকা ।

পৰাশৰস্মৃতি মহর্ষি পৰাশৰৰ দ্বাৰা ৰচিত । এই স্মৃতি গ্রন্থত ১২ টা অধ্যায় আছে । পাণিনীয়ে পাৰাশৰ স্মৃতিৰ উল্লেখ কৰিছে । নিৰুক্ত গ্রন্থতো পাৰাশৰ স্মৃতিৰ উল্লেখ পোৱা যায় । এই স্মৃতি গ্রন্থৰ বিষয়বস্ত্ত সমূহ হ'ল - ধর্ম, ছয়প্রকাৰৰ নিত্য কর্ম, গৃহস্থৰ ধর্ম, স্ত্রীৰ পুনর্বিবাহ, গো হত্যাৰ প্রায়শ্চিত্ত, মদ্যপানৰ প্রায়শ্চিত্ত, ব্রহ্মহত্যাৰ

প্রায়শ্চিত্ত ইত্যাদি ।এই গ্রন্থৰ দুটি টীকা উল্লেখযোগ্য মাধৱাচার্য্যৰ পৰাশৰমাধৱীয় টীকা আৰু নন্দপণ্ডিতৰ বিদ্বন্মনোহৰা ।

মহর্ষি নাৰদ ৰচিত নাৰদস্মৃতিয়ে স্মৃতিশাস্ত্রসমূহৰ ভিতৰত অন্যতম স্থান অধিকাৰ কৰি আছে । নাৰদস্মৃতিত তিনিটা অধ্যায়ত ন্যায়সম্বন্ধীয় বিভিন্ন বিষয় আলোচনা কৰা হৈছে ।

ওপৰোক্ত স্মৃতিশাস্ত্রসমূহৰ বাহিৰেও কাত্যায়নস্মৃতি, দক্ষস্মৃতি, ব্যাসস্মৃতি, সংবর্তস্মৃতি আদি উল্লেখযোগ্য ।

## २.६. अध्यायात् किमवगतम्

• येन माध्यमेन लोकानां धारणं सम्भवेत् यश्च लोकानां सुनिर्वाहार्थं संसारं धारयेत् स एव धर्मशब्दवाच्यः।

• धर्मः यस्मिन् शास्त्रे प्राधान्येन निर्दिश्यते तदेव शास्त्रं धर्मशास्त्रनाम्ना अभिधीयते।

• धर्मशास्त्रे मुख्यतः आचार-व्यवहार-प्रायश्चित्तानां वर्णनं दृश्यते।

• स्मृतिकारेषु मनोः प्राथम्यं वर्त्तते। मनुसंहितायां द्वादशाध्यायाः सन्ति।

• मनुसंहितायाः टीकानां मध्ये मेधातिथेः, कुल्लुकभट्टस्य च टीका अतीव समृद्धा।

## २.७. ज्ञानाधिक्यम्


- काणे, पि. भि. (१९६८) हिष्ट्री अव् धर्मशास्त्र, खण्डम्-२, भाण्डारकार ओरियेन्तेल रिचार्स इन्सटिटिउट्।
- कालचारेल हेरिटेइज अव् इण्डिया, (१९६२) खण्डम्-२, कलकाता रामकृष्ण मिचन, इन्सटिटिउट अव कालचार।
- झा, गङ्गानाथ (१९२९) मनुस्मृतिः, कलकाता इन्सटिटिउट अव कलकाता।
- शर्मा, किरण (२००८) मनुसंहिता, गुवाहाटी, चन्द्रप्रकाशः।

## ⑦ २.८. अभ्यासप्रश्नाः

**लघुप्रश्नाः**

**प्रश्नः१** मनुसंहितायां कति अध्यायाः सन्ति ?

**प्रश्नः२** मनुसंहिताया :सप्तमोऽध्यायस्य मुख्यविषयः कः?

**प्रश्नः३** मनुसंहितायाः भाष्यकारद्वयोः नामलिखतु।

**रचनात्मकाः प्रश्नाः**

**प्रश्नः१** मनुसंहितायाः संक्षिप्तं परिचयं ददातु।

**प्रश्नः२** मनुसंहितायाः विषयवस्तुनः संक्षिप्तं अवलोकनं ददातु।

*****

# अध्यायः३ मनुसंहिता (द्वितीयोऽध्यायः, श्लोकाः ४३-५३)

## अध्यायसंरचना

३.१. उद्देश्यः

३.२. परिचयः

३.३. श्लोकानां मूलसंस्कृतपाठः, शब्दार्थः, व्याख्या,सरलव्याख्या, असमीयानुवादः

३.४. श्लोकानां संस्कृतसारांशः

३.५. श्लोकानाम् असमीयासारांशः

३.६. सन्धियुक्तशब्दानां सन्धिविच्छेदः

३.७ केषांचन श्लोकानां व्याख्याः

३.८. अध्यायात् किमवगतम्

३.९ ज्ञानाधिक्यम्

३.१०. अभ्यासप्रश्नाः

## ३.१. उद्देश्यम्

**अस्य अध्यायस्य अध्ययनेन भवन्तः –**

• मनुस्मृतेः द्वितीयोऽध्यायस्य त्रिचत्वारिंशत् श्लोकतः त्रिपञ्चाशत् श्लोकपर्यन्तं संस्कृतपाठान् ज्ञास्यन्ति।

• श्लोकानां मूलसंस्कृतपाठ – अन्वय – शब्दार्थ-व्याख्या – सरलव्याख्या – असमीयानुवादविषये अवगताः भवन्ति।

• श्लोकानां सारांशं प्राप्नुवन्ति।

## ३.२. परिचयः

मनुस्मृतेः द्वितीयोऽध्यायः अतीव महत्वपूर्णः अस्ति। द्वितीयोऽध्याये त्रयाणां वर्णानां संस्कारविधिनाम् वर्णनं सविशेषतया उपलभ्यते। अस्मिन् अध्याये भवन्तः चतुर्वर्णानां उपनयनसंस्कारान् तेषां सम्बन्धीन् विधीन् च सविस्तरं ज्ञास्यन्ति।

## ३.३ श्लोकानां मूलसंस्कृतपाठः, शब्दार्थः, व्याख्या,सरलव्याख्या, असमीयानुवादः

**मुञ्जालाभे तु कर्तव्याः कुशाश्मन्तकबल्वजैः।**
**त्रिवृत्ता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा ।।**

**अन्वयः**

मुञ्जालाभे तु कुशाश्मन्तकबल्वजैः प्रिवृत्ता एकेन ग्रन्थिना त्रिभिः पञ्चभिरेव वा कर्तव्याः ।

**शब्दार्थः**

मुञ्जालाभे – मुञ्जस्य अलाभे

त्रिवृता – त्रिगुणेन

कुशाश्मन्तकबल्वजै : - कुश-अश्मन्तक – बल्वजैः

**व्याख्या -**

कर्तव्या इति बहुवचननिर्देशात् ब्रह्मचारित्रयस्य प्रकृतत्त्वान्मुख्यालाभे त्रिष्वव्यपेक्षायाः समांत्वात्कौशादीनां च तिसृणां विधानामुञ्जाद्यलाभ इति बोद्धव्यम् ।कर्तव्या इति बहुवचनमुप्पन्नतरम् ।भिन्नजातिसंबन्धितयेति ब्रुवाणस्य मेधातिभेरपि बहुवचनपाठःसंमतः।मुञ्जाद्यलाभे ब्राह्मणादीनां त्रयाणां यथाक्रमं कुशादिभि स्तृणविशेषैर्मेखलाः कार्याः। त्रिगुणेनैकग्रन्थिनायुक्तास्त्रिभिर्वा पञ्चभिर्वा । अत्र च वा शब्दनिर्देशाद् ग्रन्थीनां न विप्रादिभिः क्रमेण संबन्धः किन्तु सर्वत्र यथाकुलाचारं विकल्पः। ग्रन्थिभेदश्चायं मुख्यामुख्यापेक्षासंभवाद् ग्रहीतव्यः ।

**सरलव्याख्या -**

मुञ्जस्य मुञ्जाद्यस्य अलाभे ब्राह्मणादीनां त्रयाणां यथाक्रमं कुशादिभिस्तृणविशेषैर्मेखलाः कार्याः। त्रिगुणेनैकग्रन्थिना युक्तास्त्रिथिर्वा पञ्चभिर्वा । अत्र च वाशब्दनिर्देशात् गन्थीनां न विप्रादिभिः क्रमेण संबन्धः, किन्तु सर्वत्र यथाकुलाचारं विकल्पः ।

**असमीयानुवादः**

মুঞ্জাদি অপ্রাপ্ত হলে ব্রাহ্মণে কুশ, ক্ষত্রিয়ই অশ্মন্তক (তৃণ বিশেষ) আৰু বৈশ্যই বল্বজ (তৃণ বিশেষ)ৰ দ্বাৰা নির্মিত তিনিডাল সূত্রৰ এক অথবা তিনি অথবা পঞ্চগ্রন্থিযুক্ত; মেখেলা পৰিধান কৰিব লাগে ।

**श्लोकसंख्या ४४**

**कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत् ।**
**शणसूत्रमयं राज्ञोः वैश्यस्याविकसौत्रिकम् ॥**

**अन्वयः**

विप्रस्य उपवीतम् कार्पासंम् राज्ञः शणसूत्रमयम् वैश्यस्याविकसौत्रिकम् स्यात् ऊर्धवृतम् त्रिवृत् ।

**शब्दार्थः**

विप्रस्य -ब्राह्मणस्यः

उपवीतं -ब्रह्मसूत्रं

ऊर्ध्ववृतम् – दक्षिणावर्तिनं

**व्याख्या -**

यदीयविन्यासविशेषस्योपवीतसंज्ञा वक्ष्यति तद्धर्मिब्राह्मणस्य कार्पासम्, क्षत्रियस्य शणसूत्रमयम्, वैश्यस्य मेषलोमनिर्मितम् । त्रिवृदिति त्रिगुणं कृत्वा अर्धवृतं दक्षिणावर्तितम् । एतच्च सर्वत्र संबध्यते । यद्यपि गुणत्रयमेवोर्ध्ववृतं मनुनोक्तं तथापि तन्त्रिगुणीकृत्य त्रिगुणं कार्यम् ।

**असमीयानुवादः**

ব্রাহ্মণৰ যজ্ঞোপবীত কৰ্পাস, ক্ষত্রিয়ই শন, বৈশ্যৰ আবিকসৌত্রিকৰ হব লাগে।সেই উপবীত সোফালৰ পৰা বাওঁফাললৈ তিনিগুণ কৰি নিৰ্মাণ কৰিব লাগে ।

**श्कलोकसंख्या ४५**

**ब्राह्माणो बैल्वपालाशौ क्षत्रियो वाटखादिरौ ।**

**पैलवौदुम्बरौ वैश्यौ दण्डानर्हन्ति धर्मतः ।।**

**अन्वयः**

बाह्मणः बैल्वपालाशौ क्षत्रियः वाटखादिरौ वैश्यो पैलवौदुम्बरौ दण्डान् धर्मतः अर्हन्ति ।

**शब्दार्थः**

दण्डान् -यज्ञोपवीतदण्डान्

धर्मतः- नियमत:

अर्हन्ति -धारयितुम् अर्हन्ति

**व्याख्या-**

यद्यपि द्वन्द्वनिर्देशेन समुच्चयावगमाद्धारणमपि समुच्चितस्यैव प्राप्तं तथापि 'केशान्तिको ब्राह्मणस्य दण्डः कार्य' इति, तथा 'प्रतिगृह्योप्सितं दण्डम्'-इति विधावेकत्वस्य विवक्षितत्वात् 'बैल्व: पालाशो वा दण्ड' 'इति वासिष्ठे विकल्पदर्शनादेकस्यैव दण्डस्य धारणविकल्पितयोरेवैकब्राह्मणसंबन्धात्समुच्चयो द्वन्द्वेनानुद्यते । ब्राह्मणादयो विकल्पेन द्वौ द्वौ दण्डौ वक्ष्माणकार्ये कर्तुमर्हन्ति ।

**सरलव्याख्या-**

द्विजानां दण्डानाह बाह्मणस्य वैल्वपालाशौ भवतः । पालाशस्याभावे बिल्व: बिल्ववृक्षस्य दण्डः कार्यः । राज्ञः वाटखादिरौ वटवृक्षस्य वा खदिरवृक्षस्य वा दण्डः । वैश्यस्य पैलवः पीलुवृक्षोद्भवो वा दण्डःउदुम्बरवृक्षजो वा दण्डः । एतान् धर्मतः धारयितुमर्हन्ति ।

**असमीयानुवादः**

ব্রাহ্মণে বিল্ব অথবা পলাশ, ক্ষত্রিয়ই বট অথবা খাদিৰ, বৈশ্যই পৈলৰ অর্থাৎ আহঁত অথবা উডুম্বৰৰ পৰা নির্মিত দণ্ড নিয়মানুসৰি ধাৰণ কৰিব লাগে ।

**श्लोकसंख्या ४६**

**केशान्तिको ब्राह्मणस्य दण्डः कार्यः प्रमाणतः ।**
**ललाटसंमितो राज्ञ : स्यात्तु नासान्तिको विशः ॥**

**अन्वयः**

प्रमाणतः ब्राह्मणस्य दण्डः केशान्तिकः राज्ञः ललाटसम्मितः कार्यः तु विशः नासान्तिकः स्यात् ।

**शब्दार्थ :**

केशान्तिकः - केशपर्यन्त :

ललाटसम्मितः -ललाट पर्यन्त:

कार्यः - कारयितव्य:

नासान्तिकः - नासिकापर्यन्तं

**व्याख्या -**

केशललाटनासिकापर्यन्तपरिमाणक्रमेण ब्राह्मणादीनां दण्डा: कर्तव्या: ।

**असमीयानुवाद:**

ব্রাহ্মণৰ দণ্ড কেশপর্যন্ত,ৰজাৰ অর্থাৎ ক্ষত্রিয়ৰ দণ্ড ললাটপর্যন্ত, আৰু বৈশ্যৰ দণ্ড নাকপর্যন্ত, দৈর্ঘ্যৰ হব লাগে ।

**श्लोकसंख्या ४७**

**ऋजवस्ते तु सर्वे स्युरव्रणाः सौम्यदर्शनाः ।**
**अनुद्वेगकरा नृणां सत्वचोऽनग्निदूषिताः ॥**

**अन्वयः**

ते तु सर्वे ऋजवः अव्रणाः सौम्यदर्शनाः नृणाम् अनुद्वेगकराः सत्त्वचः अनग्निदूषिताः स्युः ।

**शब्दार्थः**

ऋजवः - अवक्ताः

अव्रणाः- अक्षताः

सौम्यदर्शनाः - शोभनदर्शनाः

नृणाम् - प्रदर्शनार्थम्

अनुद्वेगकरा- न कश्चिदुद्वेजयितव्यः

सत्वचः - सवल्कला:

अनग्निदूषिताः - अग्निदोषशून्याः

**व्याख्या -**

ते दण्डाः अव्रणा अक्षताः शोभनदर्शना: सवल्कला: अग्निदोषशून्याः भवेयुः ।

**असमीयानुवाद:**

সেই সকলোবোৰ দণ্ড অবক্র, অক্ষত, সুদৃশ্য, অনুদ্বেকাৰী, চর্মযুক্ত আৰু অগ্নিত দূষিত হ'ব নোৱাৰা হ'ব লাগে ।

**श्लोकसंख्या ४८**

**प्रतिगृह्योप्सितं दण्डमुपस्थाय च भास्करम् ।**

**प्रदक्षिणं परीत्याग्निं चरेद्भैक्षं यथाविधि ॥**

**अन्वय:**

ईप्सितं दण्डं प्रतिगृह्यं च भास्करम् उपस्थाय अग्निं प्रदक्षिणं परीत्य यथाविधि भैक्ष्यं चरेत् ।

**शब्दार्थ:**

ईप्सितं – उक्तलक्षणं प्राप्तुमिष्टं

प्रतिगृह्य -गृहीत्वा

उपस्थाय -अभिमुखं स्थित्वा

चरेत्- याचेत्

**व्याख्या -**

उक्तलक्षणं प्राप्नुमिष्टं दण्डं गृहीत्वा आदित्याभिमुखं स्थित्वाग्निं प्रदक्षिणीकृत्य यथाविधि भैक्षं याचेत् ।

**असमीयानुवाद:**

উক্ত লক্ষনযুক্ত অভিপ্রেত দণ্ড ধাৰণ কৰি সূর্য্য অভিমুখে থিয় হৈ অগ্নিক প্রদক্ষিণ কৰি যথাবিধি ভিক্ষা খুজিব লাগে ।

**श्लोकसख्या ४९**

**भवत्पूर्वं चरेद्भैक्षमुपनीतो द्विजोत्तम: ।**

**भवन्मध्यं तु राजन्यो वैश्यस्तु भवदुत्तरम् ॥**

**अन्वयः**

उपनीतः द्विजोत्तमः भवत्पूर्वं भैक्षं चरेत् तु राजन्यः भवन्मध्ये तु वैश्यः भवदुत्तरम् ।

**शब्दार्थः**

उपनीत : - यज्ञोपवीत :

द्विजोत्तम: -बाह्मणः

चरेत् – याचेत्

राजन्यः – क्षत्रिय:

**व्याख्या-**

ब्राह्मणो भवति भिक्षां देहीतिः भवच्छब्दपूर्वं शिक्षां याचन्वाक्यमुचारयेत् । क्षत्रियो भिक्षां भवति देहीति भवन्मध्यम् । वैश्यों भिक्षां देहि भवतीति भवदुत्तरम् ।

**असमीयानुवादः**

ব্রাহ্মণে 'ভৱত' শব্দক বাক্যৰ পূর্বতে সংযোগ কৰি (ভৱান্ ভিক্ষাং দদাতু), ক্ষত্রিয়ই 'ভৱত্' শব্দক বাক্যব মাজত সংযোগ কৰি (ভিক্ষাং ভৱান দদাতু) আৰু বৈশ্যই 'ভৱত্' শব্দক বাক্যৰ শেষত সংযোগ কৰি (ভিক্ষাং দদাতু ভৱান্) ভিক্ষা খুজিব লাগে ।

**श्लोकसंख्या ५०**

**मातरं वा स्वसारं वा मातुर्वा भगिनीं निजाम् ।**
**भिक्षेत शिक्षां प्रथमं या चैनं नावमानयेत् ॥**

**अन्वयः**

मातरं वा स्वसारम् वा मातुः निजां भगिनीम् च या एनं न अवमानयेत् प्रथमं भिक्षां भिक्षेत् ।

**शब्दार्थः**

स्वसारम्- स्वकीयं भगिनीम्

एनं - ब्रह्मचारिणं

न अवमानयेत्- न प्रत्याख्यानं कुर्यात्

भिक्षेत - याचेत्

**व्याख्या-**

उपनयनाङ्गभूतां भिक्षां प्रथमं मातरं भगिनीं वा मातुर्वा भगिनीं सहोदरां याचेत् । या चैनं ब्रह्मचारिणं प्रत्याख्यानेन नावमन्येन पूर्वासंभव उत्तरापरिग्रहः ।

**असमीयानुवादः**

প্রথমতে মা, বা ভনী, অথবা মাহী আৰু যিয়ে ভিক্ষা দিবলৈ অমান্তি নহয়, প্রথমে তেওঁলোকক পৰা ভিক্ষা খুজিব লাগে ।

**श्लोकसंख्या ५१**

**समाहत्य तु तद्भैक्षं यावदन्नममायया ।**
**निवेद्य गुरवेऽश्नीयादाचम्य प्राङ्मुखः शुचिः ॥**

**अन्वयः**

तत् भैक्षं तु समाहत्य यावदन्नम् अमायया गुरवे निवेद्य शुचिः प्राङ्मुखः आचम्य अश्नीयात् ।

**शब्दार्थः**

भैक्षं – भिक्षां
समाहृत्य – आनीय
अमायया -कदन्नेन
निवेद्य – निवेदनं कृत्वा
शुचिः- स्वच्छतापूर्वकं
प्राङ् मुखः- पूर्वमुखः
आचम्य – उपस्पृश्य
अश्नीयात् – भोजनं कुर्यात्

**व्याख्या -**

तद्भैक्षं बहुभ्य आहृत्य यावदन्नं तृप्तिमात्रोचितं गुरवे निवेद्य निवेदनं कृत्वा अमायया न कदन्नैन सदन्नं प्रच्छाद्यैवमेतद्गृत् गुरूर्ग्रहीष्यतीत्यादिमायाव्यतिरेकेण तदनुज्ञात आचमनं कृत्वा शुचिः सन् भुञ्जीत प्राङ्गमुखः ।

**असमीयानुवादः**

সেই ভিক্ষা অর্জন কৰি যিমানখিনি ভোজ্য সামগ্রী থাকে, সেইসমূহ অকপটভাৱে প্রথমে গুৰুক নিবেদন কৰিব লাগে, তাৰপাছত গুৰুৰ দ্বাৰা প্রদত্ত ভিক্ষা স্বচ্ছতাপূর্বক পূৱফালে মুখ কৰি বহি শুচি কৰি খাব লাগে ।

**श्लोकसंख्या ५२**

**आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणागुखः।**
**श्रियं प्रत्यङ्गमुखो भुङ्क्ते ऋतं भुङ्क्ते ह्युदङ्मुखः ।**

**अन्वयः**

आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः भुङ्क्ते श्रियं प्रत्यङ्मुखो भुङ्क्ते ऋतं हि उदङ्मुखः भुङ्क्ते ।

**शब्दार्थ:**

आयुष्यं – आयुषे हितं

भुङ्क्ते – भोजनं कुर्यात्

यशस्यं – यशसे हितं

श्रियं – श्रियमिच्छन्

प्रत्यङ्मुख: - पश्चिममुखः

उदङ्मुखः – उत्तरमुखः

**व्याख्या-**

आयुषे हितमन्नं प्राङ्मुखो भुङ्क्ते आयुः काम: प्राङमुखो भुङ्क्तः इत्यर्थः । यशसे हितं दक्षिणामुखः श्रियमिच्छन् प्रत्यङ्मुखः ऋतं सत्यं तत्फलमिच्छन्नुदङ्मुखो भुञ्जीत ।

**असमीयानुवाद :**

আয়ুস লাভ কৰিবৰ বাবে পূৱফালে মুখ কৰি, যশ লাভ কৰিবৰ বাবে দক্ষিণফালে মুখ কৰি, ধন লাভ কৰিবৰ বাবে পশ্চিমফালে মুখ কৰি, সত্যৰ ফল লাভ কৰিবৰ বাবে উত্তৰফালে মুখ কৰি ভোজন কৰিব লাগে ।

**श्लोकसंख्या ५३**

**उपस्पृश्य द्विजो नित्यमन्नमद्यात्समाहित: ।**

**भुक्त्वा चोस्पृशेत्सम्यगद्भि: खानि च संस्पृशेत् ॥**

**अन्वय:**

द्विज: नित्यम् उपस्पृश्य समाहितः अन्नमद्यात् च भुक्त्वा सम्यक् उपस्पृशेत् च अद्भि: खानि संस्पृशेत् ।

**शब्दार्थ:**

द्विज: - यज्ञोपवीतवर्ण :

नित्यम् – प्रतिदिनम्

उपस्पृश्य -आचम्यं

अद्यात् – भक्षयेत्

अद्भि: - जलै:

खानि-इन्द्रियाणि

संस्पृशेत् – प्रक्षालयेत्

**व्याख्या-**

निवेद्य गुरवेऽश्नीयादाचम्य' इति यदापि भोजनात्प्रागाचमनं विहितं तथाप्यद्भि: खानि च संस्पृशेदिति गुणविधानार्थोऽनुवाद । नित्यं ब्रह्मचर्यानन्तरं अपि द्विज आचम्यान्नं भुञ्चीत । समाहितोऽनन्यमनाः भुक्ता चाचामेदिति । सम्यग्यथाशास्त्रम् । तेन 'प्रक्षाल्य हस्तौ पादौ च त्रिः पिबेदम्बु वीक्षितुम् ' इत्यादि दाक्षाद्युक्तमपि संगृह्यति । जलेन खानीद्रियाणि षट् छिद्राणि च स्पृशेत्, तानि च शिरःस्थानि घ्राणचक्षु: श्रोत्रादीनि ग्रहीतव्यानि । 'खानि चोपस्पृशेच्छीर्षण्यानि ' इति शोतमवचनात् । उपस्पर्शतं कृत्वा खानि संस्पृशेदिति पृथग्विधानान्त्रिरष्भक्षणमात्रमाचमनम्, खस्पर्शनादिकमितिकर्तव्यतेति, दर्शितम् ।

**सरलव्याख्यां**

द्विजः अप उपस्पृश्य आचम्य अन्नं अद्यात् भक्षेत् । भुक्त्यनन्तरं अप उपस्पृशेत आचामेत् अद्भि: जलैः खानि मुखनासिकादीनि संस्पृशेत् ।

**असमीयानुवादः**

দ্বিজই প্রত্যেকদিনে আচমনবিধি কৰি একাগ্রমনেৰে ভোজন কৰিব লাগে আৰু ভোজনৰ পাছত ভালদৰে পানীৰে মুখ, নাক আদি ইন্দ্রিয়বোৰ প্রক্ষালন কৰিব লাগে ।

## ३.४. श्लोकानां संस्कृतसारांशः

मनुस्मृतेः द्वितीयोऽध्याये त्रिवर्णानाम् उपनयनसंस्काराः तेषां भोजनस्य विविधाः संस्काराः इत्यादयः विषयाः वर्णिताः सन्ति । मुञ्जाद्यलाभे ब्राह्मणादीनां त्रयाणां वर्णानां यथाक्रमं कुश – अश्मन्तक – बल्वजादिभिः मेखलाः कार्याः । ब्राह्मणस्य यज्ञोपवीतं कर्पासं क्षत्रियस्य शणं वैश्यस्य मेषलोमं निर्मितम् । ब्राह्मणः बिल्वं वा पलाशं क्षत्रियः वटं वा खादिरं वैश्यः पैलवं वा , उदुम्बरं शास्त्रानुसारेण धारयितुमर्हन्ति । ब्राह्मणस्य दण्ड: केशपर्यन्तं राज्ञः अर्थात् क्षत्रियस्य दण्डः ललाटपर्यन्तं वैश्यस्थ दण्डः नासिकापर्यन्तं भवेत् । यज्ञोपवीतदण्डाः अव्रणाः अक्षताः शोभनदर्शनाः सवत्कलाः अग्निदोषशून्याः भवेयुः । भिक्षाम् आहत्य प्रथमं गुरवे अर्पयेत् ततः गुरुणा दत्ता भिक्षा शुचिं कृत्वा भक्षितव्या । आयुषलाभार्थं प्राङ्मुखः, धनार्थं पश्चिमाभिमुखः, यशलाभार्थ दक्षिणाभिमुखः, सत्यफलार्थ उत्तराभिमुखः भोजनं कुर्यात् । द्विजः प्रतिदिनं आसनविधिम् अनुसृत्य भोजनं कुर्यात्,भोजनानन्तरं नासिकामुखादीन्द्रियाणि सम्यक् प्रक्षालयेत् ।

## ३.५. श्लोकानाम् असमीयासारांशः

মনুস্মৃতিৰ দ্বিতীয় অধ্যায়ত ত্রিবর্ণৰ উন্নয়ন সংস্কাৰ, তেওঁলোকৰ ভোজনৰ বিভিন্ন বিধি আদিৰ উল্লেখ কৰা হৈছে। মুঞ্জ আদি তৃণবিশেষৰ প্রাপ্তি নহ'লে ব্রাহ্মণে কুশ, ক্ষত্রিয়ই অশ্মনুক আৰু বৈশ্যই বল্বজৰ দ্বাৰা নির্মিত মেখেলা পৰিধান কৰিব লাগে। ব্রাহ্মণৰ যজ্ঞোপবীত কর্পাস, ক্ষত্রিয়ই শন,বৈশ্যৰ আবিকসৌত্রিকৰ হ'ব লাগে। ব্রাহ্মণে বিল্ব

অথবা পলাশ, ক্ষত্রিয়ই বট অথবা খাদিৰ, বৈশ্যই পৈলৰ অর্থাৎ আঁহত অথবা ঊদুম্বৰৰ পৰা নির্মিত দণ্ড নিয়মানুসৰি ধাৰণ কৰিব লাগে। ব্রাহ্মণৰ দণ্ড কেশপর্যন্ত , ৰজাৰ অর্থাৎ ক্ষত্রিয়ৰ দণ্ড ললাটপর্যন্ত আৰু বৈশ্যৰ দণ্ড নাকপর্যন্ত দৈর্ঘ্যৰ হ'ব লাগে । যজ্ঞোপবীত দণ্ড অবক্র, অক্ষত,সুদৃশ্য, অনুদ্বেগকাৰী,চর্মযুক্ত আৰু অগ্নিক দূষিত হৱ নোৱাৰা হৱ লাগে । ত্রিবর্গই অর্জন কৰা সামগ্রী প্রথমে গুৰুক নিবেদন কৰিব লাগে তাৰ পিছতহে গুৰুৰ দ্বাৰা প্রদত্ত ভিক্ষা শুচি কৰি খাব লাগে।আয়ুস প্রাপ্তি ৰ বাবে পূবফালে মুখ কৰি,ধন লাভ কৰিবৰ বাবে পশ্চিমফালে মুখ কৰি,সত্যৰ ফল লাভ কৰিবৰ বাবে উত্তৰফালে মুখ কৰি ভোজন কৰিব লাগে।দ্বিজই প্রতিদিনে আচমন বিধি পালন কৰি ভোজন কৰিব লাগে আৰু ভোজনৰ পিছত নাক, মুখ আদি ইন্দ্রিয় ভালদৰে প্রক্ষালন কৰিব লাগে ।

## ३.६ सन्धियुक्तशब्दानां सन्धिविच्छेदः

| श्लोकसंख्या | सन्धियुक्तशब्दः | सन्धिविच्छेदः |
|---|---|---|
| ४३ | कुशाशमन्तकबल्वजैः ग्रन्थिनैकेन | कुश+अश्मन्तक+ब्लवजैः ग्रन्थिना+ एकेन |
| ४४ | कर्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं | कर्पासम्+ उपवीतम्+स्यात्+ विप्रस्य+उर्ध्ववृतं |
| ४५ | दण्डानर्हति | दण्डान्+ अर्हन्ति |
| ४७ | स्युरव्रणाः सत्वचोऽनग्निदूषिताः | स्युः+ अव्रणाः सत्वचः+अनग्निदूषिताः |
| ४८ | प्रतिगृह्येप्सितं | प्रतिगृह्यं+ इप्सितं |
| ४९ | चरेद्भैक्षमुपनीतो | चरेद्+ भैक्षम्+ उपनीतः |
| ५० | नावमानयेत् | न+ अवमानयेत् |
| ५१ | यावदन्नममायया गुरवेऽश्नीयादाचम्य | यावत्+ अन्नम्+ अमायरा गुरुवे+ अश्नीयात्+ आचम्य |
| ५३ | नित्यमन्नमद्यात्समाहितः | नित्यम् अन्नम्+अद्यात्+समाहितः |
| | चोपस्पृशेत्सम्यगब्द्रिः | च+ उपस्पृशेत्+ सम्यक् अब्द्रिः |

## ३.७. केषांचन श्लोकानां व्याख्या:

**४६. केशान्तिको ब्राह्मणस्य दण्डः कार्यः प्रमाणतः ।**
**ललाटसंमितो राज्ञः स्यात्तु नासान्तिको विशः ।।**

श्लोकोऽयं मनुसंहितायाः द्वितीयोऽध्यायात् अवतरितोऽस्ति ।
अस्मिन् श्लोके त्रिवर्णानां यज्ञोपवीतदण्डस्य शास्त्रानुसारवर्णिता दीर्घता शास्त्रकारेण उल्लेखिता ।

त्रिवर्णानां उपनयनसंस्काराः तेषां यज्ञोपवीतदण्डानां दीर्घता मनुसंहितायाः द्वितीयोऽध्याये शास्त्रकारेण वर्णिताः। ब्राह्मणस्य दण्डः केशपर्यन्तं,राज्ञः अर्थात् क्षत्रियस्य दण्डः ललाटपर्यन्तं, वैश्यस्य दण्डः नासिका पर्यन्तं भवेत्। त्रिवर्णानां यज्ञोपवीतदण्डाः अव्रणा : अक्षताः शोभनदर्शनाः सवल्कलाः अग्निदोषशून्याः भवेयुः इति शास्त्रकारेण मनुना प्रतिपादिताः।

**८२. आयुष्यं प्रांमुखो भुंक्ते यशस्यं दक्षिणामुखः।**
**श्रियः प्रत्यंमुखो भुंक्ते ऋतं भुंक्ते द्युदंमुखः॥**

अयं श्लोकः मनुसंहितायाः द्वितीयोऽध्याये उपलभ्यते।

श्लोकेऽस्मिन् शास्त्रानुसारेण भोजनेन कीदृशं फलं भवति इति शास्त्रकारेण उल्लिखितम्।

मनुसंहितायाः द्वितीयोऽध्याये त्रिवर्णानाम् भोजनस्य विविधाः नियमाः वर्णिताः सन्ति। प्रथमतः त्रिवर्गेण भिक्षाम् आहत्य प्रथमं गुरुवे अर्पयेत् ततः गुरुणा दत्ता भिक्षा शुचिं कृत्वा भक्षितव्या। आयुषलाभार्थं प्रांमुखः, धनलाभार्थं पश्चिमाभिमुखः, यशलाभार्थं दक्षिणाभिमुखः, सत्यफललार्थं उत्तराभिमुखः भोजनं कुर्यात्। द्विजः प्रतिदिनं आचमनविधिं अनुसृत्य भोजनं कुर्यात्, भोजनानन्तरं नासिकामुखादीन्द्रियाणि सम्यक् प्रक्षालयेत्।

## ३.८ अध्यायात् किमवगतम्

- मनुस्मृतेः द्वितीयोऽध्याये त्रिवर्णानाम् उपनयनसंस्काराः वर्णिताः सन्ति।
- अस्मिन् अध्याये त्रिवर्णानां विविधाः उपनयनसंस्काराः तेषां भोजनस्य विधिविषये वर्णनं समुपलभ्यते।
- त्रिवर्णानां यज्ञोपवीतदण्डस्य दैर्घ्यस्य परिमाणों विविधम्। ब्राह्मणस्य दण्डः केशपर्यन्तं, क्षत्रियस्य ललाटपर्यन्तं, वैश्यस्य नासिका पर्यन्तं भवेत्।
- आयुषलाभार्थं प्रांमुखः ,धनार्थं पश्चिमाभिमुखः, यशलाभार्थं दक्षिणाभिमुखः ,सत्यफलार्थं उत्तराभिमुखः भोजनं कुर्यात्।

## ३.९ ज्ञानाधिक्यम्


- दवे,जयन्त कृष्णः (१९७२) मनुस्मृतिः,( मेघातिथि – स.र्वज्ञनारायण- कुल्लुक- राघवानन्द- नन्दन – रामचन्द्र – मणिराम – गोविन्दराज – भारुचि इति व्याख्यानवकेन समलंकृता), भारतीय विद्या भवनम्, मुम्बईः।
- नेने, गोपालशास्त्री,(१९७०), मनुस्मृतिः, चोखम्बा संस्कृत सीरीज आफिस, वाराणसी।

- शर्मा किरण:,(२००८) मनुसंहिता, चन्द्रप्रकाश गुवाहाटी।

## ⑦ ३.१० अभ्यासप्रश्नाः

**<u>लघुप्रश्नाः</u>**

**प्रश्नः१** धनं प्राप्तुं ब्रह्मचारी कस्यां दिशि भक्षयेत् ?

**प्रश्नः२** ब्राह्मणस्य यज्ञदण्ड : कियत् दीर्घः भवेत् ?

**<u>निबंधप्रश्नाः</u>**

**प्रश्नः१** मनुस्मृतेः द्वितीयः अध्यायानुसारं ब्रह्मचारिभ्यःमेखलाविधि विषये सविस्तरं लिखतः।

**प्रश्नः२** ब्रह्मचारिभ्यःभोजनविधि विषये सिखतः।

*****

# अध्यायः ४ मनुसंहिता (तृतीयोऽध्यायः, श्लोकाः ९९-१०७)

## अध्यायसंरचना

४.१ उद्देश्यम्

४.२ परिचयः

४.३ श्लोकानां मूलसंस्कृतपाठः , शब्दार्थः , व्याख्या , सरलव्याख्या , असमीयानुवादः

४.४ श्लोकानां संस्कृतसारांशः

४.५ केषांचन श्लोकानां व्याख्या:

४.६ सन्धियुक्तशब्दानां सन्धिविच्छेद:

४. ७ अध्यायस्य असमीयासारांशः

४. ८ अध्यायात् किमवगतम्

४. ९ ज्ञानाधिक्यम्

४.१० अभ्यासप्रश्नाः

## ४.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनेन भवन्तः –

- मनुसंहितायाः विहितपाठ्यक्रमस्य संस्कृतश्लोकान् ज्ञास्यन्ति।
- श्लोकानां मूलसंस्कृतपाठ – अन्वय – शब्दार्थ – व्याख्या – सरलव्याख्या – असमीयानुवादविषये अवगताः भवन्ति।
- श्लोकानां सारांशं प्राप्नुवन्ति।

## ४.२ परिचयः –

अस्मिन् अध्याये भवन्तः मनुसंहितायाः तृतीयोऽध्याये पञ्चमहायज्ञेषु अन्यतमस्य नृयज्ञस्य सम्यक् वर्णनं प्राप्स्यन्ति । अस्मिन् अध्याये विहितपाठ्यक्रमस्य मूलसंस्कृतपाठ – अन्वय – शब्दार्थ – व्याख्या – असमीयानुवाद– सारांशविषये ज्ञास्यन्ति।

**श्लोकसंख्या ९९**

संप्राप्ताय त्वतिथये प्रदद्यादासनोदके।

अन्नं चैव यथाशक्ति सत्कृत्य विधिपूर्वकम्॥

**अन्वयः -** संप्राप्ताय अतिथये तु विधिपूर्वकम् सत्कृत्य यथाशक्ति आसनोदके चैव अन्नं प्रदद्यात्।

**शब्दार्थः -** संप्राप्ताय - स्वयमुपस्थिताय

विधिपूर्वकम् - शास्त्रविहितम्

सत्कृत्य – परिचर्यां कृत्वा

यथाशक्ति – यथासम्भवम्

प्रदद्यात् - प्रदानं कुर्यात्

**व्याख्या -** स्वयमागताय त्वतिथये आसनं पादप्रक्षालनाद्युदकं यथासम्भवं व्यञ्जनादिभिः सत्कृतं चान्नम् 'आसनवसथौ' इत्यादि वक्ष्यमाणविधिपूर्वकं दद्यात्।

**असमीयानुवादः -** (গৃহস্থৰ ঘৰলৈ) আগমন কৰা অতিথিক শাস্ত্রবিহিত নিয়ম অনুসৰি পৰিচর্য্যা কৰি সামর্থ্য অনুসৰি আসন , পানী আৰু আহাৰ প্রদান কৰিব লাগে ।

**श्लोकसंख्या १००**

शिलानप्युञ्छतो नित्यं पञ्चाग्नीनपि जुह्वतः।

सर्वं सुकृतमादत्ते ब्राह्मणोऽनर्चितो वसन्॥

**अन्वयः-** शिलान् अपि उञ्छतो नित्यं पञ्चाग्नीन् अपि जुह्वतः ब्राह्मणः अनर्चितः वसन् सर्वं सुकृतम् आदत्ते।

**शब्दार्थः -** शिलान् - अवशिष्टधान्यं

उञ्चतः – उपादतः

जुह्वतः – होमं कुर्वतः

अनर्चितः - सत्कारविहीनः

आदत्ते - स्वीकुर्यात्

**व्याख्या -** लूनकेदारशेषधान्यानि शिलस्तानप्युच्चिन्वतो वृत्तिसंयमान्वितस्य , त्रेता , आवसथ्यः , सभ्यच्चेति पञ्चाग्नयः। सभ्यो नामाग्निः शीतापनोदाद्यर्थं यस्तत्र प्रणीयते। पञ्चष्वग्निषु होमं कुर्वाणस्यापि सर्वं वृत्तिसंकोचेन पञ्चाग्निहोमार्जितपुण्यमनर्चितोऽतिथिर्वसन्गृह्णाति। अनया च निन्दयातिथ्यर्चनस्य नित्यतावगमने।

**सरलव्याख्या –** शिलां शिलावृत्तिं उञ्छतः कुर्वतः। नित्यं पञ्चाग्नीञ्जुह्वतः बलिवैश्वदेवादीन्कुर्वतः एतादृशस्य गृहे अनर्चितः विप्रः रात्रौ वसन्सर्वं सुकृतं आदत्ते स्वीकुर्यात्।

**असमीयानुवादः-** শস্য আহৰণ কৰি জীৱন নির্বাহ কৰা আৰু সদায় পঞ্চাগ্নি হোম কৰা (গৃহস্থৰ) ঘৰত ব্রাহ্মণে সৎকাৰ অবিহনে থাকিলে , (সেই গৃহস্থৰ) সকলো পূণ্য অতিথিয়ে লৈ যায় ।

**श्लोकसंख्या १०१**

तृणानि भूमिरुदकं वाक्चतुर्थी च सुनृता।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन॥

**अन्वयः -** तृणानि भूमिः उदकं सुनृता वाक् चतुर्थी च एतानि अपि सतां गेहे कदाचन न उच्छिद्यन्ते।

**शब्दार्थः -** सुनृता वाक् – प्रियहितवचनम्
सतां- साधूनां
न उच्छिद्यन्ते - अवश्यं देयानि।

**व्याख्या -** अन्नासम्भवे पुनस्तृणविश्रामभूमिपादप्रक्षालनाद्यर्थजलप्रियवचनान्यपि धार्मिकगृहेष्वातित्यर्थं न कदाचिदुच्छिद्यन्ते अवश्यदेयानीति विधीयते। तृणग्रहणं शयनीयोपलक्षणार्थम्।

**असमीयानुवादः -** (শয়নৰ বাবে) তৃণ , (বহিবৰ বাবে) মাটি , (পাদপ্রক্ষালনৰ বাবে) পানী আৰু চতুর্থতে সত্য তথা প্রিয়বচন সাধুলোকৰ ঘৰত কেতিয়াও নাইকিয়া নহয় ।

**श्लोकसंख्या १०२**

एकरात्रं तु निवसन्नतिथिर्ब्राह्मणः स्मृतः।
अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते॥

**अन्वयः -** ब्राह्मणः एकरात्रं तु निवसन् अतिथिः स्मृतः यस्मात् हि अनित्यं स्थितः तस्मात् अतिथिः उच्यते।

**शब्दार्थः -** निवसन् – परगृहे वसन्
स्मृतः – अभिहितः

**व्याख्या -** एकरात्रमेव परगृहे निवसन्ब्राह्मणोऽतिथिर्भवति । अनित्यावस्थानान्न विद्यते द्वितीयातिथिरस्येत्यतिथिरुच्यते।

**असमीयानुवादः -** এৰাতিৰ বাবে (আনৰ গৃহত) থকা ব্রাহ্মণক অতিথিৰূপে আখ্যা দিয়া হয় , যিহেতু অনিত্যভাবে থাকে সেয়েহে তেওঁক অতিথি বুলি কোৱা হয় ।

**श्लोकसंख्या १०३**

नैकग्रामीणमतिथिं विप्रं साङ्गतिकं तथा।
उपस्थितं गृहे विद्याद्भार्या यत्राग्नयोऽपि वा॥

**अन्वयः -** यत्र भार्या अग्नयः अपि वा एकग्रामीणं तथा साङ्गतिकं विप्रं गृहे उपस्थितं अतिथिं न विद्यात्।

**शब्दार्थः -** एकग्रामीणं – एकग्रामवासिनं
विप्रं – ब्राह्मणं
न विद्यात् – न बोधितम्।

**व्याख्या -** एकग्रामनिवासिनं लोकेषु विचित्रपरिहासकथादिभिः संगत्या वृत्यर्थिनं भार्याग्नियुक्तो गृहे वैश्वदेवकालोपस्थितमपि नातिथिं विद्यात्। एतेन भार्याग्निरहितस्य प्रवासिनो नातिथित्वमितिबोधितम् ।

**श्लोकसंख्या १०४**

उपासते ये गृहस्थाः परपाकमबुद्धयः ।
तेन ते प्रेत्य पशुतां व्रजन्त्यभादिदायिनाम् ॥

**अन्वयः -** ये गृहस्थाः परपाकम् उपासते ते अबुद्धयः तेन प्रेत्य अन्नादिदायिनः पशुतां व्रजन्ति ।

**शब्दार्थः -** परपाकम् – परेषां पक्वान्नम्
अबुद्धयः – बुद्धिहीनाः
तेन – परान्नभोजनेन
प्रेत्य – जन्मान्तरे
व्रजन्ति – प्राप्नुवन्ति

**व्याख्या** - अतिथिप्रकरणादातिथ्यलोभेन ये गृहस्थाः ग्रामान्तराणि गत्वा परान्नं सेवन्ते ते निषिद्धपरान्नदोषानभिज्ञाः तेन परान्नभोजनेन जन्मान्तरे अन्नादिदायिनां पशुतां व्रजन्ति । तस्मादिदं न कुर्यादिति निषेधः कल्पते ।

**असमीयानुवादः** - যিসকল গৃহস্থই আনৰ (গৃহত) ভোজনাদি কৰে সেই বুদ্ধিহীনসকলে পৰান্ন ভোজনৰ দ্বাৰা মৃত্যুৰ পাছত অন্নদাতাৰ গৃহত পশুৰূপে জন্ম পায় ।

**श्लोकसंख्या १०५**

अप्रणोद्योऽतिथिः सायं सूर्योढो गृहमेधिना ।
काले प्राप्तस्त्वकाले वा नास्यानश्नन्गृहे वसेत् ॥

**अन्वयः -** गृहमेधिना सायं सूर्योढो अतिथिः अप्रणोद्यः काले प्राप्तः अकाले वा तु अस्य गृहे अनश्नन् न वसेत् ।

**शब्दार्थः -**
गृहमेधिना – गृहस्थेन
सूर्योढः - अस्तं गच्छता सूर्येण प्रापितः
अप्रणोद्यः – अप्रेषणीयः

**व्याख्या -** सूर्येऽस्तमिते गृहस्थेनातिथिर्न प्रत्याख्येयः । सूर्येणोढः प्रापितो रात्रौ स्वगृहगमनाशक्तेः । द्वितीयवैश्वदेवकाले प्राप्तः । अकाले वा सायंभोजने निवृत्तेऽपि नास्य गृहेऽतिथिरनश्नन्वसदेवश्यमस्मै भोजनं देयम् ।

प्रत्याख्याने प्रायश्चित्तगौरवार्थोऽयमारम्भः । अत एव विष्णुपुराणे 'दिवाऽतिथौ तु विमुखे गते यत्पातकं नृपः । तदेवाष्टगुणं प्रोक्तं सूर्योढे विमुखे गते ।' गोविन्दराजस्तु प्रतिषिद्धातिथिप्रतिप्रसवार्थत्वमस्याह ।

**सरलव्याख्या -** यस्मादयमादित्येनास्तं गच्छता प्रापितोऽतिथिः तदानीम्स्वगृहगमनाशक्तेः , सगृहमेधिना गृहानुष्ठेयपञ्चयज्ञवता गृहस्थेन न प्रत्याख्येयः । स च वैश्वदेवकाले प्राप्तः तदुत्तरकाले वा नास्य गृहस्थस्य अन्नमनश्नन् गृहे वसेत् ।

**असमीयानुवादः -** গৃহস্থই সন্ধ্যা সূর্য্য অস্ত যোৱাৰ পাছত অহা অতিথিক ঘূৰাই পঠিয়াব নালাগে , সময়তেই আহক বা অসময়তেই আহক অতিথিক ভোজন নকৰোৱাকৈ থাকিব নালাগে ।

**श्लोकसंख्या १०६**

न वै स्वयं तदश्नीयादतिथिं यन्न भोजयेत् ।
धन्यं यशस्यमायुष्यं स्वर्ग्यं वातिथिपूजनम् ॥

**अन्वयः -** यत् अतिथिं न भोजयेत् तत् वै स्वयं न अश्नीयात् अतिथिपूजनं धन्यं यशस्यम् आयुष्यं स्वर्ग्यं वा ।

**शब्दार्थः -** अश्नीयात् – भोक्तव्यम्

यशस्यम् - यशम्

**व्याख्या -** यद्धतदध्याद्युत्कृष्टमतिथिर्न प्रत्याचष्टे तत्तस्मै अदत्त्वा न स्वयं भोक्तव्यम् । धनाय हितं धनस्य निमित्तं वा धन्यम् । एवं यशस्यादयोऽपि शब्दाः । अतिथिभोजनफलकथनमिदम् । न चानावश्यकतापत्तिः । 'सर्वं सुकृतमादत्ते' इत्यादिदोषश्रवणात् ।

**सरलव्याख्या -** सूपघृतदधिशर्करादियदुत्कृष्टमन्नं तत् स्वयं नाश्नीयादतिथौ सन्निहिते यावद् तस्मै न दत्तम् । धनाय हितं धनस्य निमित्तं वा धन्यम् । एवं यशस्यादयः शब्दाः । अतिथिभोजनफलकथनमिदम् ।

**असमीयानुवादः -** যিটো বস্তু অতিথিক খুওৱা নহয় সেইটো নিজেও খোৱা অনুচিত । অতিথি সৎকাৰে ধন , যশ , আয়ুস আৰু স্বর্গ লাভ কৰায় ।

**श्लोकसंख्या १०७**

आसनावसथौ शय्यामनुव्रज्यामुपासनाम् ।
उत्तमेषूत्तमं कुर्याद्धीने हीनं समे समम् ॥

**अन्वयः -** आसनावसथौ शय्याम् अनुव्रज्याम् उपासनाम् उत्तमेषु उत्तमं , समे समं होने हीनं कुर्यात् ।

**शब्दार्थः -** आसनं – पीठं

आवसथः - विश्रामस्थानम्

अनुव्रज्याम् - अनुगमनम्

उपासनाम् – परिचर्याम्

**व्याख्या -** आसनं पीठं चर्म वा , आवसथो विश्रामस्थानम् , शय्या खट्वादि , अनुव्रज्या गच्छतोऽनुगमनम् , उपासना परिचर्या । एतत्सर्वं बहुष्वतिथिषु युगपदुपस्थितेष्वितरेतरापक्षेयोत्कृष्टापकृष्टमध्यमं कुर्यान्न पुनः सर्वेषां समम् ।

**অসমীয়ানুবাদঃ -** (বহুজন অতিথিৰ একেলগে আগমন হ'লে) আসন , বিশ্রামৰ স্থান , শয্যা , অনুগমন , পৰিচর্য্যা আদি উত্তম শ্রেণীৰ অতিথিক উত্তম ভাৱে , সমশ্রেণীৰ অতিথিক সমভাৱে আৰু হীনশ্রেণীৰ অতিথিক হীনভাৱে প্রদান কৰিব লাগে ।

## ४.४ श्लोकानां संस्कृतसारांशः -

मनुस्मृतेः तृतीयाध्याये अतिथिसत्कारस्य सुन्दरं वर्णनं उपलभ्यते । गृहागतस्य अतिथेः शास्त्रविहितनियमानुसारं परिचर्या कर्तव्या इति वर्णिताऽस्ति । गृहस्थः अतिथेः कृते आसनं , पादप्रक्षालनाय जलं, भोजनार्थं अन्नं च यथाशक्तिः प्रयच्छेत् । गृहस्थः सदैव ब्राह्मणातिथिं सन्मानयति । यदि कश्चनः ब्राह्मणः गृहस्थस्य गृहे आगत्य आतिथ्यं विना गन्तुं प्रवृत्तः भवति तर्हि अतिथिः गृहस्थस्य सर्वाणि पुण्यानि हरणं कृत्वा गच्छति । साधुगृहस्थानां गृहे अन्नाभावे सति चतुर्विधवस्तूनाम् अभावः कदापि न भवति - शयनार्थं तृणं , उपविष्टुं भूमिः , पादप्रक्षालनार्थं जलं चतुर्थं मधुरवचनञ्च । आतिथ्यस्य प्रसङ्गेऽपि मनुस्मृतौ उक्तं यत् यः ब्राह्मणः परगृहे रात्रौ तिष्ठति , सः अतिथिः इति मन्यते । परगृहे स्थायिरूपेण न वसति इति कारणात् अतिथिः इति उच्यते । परन्तु एकस्मिन् ग्रामे निवसन् ब्राह्मणः परगृहे भोजनं करोति चेत् सः अतिथिः न गण्यते । पुनश्च आतिथ्यार्थं परगृहेषु भोजनं कुर्वन्तः मूर्खाः परेभ्यः भोजनग्रहणपापे प्रवृत्ताः भवन्ति । मृत्योः पश्चात् ते अन्नदातृगृहेषु पशुरूपेण जायन्ते । सूर्यास्तस्य अनन्तरं यदि अतिथिः आगच्छति तर्हि सः पुनः न प्रेषितव्यः । अतिथिः समये आगतः वा असमये भोजनकरणं आवश्यकम् । आतिथ्येन गृहस्थः धन-यश–दीर्घायु–स्वर्गञ्च लाभं कर्तुं शक्नोति । यदा अनेके अतिथयः एकत्र आगच्छन्ति , तेषां परिचर्या भिन्नरूपेण कुर्यात्- उत्तमेषु उत्तमं , समे समं , हीने हीनम् ।

## ४.५ केषांचन श्लोकानां व्याख्या :

**श्लोकसंख्या ९९**

संप्राप्ताय त्वतिथये प्रदद्यादासनोदके ।
अन्नं चैव यथाशक्ति सत्कृत्य विधिपूर्वकम् ॥

श्लोकोऽयं मनुसंहितायाः तृतीयोऽध्यायात् उद्धृतोऽस्ति।

अस्मिन् श्लोके अतिथिसत्कारस्य विषये विधिपूर्वकं वर्णनमुपलभ्यते।

भारतीय संस्कृत्यानुसारं अतिथयः देवाः इति मन्तव्याः। तैत्तिरीयोपनिषदि 'अतिथिः देवो भव' इति उल्लिखितम्। गृहागतस्य अतिथेः शास्त्रविहितनियमानुसारं परिचर्या कर्तव्या। गृहस्थः अतिथेः कृते आसनं, पादप्रक्षालनाय जलं, भोजनार्थम् अन्नं च यथाशक्तिः प्रयच्छेत्। गृहस्थः सदैव ब्राह्मणातिथिं प्रति सन्मानं कुर्यात्। यदि कश्चनः ब्राह्मणः गृहस्थस्य गृहे आगत्य आतिथ्यं विना गन्तुं प्रवृत्तः भवति तर्हि अतिथिः गृहस्थस्य सर्वाणि पुण्यानि हरणं कृत्वा गच्छति। एवं यथाशक्तिः अतिथिपरिचर्यायाः व्यवस्थां गृहस्थेन करणीयम् इति प्रतिपाद्यते।

**श्लोकसंख्या १०१**

तृणानि भूमिरुदकं वाक्चतुर्थी च सुनृता।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन॥

उपर्युक्तः श्लोकोऽयं मनुसंहितायाः तृतीयोऽध्यायस्य अन्तर्गतोऽस्ति।

अन्नाभावे सति गृहस्थः कथं अतिथिसत्कारं कर्तुं शक्यते इति प्रसङ्गः श्लोकेऽस्मिन्वर्णितोऽस्ति।

गृहस्थाश्रमे गृहस्थस्य कृते पञ्चमहायज्ञाः शास्त्रे विहिताऽस्ति। एतेषु पञ्चमहायज्ञेषु एकोऽस्ति नृयज्ञः। नृयज्ञैव अस्ति अतिथिसत्कारम्। मनुः कथयति यत्कदाचित्यदि अतिथेः कृते अन्नस्य अभावः भवति तर्हि अन्यचतुर्भिः प्रकारैः अतिथिसत्कारं कर्तुं शक्यते। साधुगृहस्थानां गृहे अन्नाभावे सति चतुर्विधवस्तूनाम् अभावः कदापि न भवति – शयनार्थं तृणं, उपविष्टुं भुमिः, पादप्रक्षालनार्थं जलं मधुरवचनञ्च। एतैः चतुर्भिः प्रकारैः गृहस्थः अतिथिपरिचर्यां कर्तुं शक्नोति।

**श्लोकसंख्या १०६**

न वै स्वयं तदश्नीयादतिथिं यन्न भोजयेत्।
धन्यं यशस्यमायुष्यं स्वर्ग्यं वातिथिपूजनम्॥

श्लोकोऽयं मनुसंहितायाः तृतीयोऽध्यायात् उद्धृतोऽस्ति।

श्लोकेऽस्मिन् अतिथिपूजनस्य फलविषये वर्णनम् अस्ति।

गृहागतस्य अतिथेः शास्त्रविहितनियमानुसारं परिचर्या कर्तव्या इति मनुः कथयति। अतिथिः समये आगतः वा असमये, भोजनकरणं आवश्यकम्। यदि कश्चनः ब्राह्मणः गृहस्थस्य गृहे आगत्य आतिथ्यं विना गन्तुं प्रवृत्तः भवति तर्हि अतिथिः गृहस्थस्य सर्वाणि पुण्यानि हरणं कृत्वा गच्छति। आतिथ्येन गृहस्थः धन-यश-दीर्घायुञ्च लाभं कर्तुं शक्नोति।

## ४.६ सन्धियुक्तशब्दानां सन्धिविच्छेदः

| श्लोकसंख्या | सन्धियुक्तशब्दः | सन्धिविच्छेदः |
|---|---|---|
| ९९ | त्वतिथये | तु + अतिथये |
| | प्रदद्यादासनोदके | प्रदद्यात् + आसनोदके |
| १०० | शिलानप्युञ्छतो | शिलान् + अपि + उञ्छतः |
| | पञ्चाग्नीनपि | पञ्चाग्नीन् + अपि |
| | ब्राह्मणोऽनर्चितो | ब्राह्मणः + अनर्चितः |
| १०१ | वाक्चतुर्थी | वाक् + चतुर्थी |
| | एतान्यपि | एतानि + अपि |
| | नोच्छिद्यन्ते | न + उच्छिद्यन्ते |
| १०२ | निवसन्नतिथिर्ब्राह्मणः | निवसन् + अतिथिः + ब्राह्मणः |
| | यस्मात्तस्मादतिथिरुच्यते | यस्मात् + तस्मात् + अतिथिः + उच्यते |
| १०३ | यत्राग्नयोऽपि | यत्र + अग्नयः + अपि |
| १०४ | परपाकमबुद्धयः | परपाकम् + अबुद्धयः |
| १०५ | अप्रणोद्योऽतिथिः | अप्रणोद्यः + अतिथिः |
| | नास्यानश्नन्गृहे | न + अस्य + अनश्नन् + गृहे |
| १०६ | तदश्नीयादतिथिं | तत् + अश्नीयात् + अतिथिं |
| | यशस्यमायुस्यं | यशस्यम् + आयुष्यं |
| | वातिथिपूजनम् | वा + अतिथिपूजनम् |
| १०७ | शय्यामनुव्रज्यामुपासनाम् | शय्याम् + अनुव्रज्याम् + उपासनाम् |
| | उत्तमेषूत्तमं | उत्तमेषु + उत्तमं |
| | कुर्याद्धीने | कुर्यात् + हीने |

## ⏲४.७ अध्यायस्य असमीयासारांशः -

মনুস্মৃতিৰ তৃতীয় অধ্যায়ত অতিথি সৎকাৰৰ এটি সুন্দৰ বর্ণনা পোৱা যায় । গৃহস্থৰ ঘৰলৈ অহা অতিথিক সদায় শাস্ত্ৰৰ বিধান অনুসৰি সৎকাৰ বা পৰিচর্যা কৰিব লাগে । নিজৰ সামর্থ্য অনুসৰি গৃহস্থই অতিথিক বহিবলৈ আসন , ভৰি ধুবলৈ পানী আৰু ভোজনৰ বাবে আহাৰ প্রদান কৰিব লাগে । গৃহস্থৰ ঘৰলৈ অহা অতিথি সৎকাৰ অবিহনে আঁতৰি যাব লগা হলে তেওঁ গৃহস্থৰ সকলো পুণ্য লৈ আঁতৰি যায় । সাধুলোকৰ ঘৰত অতিথি পৰিচর্যাৰ

বাবে ভোজনৰ ব্যৱস্থা নাথাকিলেও আন চাৰিপ্ৰকাৰৰ বস্তুৰ কেতিয়াও অভাৱ নহয় । সেই সমূহ হ'ল – শয়নৰ বাবে তৃণ , বহিবৰ বাবে ভূমি , পাদপ্ৰক্ষালনৰ বাবে পানী আৰু চতুৰ্থতে মধুৰ বচন । আনৰ গৃহত এৰাতি থকা ব্ৰাহ্মণক অতিথি বুলি অভিহিত কৰা হয় । অতিথি বুলি এই কাৰণেই কোৱা হয় কাৰণ তেওঁ স্থায়ীভাৱে কোনো গৃহত নাথাকে । কিন্তু একে গাঁৱতে বাস কৰা ব্ৰাহ্মণ এজন যদি আনৰ গৃহত উপস্থিত হয় , তেন্তে তেওঁক অতিথি বুলি বিবেচনা কৰা নহয় । যিয়ে আতিথ্যৰ বাবে আনৰ ঘৰত ভোজনাদি কৰে , সেই সকল বুদ্ধিহীন অন্নদাতাজনৰ ঘৰত মৃত্যুৰ পাছত পশুৰূপে জন্ম লয় । সূৰ্যাস্তৰ পাছত যদি কোনো অতিথিৰ আগমন ঘটে তেনে অতিথিক ঘূৰাই পঠোৱা অনুচিত । অতিথিৰ আগমন সময়তেই হওঁক বা অসময়তেই হওঁক তেওঁক ভোজন কৰোৱাটো আৱশ্যক । অতিথি সৎকাৰৰ জৰিয়তে গৃহস্থই ধন , যশ , আয়ুস আৰু স্বৰ্গ লাভ কৰে । কেইবাজনো অতিথিৰ আগমন হ'লে শ্ৰেণী অনুসৰি পৰিচৰ্যা কৰিব লাগে । উত্তম শ্ৰেণীৰ অতিথিক উত্তম , সমশ্ৰেণীৰ অতিথিক সমভাৱে আৰু হীনশ্ৰেণীৰ অতিথিক হীনভাৱে পৰিচৰ্যা কৰিব লাগে ।

## ৪.৮ अध्यायात् किमवगतम्

- मनुस्मृतेः तृतीयोऽध्याये अतिथिसत्कारस्य शास्त्रविहितनियमाः वर्णिताः सन्ति।
- गृहस्थः अतिथेः कृते आसनं , पादप्रक्षालनाय जलं , भोजनार्थम् अन्नं च यथाशक्तिः प्रयच्छेत्।
- यः ब्राह्मणः परगृहे रात्रौ तिष्ठति , सः अतिथिः इति मन्यते । परन्तु एकस्मिन् ग्रामे निवसन् ब्राह्मणः परगृहे भोजनं करोति चेत् सः अतिथि न गण्यते।
- आतिथ्येन गृहस्थः धन-यश-दीर्घायु-स्वर्गञ्च लाभं कर्तुं शक्नोति।

## ४.९ ज्ञानाधिक्यम्


- दवे , जयन्त कृष्णः (१९७२) , मनुस्मृतिः , (मेधातिथि-सर्वज्ञनारायण-कुल्लुक-राघवानन्द-नन्दन-रामचन्द्र-मणिराम-गोविन्दराज-भारुचि इति व्याख्यानवकेन समलंकृता) , भारतीयविद्या भवनम् , मुम्बईः।
- नेने , गोपालशास्त्री , (१९७०) , मनुस्मृतिः , चौखम्बा संस्कृत सीरीज आफिस , वाराणसी।
- शर्मा , किरणः , (२००८) मनुसंहिता , चन्द्रप्रकाशः , गुवाहाटी।


## ४.१० अभ्यासप्रश्नाः

**लघुप्रश्नाः**

प्रश्नः१ साधुगृहस्थानां गृहे केषां वस्तूनाम् अभावः कदापि न भवति ?

प्रश्नः २ 'अतिथि' इति शब्देन को बोध्यते ?

**निबन्धप्रश्नः**

प्रश्नः१ अतिथिसत्कारविषये मनुसंहितायाः तृतीयाध्याये कीदृशं वर्णनमुपलभ्यते ? विशदतया लिख्यताम्।

*****

# अध्याय:५ मनुसंहिता (सप्तमोऽध्यायः, श्लोकाः १-१३)

## अध्यायसंरचना:

५.१.उद्देश्यम्

५.२.परिचयः

५.३.श्लोकानांमूलसंस्कृतपाठ: अन्वय: , शब्दार्थः, व्याख्या, सरलव्याख्या, असमीयानुवाद:

५.४ श्लोकानां संस्कृत सारांश:

५.५ केषांचन श्लोकानां व्याख्या:

५.६ सन्धियुक्तशब्दानां सन्धिविच्छेद:

५.७ अध्यायस्य असमीयासारांश:

५.८. अध्यायात् किमवगतम्

५.९. ज्ञानाधिक्यम्

५.१०. अभ्यासप्रश्नाः

## ५.१.उद्देश्यम्

- अस्य अध्यायस्य अध्ययनेन मनुस्मृतेः सप्तमोऽध्यायस्य प्रथमश्लोकत: त्रयोदशश्लोकपर्यन्तं संस्कृतपाठान् ज्ञास्यन्ति।
- श्लोकानां मूलसंस्कृतपाठ - अन्वय - शब्दार्थ --व्याख्या-सरलव्याख्या - असमीयानुवादविषये अवगताः भवन्ति।
- श्लोकानां सारांशं प्राप्नुवन्ति।

## ५.२ परिचयः

मनुस्मृतेः सप्तमोऽध्यायः अतीव महत्त्वपूर्णः अस्ति । सप्तमोऽध्याये राजधर्मस्य आलोचना विस्तृतपूर्णतया कृता अस्ति । अस्मिन् अध्याये भवन्तः मनुस्मृतेः सप्तमोऽध्यायस्य प्रथमत्रयोदशश्लोकानां मूलसंस्कृतपाठ- अन्वय - शब्दार्श - व्याख्या - असमीयानुवाद सारांशविषये ज्ञास्यन्ति।

## ५.३ श्लोकानां मूलसंस्कृतपाठः अन्वय :, शब्दार्थः, व्याख्या, सरलव्याख्या, असमीयानुवादः

श्लोकसंख्या १

राजधर्मान्प्रवक्ष्यामि प्रभावृतो भवेन्नृपः ।
संभवश्च यथा तस्य सिद्धिश्च परमा यथा ।।

अन्वय:

राजधर्मान् प्रवक्ष्यामि यथावृत्तः नृषः भवेत् च तस्य यथा सम्भवः च यथा परमा सिद्धिः।

शब्दार्थ :

राजधर्मान् - राज्ञः कर्तव्यानि
प्रवक्ष्यामि- वक्ष्यामि
यथावृत्त:-यथाचार
परमा सिद्धिः - दृष्टादृष्टफलसंपत्तिः

व्याख्या:

धर्मशब्दोऽत्र दृष्टादृष्टार्थानुष्ठेयपर: षाड्गुण्यादेरपि, वक्ष्यमाणत्त्वात् । राजशब्दोऽपि नात्र क्षत्रियजातिवचन: किंत्वभिषिक्तजनपदपुरपालयितृपुरुषवचनः । अतएवाह 'यशावृतो भवेन्नृपः' इति । यथावदाचारो नृपतिर्भवे तथा तस्मानुष्ठेयानि कथयिष्यामि । यथा येन प्रकारेण वा 'राजानमसृजत्प्रभुः' (अ० ७ श्लोक ३) इत्यादिना तस्योत्पत्तिः यथां च दृरादृष्टफलसंपत्तिः तदपि वक्ष्यामि ।

सरलब्याख्या:

राजधर्मानाह राजधर्मानिति । यथावृत्तः यथाचारः नृपो भवेत् तस्य राज्ञः यथासम्भवः सृष्ट्यादौ जन्म तस्य यथा सिद्धिः कार्यसिद्धिः एतादृशान् वक्ष्यमाणलक्षणान् राजधर्मान् प्रवक्ष्यामि।

असमीयानुवादः

ৰজাৰ আচাৰ, উৎপত্তি আৰু ইহলোক -পৰলোকত সফলতা তথা সিদ্ধিলাভৰ বাবে যি ৰাজধর্ম, সেই বিষয়ে সম্যকৰূপে ক'ম ।

श्लोकसंख्या २:

ब्राह्मं प्राप्तेन संस्कारं क्षत्रियेण यथाविधि।
सर्वस्यास्य यशान्यायं कर्तव्यं परिरक्षणम्॥

अन्वयः

ब्राह्मं संस्कारं यथाविधि प्राप्तेन क्षत्रियेण अस्य सर्वस्य परिरक्षणम् यथान्यायं कर्तव्यम्।

शब्दार्थः

ब्राह्मसंस्कार- उपनयनादिसंस्कारं
यथाविधि - यथाशास्त्रं
परिरक्षणम् - रक्षणावेक्षणम्

व्याख्या:

ब्रह्म वेदस्तत्प्राप्त्यर्थतयोपनयनसंस्कारस्तं यथाशास्त्रं प्राप्नुवता क्षत्रियेणास्य सर्वस्य स्वविषयावस्थितस्य शास्त्रानुसारेण निगमतो रक्षणं कर्तव्यम्। एतेन क्षत्रिय एव नान्यो राज्याधिकारीति दर्शितम्। अतएव शास्त्रार्थततत्वं क्षत्रियस्य जीवनार्थं, तथा क्षत्रियस्य तु रक्षणं स्वकर्मसु श्रेष्ठं च वक्षति, ब्राह्मणस्य ह्यापदि"जीवेत्क्षत्रिमधर्मेण" इत्यभिधास्यति। वैश्यस्यापि क्षत्रियधर्मं, शूद्रस्य च क्षत्रियवैश्वकर्मणी जीवनार्थमापदि जगाद नारद: 'न कथंचन कुर्वीत ब्राह्मणः कर्म वार्षलम्। वृपलः कर्म च ब्राह्मं पतनीये हि ते तयोः। उत्कृष्टं चापकृष्टं च तयोः कर्म न विद्यते। मध्यमे कर्मणी हित्वा सर्वसाधारणे हि ते। रक्षणं वेदधर्मार्थं तपः क्षत्रस्य रक्षणम् 'इति।" सर्वतो धर्मषड्भागो राज्ञो भवति रक्षतः (अ. ८ श्लो. ३०४) इति च वक्षमाणत्वाद्रक्षितुर्बलिषड्भागग्रहणादृष्टार्थमपि "योऽरक्षन्बलिमादत्ते" (अ.८ श्ले, ३०७) इति नरकपातं वक्ष्यति।

सरलव्याख्या:

ब्राह्मं संस्कारं उपनयनादिसंस्कारान् प्राप्तेन क्षत्रियेण यथाविधि अस्य सर्वस्य जगतः परिरक्षणं कर्तव्यम्।

असमीयानुबाद:

ক্ষত্রিয়ই যথাবিধি উপনয়ন সংস্কাৰমুক্ত হৈ ন্যায়্যানুসাৰে (নিজৰ ৰাজ্যত বাস কৰা) সমূহ প্রজাক ৰক্ষা কৰিব।

श्लोकसंख्या: ३

अराजके हि लोकेऽस्मिन् सर्वतो विद्रुते भयात् ।
रक्षार्थमस्य सर्वस्य राजानमसृजत्प्रभुः ॥

अन्त्वयः

हि अराजके अस्मिन् लोके सर्वतः भयात् विद्रुते अस्य सर्वस्य रक्षार्थम् प्रभुः राजानम् असृजन् ।

शब्दार्थ:

विद्रुते – विचलिते
असृजत् - सृष्टवान्

व्याख्या:

यस्मादराजके जगति बलवद्भयात्सर्वतः प्रचलिते सर्वस्यास्य चराचरस्य रक्षायै राजानं सृष्टवांस्तस्मात्तेन रक्षणं कार्यम् ।

सरलव्याख्या:

अविदयमानराजके अस्मिन् जगति भयात् सर्वतो विद्रुते पीडिते सति अस्य विश्वस्य रक्षार्थं प्रभू प्रजापतिः राजानम् असृजत् सृष्टवान् ।

असमीयानुवाद :

ৰজাবিহীন এই জগতত চাৰিওফালে ভয়ৰ বাবে সকলোৱে পলাই ফুৰাত এই সকলোবোৰৰ (সমাজ আক ৰাজ্যৰ) ৰক্ষাৰ বাবে ঈশ্বৰে ৰজাৰ সৃষ্টি কৰিছিল ।

श्लोक संख्या ४:

इन्द्रानिलयमाकार्णामग्नेश्च वरुणस्य च ।
चन्द्रवित्तेशयोश्चैव मात्रा निहत्य शाश्वतीः ॥

अन्वय:

इन्द्रानिलयमार्काणाम् अग्नेः च वरुणस्य च चन्द्रवित्तेशयो: चैव शाश्वतीः मात्रा निहृत्य ।

शब्दार्थ:

मात्रा - अंशान्

निहत्य - निष्कृष्ण

व्याख्या:

इन्द्रवातयमसूर्याग्निवरुणचन्द्रकुबेराणां मात्रा अंशान्सारभूतानाकृष्य राजानमसृजत्।

सरलव्याख्या:

इन्द्रानिलयमार्काणामिति इन्द्रवामुयमादित्याग्निवरुणचन्द्रकुबेराणां अंशान् सारभूतान् निष्कृष्य राजानम् असृजत्।

असमीयानुबादः

(ঈশ্বৰে) ইন্দ্ৰ, বায়ু,যম, সূৰ্য্য, অগ্নি, বৰুণ, চন্দ্ৰ আৰু কুবেৰৰ সাৰভূত অংশ লৈ ৰজাৰ সৃষ্টি কৰিছিল ।

श्लोकसंख्या: ५

यस्मादेषां सुरेन्द्राणां मात्रांभ्यो निर्मितो नृपः।
तस्मादभिभवत्येष सर्वभूताति तेजसा॥

अन्वय:

यस्मात् एषां सुरेन्द्राणां मात्राभ्यो नृपः निर्मितः तस्मात् एषः सर्वभूतानि तेजसा अभिभवति।

शब्दार्थ:

सुरेन्द्राणां - देवश्रेष्ठानाम्

मात्राभ्य- अंशेभ्य:

सर्वभूतानि- सर्वप्राणिनः

तेजसा --- वीर्येण

अभिभवति - अधीकरोति

व्याख्या:

यस्मादिन्द्रादीनां देवश्रेष्ठानामंशेभ्यो नृपतिः सृष्टस्तस्मादेव सर्वप्राणिनो वीर्येणातिशेते।

सरलव्याख्या:

यस्मात् कारणात् एषां सुरेन्द्राणां देवश्रेष्ठानाम् अंशेभ्यो निर्मितो नृपः तस्मात्कारणात् तेजसा सर्वभूतानि सर्वप्राणिनो अभिभवति वीर्येण अधीकरोति।

असमीयानुवाद:

যিহেতু এই শ্রেষ্ঠ দেৱতাসকলৰ অংশৰে ৰজাৰ সৃষ্টি কৰা হয় সেয়ে এই ৰজাই সকলো প্রাণীক শক্তিৰে বশীভূত কৰে ।

श्लोकसंख्या ६

तपत्यादित्यवच्चैष चक्षुंषि च मनांसि च।
न चैनं भुवि शक्नोति कश्चिदप्यभिवीक्षितुम्॥

अन्वयः

आदित्यवत् एषः चक्षूंषि मनांसि च तपति। भूवि एनं कश्चिदपि अभिवीक्षितुं न शक्नोति।

शब्दार्थः

आदित्यवत् - सूर्यइव
भूवि - पृथिव्याम्
अभिवीक्षितुं- आभिमुख्येना द्रष्टुम्,
न शक्नोति – न समर्थः भवति।

व्याख्या:

अयं च राजा स्वतेजसा सूर्य इव पश्यतां चक्षुंषि मनांसि च संतापयति, न चैनं राजानं पृथिव्यां कंश्चिदण्याभिमुख्येन द्रष्टुं क्षमते।

सरलव्याख्या:

एष च राजा पश्यतां स्ववीर्येण चक्षुंषि मनांसि च आदित्यवत् संतापयति, न चैनं राजानं वीर्येण अतिशययोगात् कश्चिदपि पृथियव्याम आभिमुख्येन वीक्षितुं द्रष्टुं शक्नोति क्षमते।

असमीयानुवाद:

সূর্য্যৰ নিচিনাকৈ এই ৰজাই (দ্রষ্টাৰ) চকু আৰু মন তপ্ত কৰি ৰাখে, (সেয়েহে) পৃথিৱীত এওঁক কোনেও প্রত্যক্ষভাৱে দর্শন কৰিবলৈ সমর্থ নহয়।

श्लोकसंख्या: ७

सोऽग्निर्भवति वायुश्च सोऽर्कः सोमः स धर्मराट्।
स कुबेरः स वरुणः स महेन्द्रः प्रभावतः॥

अन्वय:

सः प्रभावतः अग्निः च वायुः सः अर्कः सोमः सः धर्मराट् सः कुबेरः सः वरुणः सः महेन्द्रः भवति।

शब्दार्थ: प्रभावतः------ शक्तितः
अर्कः -------सूर्यः
धर्मराट्:------यमः
महेन्द्रः ------ इन्द्रः

व्याख्या:

एवं चाग्न्यादीनां पूर्वोक्तांशभवत्त्वात्तत्कर्मकारित्वाच्च प्रताप उक्तस्तेजस्वीत्यादिना नवमाध्याये वक्षमाणत्वात् स राजा शक्यतिशयेनाग्न्यादिरूपो भवति।

सरलयाख्या:

आदित्यतुल्यव्यापारकरणात् असौ अलौकिकशक्तियोगेन तासु क्रियासु राजाग्निवास्वादित्यचन्द्रयमकुबेरवरुणतुल्यो भवति।

असमीयानुवाद:

তেওঁ (ৰজা) শক্তিৰ বাবে অগ্নি, বায়ু, সূর্য্য, চন্দ্র, যম, কুবেৰ, বৰুণ আৰু মহেন্দ্রৰ দৰে হ'য়।

श्लोकसंख्या :८

वालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः ।
महती देवता ह्योषा नररूपेण तिष्ठति ॥

अन्वयः

भूमिपः बालोऽपि मनुष्य इति न अवमन्तव्यः हि नररूपेण एषा महती देवता तिष्ठतिः ।

शब्दार्थ: भूमिपः --- राजा
न अवमन्तव्य: ---- न अवज्ञेयः

व्याख्या:

ततश्च मनुष्य इति बुद्धा बालोऽपि राजा नावमन्तव्य: । यस्मान्महतीयं काचिद्देवता मानुषरूपेणावतिष्ठते एतेन देवतावज्ञायामधर्मादयो अदृष्टदोषा उक्ताः ।

सरलव्याख्या:

भूपतिः बालोऽपि मनुष्यबुद्धा नावज्ञेयो यस्मात् महतीयं काचित् देवता मनुष्यरूपेण अवतिष्ठते आस्ते।

असमीयानुवाद :

ৰজা এজন বালক অথবা সৰু-ল'ৰা হ'লেও সাধাৰণ মানুহ বুলি জ্ঞান কৰি অৱজ্ঞা কৰা অনুচিত, কিয়নো মানৱৰূপত এওঁ মহান দেৱতাহে অৱস্থান কৰে ।

श्लोकसंख्या ९

एकमेव दहत्यग्निर्नरं दुरुपसर्पिणम् ।
कुलं दहति राजाग्निः सपशुद्रव्यसंचयम् ॥

अन्वयः

अग्निः दुरुपसर्पिणम् एकं नरम् एव दहति राजाग्निः सपशुद्रव्यसंचयं कुलं दहति।

शब्दार्थः

दुरुपसर्पिणम् - दुःखार्थं समीपयामिनम्।

व्याख्या :

योऽग्नेरतिसमीपमनवहितः सन्नुपसर्पति तं दुरुपसर्पिणमेकमेवाग्निर्दहति न तत्पुत्रादिकम्। क्रुद्धो राजाग्निः पुत्रदारभ्रात्रादिरूपं कुलमेव गवाश्वादिपशुसुवर्णादिधनसंचयसहितं सापराधं निहन्ति।

सरलव्याख्या:

यः अग्नेः अतिसमीपं गच्छति, अग्निं हस्तादिना स्पृशति, स दुरुपसर्पी नरः दह्यते किन्तु राजाग्निः पशुधनसमूहसहितं अपराधिसम्बन्धिबन्धुवर्गमपि नाशयति।

অসমীয়ানুবাদ :

অগ্নিয়ে কেৱল অসাৱধানতাবশতঃ ওচৰলৈ যোৱাজনকহে দহন কৰে, (কিন্তু ৰাজাগ্নিয়ে সম্পূর্ণ পশুসম্পত্তিসহিত বংশকো দহন কৰে ।

श्लोकसंख्या १०:

कार्यं सोऽवेक्ष शक्तिं च देशकालौ च तत्त्वत:।
कुरुते धर्मसिद्धर्थं विश्वरूपं पुनः पुनः॥

अन्वय:

सः कार्यं शक्तिं च देशकालौ तत्वत: अवेक्ष्य धर्मसिद्धार्थम् पुनः पुनः विश्वरूपं कुरुते।

शब्दार्थः अवेक्ष्य - निरुप्य

धर्मसिद्ध्यर्थाम् - कार्य सिद्ध्यर्थम्

व्याख्या:

स राजा प्रयोजनापेक्षया स्वशक्तिं देशकालौ चावेक्ष्य कार्यसिद्ध्यर्थं तत्वतो विश्वरूपं बहूनि रुपाणि करोति। जातिविवक्षया बहुब्वेकवचनम्। अशक्तिदशायां क्षमते शक्तिं प्राप्योन्मूलयति, एवमेकस्मिन्नपि देशे काले च प्रयोजनानुरोधेन शत्रुर्वा मित्रं वा उदासीनो वा भवति अतो राजवल्लभोऽहमिति बुद्ध्या नावज्ञेयः।

सरलव्याख्या:

स राजा प्रयोजनानुसारेण सशक्तिं देशकालौ चावेक्ष्य कार्यं सिद्ध्यर्थं तत्त्वतो विश्वरूपं बहुनि रुपाणि करोति। एवम् एकस्मिन् देशे काले च प्रयोजनानुरोधेन शत्रुः वा मित्रं वा उदासीनो भवति।

असमीयानुवाद :

ৰজাই প্রয়োজন অনুসৰি কার্য্য, তথা শক্তিৰ ভালদৰে বিচাৰ কৰি ধর্মৰ সিদ্ধি (কার্যৰ সিদ্ধি) ৰ বাবে বাৰে বাৰে নানা ৰূপ ধাৰণ কৰে। (অর্থাৎ প্রয়োজন অনুসৰি শত্রু, মিত্র, তথা উদাসীন ৰূপ ধাৰণ কৰে।)

श्लोकसंख्या ११

यस्य प्रसादे पद्मा श्रीर्विकयश्च पराक्रमे।
मृत्युश्च वसति क्रोधे सर्वतेजोमयो: हि सः॥

अन्वयः

यस्य प्रसादे पद्मा श्रीः च पराक्रमे विजय: च क्रोधे मृत्युः वसति सः हि सर्वतेजोमयः।

शब्दार्थ:

प्रसादे - -----अनुग्रहविषये
पद्मा श्री:----- महती श्रीः
सर्वतेजोमय:------ सर्वशक्तिमान्

व्याख्या:

पद्माशब्द : श्रीपर्यायोऽपि महत्वविवक्षयाऽन्न प्रयुक्त:। यस्य प्रसादान्महती श्रीर्शवति, अतः श्रीकामेन सेव्य:। यस्य शत्रवः सन्ति तानपि सन्तोषितो हन्ति, तेन च शत्रुवध कामेनाप्याराधनीयः। यस्मै क्रुध्यति तस्य मृत्युं करोति, तस्माज्जीवनार्थिना न क्रोधनीयः। यस्मात्सर्वेषां सूर्याग्निसोमादीनां तेजो विभति।

सरलव्याख्या :

तस्य प्रसादे अनुग्रहविषये श्रीः वंसति लक्ष्मी वसति महती श्रियं ददाति पराक्रमे शत्रुं प्रतिगमने विजयः तत्सम्भावना तदवमानात् तत्क्रोधानन्तरं प्रजामृत्युदर्शनान्मृत्युः सर्वतेजोमयः सर्वदेवताशक्तिमयः ।

असमीयानुवाद : যাৰ অনুগ্রহত বিপুল সম্পত্তি, পৰাক্রমত বিজয় আৰু ক্রোধত মৃত্যুৱে বাস কৰে তেওঁ নিশ্চিতভাবে সর্বশক্তিমান ।

श्लोकसंख्या १२

तं यस्तु द्वेष्टि संमोहात्स  विनश्यत्यसंशयम् ।
तस्य व्याशु विनाशाय राजा प्रकुरुते मनः ।।

अन्वयः

य:तं सम्मोहात्  द्वेष्टि सः असंशयं विनश्यति तस्य हि आशु विनाशाय राजा मनः प्रकुरुते ।

शब्दार्थ:

सम्मोहात् ---- अज्ञतया
द्वेष्टि---- द्वेषं करोति
आशु --- शीघ्रम्
प्रकुरुते - संकल्पयति

व्याख्या:

तं राजानमज्ञतया यो द्वेष्टि तस्याप्रीतिमुत्पादयति स निश्चितं राजक्रोधान्नश्यति । यस्मात्तस्य विनाशाय शीघ्रं राजा मनो नियुङ्क्ते ।

सरलव्याख्या:

यो मनुष्य: तद्वीर्यातिशयानभिज्ञतया तस्य प्रतिपक्षी भवति स निःसंशयं विनश्यति यस्मात् तस्य समनन्तरं विनाशार्थं राजा मनः संकल्पयति ।

असमीयानुवाद:

যি ব্যক্তিয়ে অজ্ঞানতাবশতঃ ৰজাক দ্বেষ কৰে, তেওঁ নিশ্চিতভাবে বিনাশ প্রাপ্ত হ'য় । তেওঁৰ (সেই ব্যক্তিৰ) শীঘ্র বিনাশৰ বাবে ৰজাই মনক সংকল্পবদ্ধ কৰে ।

श्लोकसंख्या: १३

तस्माद्धर्मं यभिष्टेषु स व्यवस्येन्नराधिपः ।
अनिष्टं चाप्यनिष्टेषु तं धर्मं न विचालयेत् ॥

अन्वय:

तस्मात् सः नराधिपः यं धर्मम् इष्टेषु व्यवस्येत् च अनिष्टेषु अपि अनिष्टं तं धर्मं न विचालयेत् ।

शब्दार्थ :

व्यवस्थेत - निश्चिनोत्ति
अनिष्टम् - निषिद्धम्
न विचालयेत्- न अतिक्रामेत्

व्याख्या :

यतः सर्वतेजोमयो नृपत्तिस्तस्मादपेक्षितेषु यमिष्टं शास्त्रानुष्टेयं शास्त्राविरुद्धं निश्चित्य व्यवस्थापयत्यनपेक्षितेषु चानिष्टम् , तं नियमं नातिक्रामेत् ।

सरलव्याख्या:

तस्मात्कारणात् इष्टेषु क्षुद्रेषु यं धर्मं स नराधिपः व्यवस्येत निश्चिनोति च पुनः अनिष्टं अयोग्यं अनिष्टेषु अच्छिद्रेषु अनिन्दयेषु तं धर्मं न विचारयेत् ।

असमीयानुवाद: গতিকে সেই ৰজাই শাস্ত্রানুসাৰে ইষ্ট আৰু অনিষ্টবিষয়ক যি ধর্মব্যৱস্থা কৰে তাক কোনেও উলংঘন কৰ উচিত নহয় ।

## ५.४ श्लोकानां संस्कृतसारांशः

उपनयनादिसंस्कारयुक्तेन क्षत्रियेण अस्य सर्वस्य जगतः परिरक्षणं न्यायानुसारेण कर्तव्यम्। पृथ्वीयां यदा अराजकता भवति तदा सामान्यजनाः शक्तिशालिनः प्राणिनः भयभीताः भवन्ति। अतः ईश्वरः सर्वेषां रक्षणार्थं राजानं निर्मितवान्। ईन्द्रवायुयमादित्याग्निवरुणचन्द्रकुबेराणां सारभूतान् अंशान् निष्कृष्य प्रजापति : राजानम् असृजत्। एतेषां देवानां शक्तिना राजा सर्वान् जीवान् वशयति। वीर्येण अतिशययोगात् कश्चिदपि पृथिव्याम् राजानम् अभिमुखेन द्रष्टुं न शक्नोति। अतः राजा: असाधारणतया शक्तिशाली अस्ति। राजा अग्निवायु-यमकुवेरमहेन्द्रादिदेवै: समः भवति। कदाचित् कश्चन व्यक्ति : बाल्यकाले राजपदं प्राप्तुं शक्नोति, परन्तु वालमपि विचिन्य तं राजानम् न अवहेलनीयम्। यतोहि सः राजा वस्तुतः महान् देवः यद्यपि मानवरूपेण दृश्यते, अतः यदि सः उपेक्षितः भवति तर्हि देवाः अपि उपेक्षिताः भवन्ति। असावधानतया यदि कोऽपि अग्निम् उपसृत्य स्पृशति तर्हि सः अग्निना दग्धः भवति। परन्तु यः अस्य राज्ञ: कोपे पतति, तस्य पशुधनं, सम्पत्तिं कुटुम्बं च अस्मिन् राजाग्नौ विनाशं भवति। राजा स्वकर्मनिर्वहणे कर्माणि सामर्थानि वा स्थानं कालं च सम्यक् विचारयति। एवं कृत्वा राजा विधिरूपं गृह्णाति। आवश्यके सति कदाचित् शत्रुः, कदाचित् त्रम:, कदाचित् उदासीनः च भवति। राज्ञः मुख्यप्रयोजनम् अस्ति देशे धर्मस्य स्थापनम्। राजा देशे विविधान् नियमान् स्थिरी करोति। अनेन केनचित् सद्भावेन, केनचित् अनिष्टेन पाल्यते। अतः समाजस्य सम्यक् सञ्चालनार्थ राजा ये निर्माणं करोति , तेषां पालनं सर्वे: अवश्यमेव कर्तव्यम्। तेषां कथमपि उल्लंघनं न कर्तव्यम्ः।

## ५.५ केषांचन श्लोकानां व्याख्या:

श्लोकसंख्या ३:

अराजके हि लोकेऽस्मिन् सर्वतो विद्रुते भयात्।
रक्षार्थमस्य सर्वस्य राजानमसृजत्प्रभु॥

श्लोकोऽयं मनुसंहितायाः सप्तमोऽध्याये उपलभ्यते।

श्लोकेऽस्मिन् जगति राज्ञ: महत्वं मनुना प्रतिपादितम्।

अस्य चराचरजगतस्य रक्षणार्थं प्रजापतिः राजानं सृष्टवान्। इन्द्रवायुयमादित्याग्निवरुणचन्द्रकुबेराणां सारभूतान् अंशान् निष्कृष्य ईश्वरः राजानम् असृजत्।

देवश्रेष्ठानाम् अंशेभ्यो : निर्मितः नृपः तेजसा सर्वभूतानि अभिभवति। अस्य जगतः परिरक्षणम् एव राज्ञः कर्तव्यम्। अतः राजा असाधारणतया शक्तिशाली भवति। पृथिव्यां यदा अराजकता भवति तदा सामान्यजनाः शक्तिशालिनःप्राणिनः भयभीताः भवन्ति। अतः ईश्वरः सर्वेषां रक्षणार्थं राजानं निर्मितवान्।

श्लोकसंख्या ५

यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्मितो नृपः ।
तस्मादभिभवत्येष सर्वभूतानि तेजसा ॥

उपर्युक्तः श्लोकः मनुसंहितायाः सप्तमोऽध्याये उपलभ्यते । राज्ञः असाधारणशक्तिर्विषये प्रतिपादयितुं मनुना श्लोकोऽयम् उद्धृत्योऽस्ति ।

प्रजापतिः सर्वेषां प्राणिनां रक्षणार्थं राजानं सृष्टवान् । ईन्द्रवायुयमादित्याग्निवरुणचन्द्रकुवेराणां सारभूतान् अंशान् निष्कृष्य प्रजापतिना नृपतिः सृष्टः। एतेषां देवानां शक्तिना राजा सर्वान् जीवान् वशयति। अतिशयशक्तिवशात् कश्चिदपि पृथिव्यां नृपतिम् अभिमुखेन द्रष्टुं न शक्नोति । राजा असाधारणतया शक्तिशाली अस्ति अतः नृपतिः अग्निवायुयमकुबेरमहेन्द्रादिदेवैः समः भवति । यदा पृथिव्याम् अराजकता भवति, तदा नृपतिः न्यायानुसारेण सर्वेषां परिरक्षणं कुर्यात् ।

श्लोकसंख्या ८:

बालोऽपि नावमनायो मनुष्य इति भूमिपः ।
महती देवता ह्येषा नररूपेण तिष्ठति ॥

श्लोकोऽयं मनुसंहितायाः सप्तमोऽध्यायात् उद्धृत्योऽस्ति । जगति राज्ञः महत्वं वर्णितुं श्लोकमिमं प्रतिपादयति ।

यद्यपि मानवरुपेण दृश्यते, परन्तु राजा वस्तुतः अस्ति महान् देवः । अतः यदि राजा उपेक्षिता: भवति तर्हि देवाः अपि उपेक्षिताः भवन्ति । प्रजापतिः सर्वेषां देवानां सारभूतान् अंशान् निष्कृष्य राजानं सृष्टवान् । अतः राजा असाधारणतया शक्तिशाली भवति । राजा देवैः सम: भवति । कदाचित् कश्चन व्यक्तिः बाल्यकाले राजपदं प्राप्तुं शक्नोति, परन्तु बालमपि राजानं न अवहेलनीयम् । वीर्येण अतिशययोगात् कश्चिदपि पृथिव्यां राजानम् अभिमुखेन द्रष्टुं न शक्नोति ।

श्लोकसंख्या: १०

कार्यं सोऽवेक्ष्य शक्तिं च देशकालौ च तत्त्वतः ।
कुरुते धर्मसिद्ध्यर्थं विश्वरुपं पुनः पुनः ॥

मनुसंहितायाः सप्तमोऽध्याये श्लोकोऽयम् उपलभ्यते । जगति राज्ञः विभिन्नानि कर्तव्यानि प्रतिपादयितुं श्लोकमिमं मनुः उल्लेखयति ।

राजा नियमानुसारं सर्वान् प्रजान् मारक परिपालयेत् । आवश्यके सति कदाचित् शत्रुः, कदाचित् मित्रम्, कदाचित् उदासीनश्च भवति । राज्ञः मुख्यप्रयोजनमस्ति देशे धर्मस्य स्थापनम् । राजा देशे विविधान् नियमान् स्थिरी करोति । एतेषां केनचित् सद्भावेन, केनचित् अनिष्टेन, पाल्यते । अतः धर्मसिद्धार्थं राजा विश्वरूपं धारयति । समाजस्य सम्यक् सञ्चालनार्थं राजा येषां नियमानां निर्माणं करोति, तेषां पालनं सर्वैः आवश्यमेव कर्तव्यम् ।

## ५.६ सन्धियुक्तशब्दानां सन्धिविच्छेदः

| **श्लोकसंख्या:** | **सन्धियुक्तशब्द** | **सन्धिविच्छेद:** |
|---|---|---|
| १ | भवेन्नृप: ---------- | भवेत्+नृप: |
| | संभवश्च ---------- | संभव:+च |
| २ | सर्वस्यास्य---------- | सर्वस्य +अस्य |
| ३ | राजानमसृजत्प्रभु:------ | राजानम्+असृजत्+ प्रभु: |
| ५ | इन्द्रानिलयमार्काणामग्नेश्च--- | इन्द्र+अनिल+यम+ अर्काणाम्+अग्ने:+च |
| | चन्द्रवित्तेशयोश्चैव-------- | चन्द्र+ वित्तेशयो:+च+एव |
| ५ | यस्मादेषां--------- | यस्माद् +एषां |
| | तस्मादभिभवत्येष----- | तस्माद् +अभिभवति+एष। |
| ६ | तपत्यादित्यवच्चैव---------- | तपति+ आदित्यवत्+ च+एव |
| | कश्चिद्प्यभिवीक्षितुम्--------- | कश्चिद्+अपि+अभिवीक्षितुम् |
| ७ | सोऽग्निर्थवति---------- | स:+अग्निः+भवति |
| ८ | नावमन्तव्यो---------- | न+अवगन्तव्य: |
| | ह्येषा---------- | हि + एषा |
| ९ | दहत्यग्निर्नरं---------- | दहति+ अग्निः+नरं |
| १० | सोऽवेक्ष---------- | स:+अवेक्ष्य |
| ११ | श्री विजयश्च---------- | श्री:+विजय:+च |
| | मृत्युश्च----- | मृत्यु:+च |
| १२ | विनश्यत्यसंशयम् ---------- | विनश्यति+ असंशयम्। |
| | ह्याशु ---------- | हि+ आशु |

१३ तस्माद्धर्म--------- तस्माद् + धर्म
व्यवस्येन्नराधिप:------- व्यवस्येत्+ नराधिप:
चाप्यनिष्टेषु ---------- च+अपि+ अनिष्टेषु

## ৫.৭ অধ্যায়স্য অসমীয়াসারাংশ:

**ধর্মৰ অর্থ :** সংস্কৃত√ ধৃ ধাতুৰ লগত মন্ প্রত্যয় যোগ হৈ ধর্ম শব্দৰ নিষ্পতি হৈছে । ধৃ ধাতুৱে ধাৰণ কৰা অর্থক বুজায়। যাৰ মাধ্যমেৰে মানৱৰ সুবিধার্থে সমগ্র বিশ্বকে ধাৰণ কৰা হয়, সেয়াই ধর্ম । মহাভাৰতত মানৱ সমাজক ধাৰণ কৰাৰ প্রসংগত কোৱা হৈছে"--ধাৰণাদ্ধর্মমিত্যাহু :"। মনুস্মৃতি আদি গ্রন্থত ধর্মবিষয়ক চর্চা, আধ্যাত্মিক চর্চা আদি কৰা হয় বাবে এইসমূহ গ্রন্থক ধর্মশাস্ত্র বুলি অভিহিত কৰা হয় ।

**ধর্মশাস্ত্রৰ পৰিচয়:**

ধর্মৰ মূল উৎস হৈছে বেদ আৰু সেই বেদকেই আশ্রয় কৰি সকলো শাস্ত্রৰ উদ্ভৱ হৈছে । ষড়বেদাংগৰ কল্প ভাগত ধর্মশাস্ত্রৰ বীজ নিহিত হৈ আছে । যিখন শাস্ত্রত ধর্মবিষয়ে মুখ্যভাবে আলোচনা কৰা হয় ,সেয়াই হৈছে ধর্মশাস্ত্র । ধর্মশাস্ত্রত আচাৰ ব্যৱহাৰ আৰু প্রায়চিত্তৰ বিশদভাৱে আলোচনা কৰা হয় । ধর্মশাস্ত্রসাহিত্যত ধর্মসূত্র আৰু স্মৃতিশাস্ত্রৰ ৰচনাকাল প্রসংগত বিভিন্ন মতভেদ পোৱা যায় । সূত্রগ্রন্থৰ ভিতৰত গৌতমধর্মসূত্র প্রাচীনতম আৰু স্মৃতিশাস্ত্রৰ ভিতৰত মনুস্মৃতি প্রাচীনতম বুলি গণ্য কৰা হয় । ধর্ম সূত্রসমূহৰ ভিতৰত গৌতমধর্মসূত্র, আপস্তম্বধর্মসূত্র, বৌধায়নধর্মসূত্র আদি অন্যতম। তদুপৰি স্মৃতিশাস্ত্রৰ ভিতৰত মনুস্মৃতি, যাজ্ঞবল্ক্যস্মৃতি, পৰাশৰস্মৃতি, নাৰদস্মৃতি আদি অন্যতম ।

**মনুসংহিতাৰ পৰিচয়:**

মনুসংহিতাৰ ৰচক মনুক আটাইতকৈ প্রসিদ্ধ আৰু প্রথম শাস্ত্রকাৰ বুলি অভিহিত কৰা হয় । মনুসংহিতাত বর্ণধর্ম, আশ্রমধর্ম, বর্ণাশমধর্ম, গুণধর্ম, নিমিত্তধর্ম, সাধাৰণধর্মৰ আলোচনা কৰা হৈছে। মনুসংহিতাক ধর্মশাস্ত্রসমূহৰ ভিতৰত আটাইতকৈ গ্রহনযোগ্য তথা প্রাচীনতম বুলি স্বীকাৰ কৰা হৈছে । মনুসংহিতাত ১২ টা অধ্যায় পোৱা যায়। এই ধর্মগ্রন্থৰ ওপৰত বিভিন্নজন টীকাকাৰে টীকা ৰচনা কৰিছে । সেইসমূহৰ ভিতৰত মেধাতিথি, কুল্লুকভট্ট সর্বজ্ঞনাৰায়ণ উল্লেখযোগ্য ।

মনুসংহিতাৰ ১২ টা অধ্যায়ত আলোচিত বিষয়সমূহ উল্লেখ কৰা হ'ল-

প্রথম অধ্যায় : জগতৰ উৎপত্তি, স্ত্রীপুৰুষৰসৃষ্টি, মনুৰ উৎপত্তি প্রজাপতিৰ সৃষ্টি, কর্ম আৰু জন্মাদিক্রম কথন, জগতৰ প্রলয়, জীৱৰ দেহান্তৰ প্রাপ্তি, বর্ণৰ কর্মব্যৱস্থা, আদি ।

দ্বিতীয় অধ্যায় : ধর্মৰ লক্ষণ, শাস্ত্রীয় কর্মৰ দ্বাৰা মোক্ষ লাভ, শ্রুতি আৰু স্মৃতিৰ পৰিচয়, ধর্মৰ চাৰি -প্রমাণ , জাতকর্ম, নামকৰণ, চূড়াকৰণ, উপনয়ন, দণ্ডধাৰণবিধি, ভিক্ষাগ্রহণবিধি, ভোজন বিধি, আচমনবিধি, গুৰুৰ কর্তব্য, প্রণৱ প্রশংসা, অধ্যয়ন আৰু অধ্যাপনাৰ বিধি, উপাধ্যায়ৰ লক্ষণ, শিষ্যৰ প্রতি অধ্যাপকৰ কর্তব্য, পিতৃ-মাতৃ আৰু আচার্য্যৰ প্রতি কর্তব্য ইত্যাদি ।

তৃতীয় অধ্যায় : ব্রহ্মাচাৰীৰ অধ্যয়নৰ কাল, সমাবর্তন, অষ্টপ্রকাৰৰ বিবাহ, সবর্ণ বিবাহ, অসবর্ণবিবাহ পঞ্চমহায়জ্ঞঅনুষ্ঠান, গৃহস্থৰ ধর্ম, অতিথি সৎকাৰ, শ্রাদ্ধৰ কর্তব্য -অকর্তব্য, ভোজনৰ পবিত্রতা ইত্যাদি ।

চতুর্থ অধ্যায় : দ্বিজাতিৰ বৃত্তি নিৰূপণ, স্নাতকৰ কর্তব্য, বেদাধ্যয়নৰ কাল, বিধি, নিন্দিত অন্ন, জলদান, ভূমিদান, বিদ্যাদান আদিৰ ফল, স্বর্গগমনৰ অধিকাৰী নির্ণয়, দান গ্রহণৰ পাত্র-অপাত্র বিচাৰ, আত্মনিবেদন, অসত্যবচনৰ নিন্দা, ব্রহ্মচিন্তা ইত্যাদি ।

পঞ্চম অধ্যায় : অকাল মৃত্যুৰ কাৰণ, অশৌচ, স্নান শুদ্ধি, ব্রহ্মচাৰীৰ প্রেতকার্য্যাধিকাৰ,দেহশুদ্ধি, সাধাৰণ শুদ্ধি, দ্রব্যশুদ্ধি, আচমন বিধি, উচ্ছিষ্ট বিচাৰ -স্ত্রীলোকৰ ধর্ম, ভার্য্যাৰ মৃত্যুত স্বামীৰ কর্তব্য, ভার্য্যাৰ মৃত্যুত পুনৰ বিবাহ আদি।

ষষ্ঠ অধ্যায় : বাণপ্রস্থ আশ্রমৰ ধর্ম, পৰিব্রাজককাল, সন্যাস আশ্রমৰ কর্তব্য ,প্রাণায়ম ,দেহৰ স্বৰূপ কথন , ব্রহ্মজ্ঞান, চাৰিপ্রকাৰৰ আশ্রমধর্ম ইত্যাদি ।

সপ্তম অধ্যায় : ৰজাৰ সৃষ্টিৰ কাৰণ, ৰজাৰ প্রশংসা দণ্ডবিধান, ৰজাব কর্তব্য, মন্ত্রীৰ সৈতে মন্ত্রণা, দূত নির্বাচন, দূতৰ কার্য্য, দূর্গ, আম ইয়াৰ লক্ষণ যুদ্ধনীতি, ৰাজনীতি, গ্রাম্যাধিপতিনিয়োগ, নগৰাধিপতি নিয়োগ, কৰ সংগ্রহ ,কৰগ্রহণৰ নিয়ম, কজাৰ দোষ কথন, সন্ধি-বিগ্রহাদিৰ নীতি -যুদ্ধযাত্রা, আত্মৰক্ষাৰ উপায়, ভোজনবিধি, পীড়িত ৰজাৰ কর্তব্য ইত্যাদি ।

অষ্টম অধ্যায় : অষ্টাদশ বিবাদৰ স্থান, বিচাৰ নীতি, সাক্ষী নির্ণয়, মিথ্যা সাক্ষ্যদানৰ দোষ, মিথ্যা সাক্ষ্যৰ প্রায়শিত্ত, অন্যায় দণ্ডৰ নিন্দা, ঋন অপৰিশোধৰ দণ্ড, জামীন, প্রাপ্য বস্তুৰ গ্রহন, ন্যায় বিচাৰৰ প্রশংসা, বিবাহসম্বন্ধীয় বিচাৰ, সীমা বিবাদ, বাক্ পাৰুষ্যৰ বিবাদ, দণ্ডপাৰুষ্য , গার্হস্থাশ্রম বিবাদ, অন্যায় বাণিজ্যকাৰীৰ দণ্ড ইত্যাদি ।

নৱম অধ্যায় : স্ত্রী পুং ধর্ম, স্ত্রীৰক্ষা, জায়া শব্দ, নিয়োগ বিধি, কন্যাদান ব্যৱস্থা, বিবাহৰ বয়স নিৰুপণ, ভার্য্যাৰ পোষণ, পৈত্রিকধন বিভাগ, দ্বাদশপ্রকাৰৰ পুত্র, স্ত্রীধন ব্যৱস্থা, স্বীবালকাদিৰ দণ্ড পুনর্বিচাৰ ব্যৱস্থা, যথাশাস্ত্র দণ্ডৰ প্রশংসা, সপ্তাংগ ৰাজ্যৰ বিৱৰণ, যুগ চতুষ্টয়, ব্রাহ্মণপ্রশংসা, বৈশ্যধর্ম, শূদ্রধর্ম ইত্যাদি ।

দশম অধ্যায় : অনুলোম, প্রতিলোম আৰু সংকৰ জাতিৰ ধর্ম, চতুর্বর্ণ, ষটকর্ম, বর্ণ অনুযায়ী কর্মৰ ভিন্নতা, পৰবৃত্তি অবলম্বনত নিন্দা, ৰজাৰ আপদ্ধর্ম ,শূদ্রৰ আপদ্ধর্ম, আপদ্ধর্ম পালনৰ ফল ইত্যাদি ।

একাদশ অধ্যায় : যাগানুষ্ঠান ব্যৱস্থা, ব্রহ্মবধ প্রায়শ্চিত্ত, গোবধ প্রায়শ্চিত্ত, অভক্ষ্য ভক্ষণ প্রায়শ্চিত্ত , অগম্য গমন প্রায়শ্চিত,শূদ্র সেৱাকাৰীৰ প্রায়শ্চিত্ত । তপঃ প্রশংসা, ৰহস্যকৃত পাপৰ প্রায়শ্চিত্ত, বেদাভ্যাসৰ ফল ইত্যাদি ।

দ্বাদশ অধ্যায় :জন্মান্তৰার্জিত শুভাশুভ কর্মৰ ফল ভোগ, ত্রিগুণকথন, গুণত্রয়ৰ উত্তৰোত্তৰ শ্রেষ্ঠতা, মোক্ষসাধন, বেদ প্রশংসা, ব্রহ্মধ্যানৰ উপযোগিতা মনুসংহিতাৰ পাঠৰ ফল ইত্যাদি ।

শাস্ত্রবিহিত ব্রাহ্মসংস্কাৰপ্রাপ্ত ক্ষত্রিয়ৰ দ্বাৰা এই জগতৰ প্রজাৰ ৰক্ষণাবেক্ষণ ন্যায় অনুসৰি হোৱা উচিত। ৰজাবিহীন জগতখনত সকলোৱে চাৰিওফালে ভয়ৰ বাবে পলাই ফুৰাত সমাজ আৰু ৰাজ্যৰ ৰক্ষাৰ বাবে ঈশ্বৰে ৰজাৰ সৃষ্টি কৰিলে । ঈশ্বৰে ইন্দ্র, বায়ু, যম ,সূর্য্য ,অগ্নি, বৰুণ, চন্দ্র আৰু কুবেৰৰ সাৰভূত অংশ লৈ ৰজাৰ সৃষ্টি কৰাৰ বালে তেওঁ সকলো প্রাণীকেই শক্তিৰে বন্ধীভূত কৰে।সূর্য্যৰ নিচিনাকৈ এই ৰজাকো কোনেও প্রত্যক্ষভাৱে দর্শন কৰিব নোৱাৰে। ৰজা শক্তিত অগ্নি, বায়ু ,সূর্য্য, চন্দ্র, যম, কুবেৰ, বৰুণ আৰু মহেন্দ্রৰ দৰে হ'য়। ৰজা এজন বালক হ'লেও তেওঁক সাধাৰণ মানুহ বুলি অৱজ্ঞা কৰা অনুচিত, কিয়নো মানৱদেহত অৱস্থান কৰি থকা এই ৰজা প্রকৃততে এজন মহান দেৱতাহে । অগ্নিয়ে কেৱল অসাৱধনতাবশতঃ ওচৰলৈ যোৱাজনকহে দহন কৰে, কিন্তু ৰাজাগ্নিয়ে সম্পূর্ণ পশুসম্পত্তিসহিত বংশকো দহন কৰে। ৰজাই প্রয়োজন অনুসৰি কার্য্য তথা শক্তিৰ ভালদৰে বিচাৰ কৰি ধর্মৰ অর্থাৎ কার্য্যৰ সিদ্ধিৰ বাবে বাৰে বাৰে নানা ৰূপ ধাৰণ কৰে অর্থাৎ প্রয়োজন অনুসৰি -- শত্রু, মিত্র তথা উদাসীন ৰূপ ধাৰণ কৰে ।

যাৰ অনুগ্রহত বিপুল সম্পত্তি, পৰাক্রমত বিজয়, আৰু ক্রোধত মৃত্যুৱে বাস কৰে তেওঁ নিশ্চিতভাৱে সর্বশক্তিমান । যিজন ব্যক্তিয়ে অজ্ঞানতাবশতঃ ৰজাক দ্বেষ কৰে, তেওঁ নিশ্চিতভাৱে বিনাশপ্রাপ্ত হ'য় কিয়নো তেনে ব্যক্তিৰ বিনাশৰ বাবে ৰজা সংকল্পবদ্ধ হৈ পৰে। সেয়েহে সমাজক ভাল সুচাৰুৰূপে পৰিচালনা কৰিবৰ বাবে ৰজাই যিবোৰ নিয়ম গ্রহণ কৰে, সেইবোৰ উলংঘা কৰা অনুচিত ।

## ৎ৫.৮: अध्यायात् किमवगतम्

- उपनयन संस्कारयुक्त: क्षत्रिय: अस्य जगतः परिरक्षणं न्यायानुसारेण निर्वाहयितुं शक्नोति।
- ईश्वरः इन्द्रवायु सूर्यादिनानादेवानां सारभूतान् अंशान् गृहीत्वा राजानम् निर्मितवान्।
- राजा मनुष्यरुपेण वस्तुतः देवः अस्ति।
- धर्मस्य स्थापनार्थं राजा नानारूपं गृह्णाति।
- राजा पराक्रमे विजयमस्वरुपः क्रोधे मृत्युस्वरुपः भवति।
- न कश्चित् राज्ञः शास्त्रनियमान् उल्लघयेत।

## ✓५.९ ज्ञानाधिक्यम्


- देवे, जयन्त कृष्णः (१९७२) मनुस्मृतिः,
- मेधातिथि- सर्वज्ञनारायण - कुल्लुक - राघवानन्द-नन्दन-रामचन्द्र- मणिराम- गोविन्दराज- भारुचि इति व्याख्यानवकेन सगलंकृत्ता), भारतीय विद्या भवनम् मुम्बई:।
- नेने, गोपालशास्त्री, (१९७०), मनुस्मृतिः, चौखम्बा संस्कृत सीरीब आफिस, वाराणसी।
- शर्मा, किरण:, (२००८) मनुसंहिता, चंद्रप्रकाशः, गुवाहाटी।


## ⑦५.१० अभ्यासप्रश्नाः

**लघुप्रश्नाः**

प्रश्नः १ प्रवा यदि राज्ञः अपमानं करोति तर्हि किं परिणामं भवति ?

प्रश्नः २ ईश्वरः कथं राजानं सृष्टवान् ?

प्रश्नः ३ राज्ञः सामर्थस्य संक्षिप्तं वर्णनं लिख्यताम् ?

**निबन्धप्रश्न:**

प्रश्नः ५ मनुस्मृते: सप्ममोSध्यायस्य प्रथमश्लोकत: त्रयोदशश्लोक पर्यन्तं विषयवस्तुन: सारांशं लिख्यताम्।

*****

# अध्यायः६ मनुसंहिता (सप्तमोऽध्यायः, श्लोकाः १४-३४)

## अध्यायस्य संरचना

६.१. उद्देश्यम्

६.२. परिचयः

६.३. श्लोकानां मूलसंस्कृतपाठः, शब्दार्थः, व्याख्या, सरलव्याख्या, असमीयानुवाद :

६.४. श्लोकानां संस्कृतसारांशः

६.५. केषाचनं श्लोकानां व्याख्या

६.६ सन्धियुक्तशब्दानां सन्धिविच्छेदः

६.७. श्लोकानां असमीयासारांशः

६.८. अध्यायात् किमवगतम्

६.९ ज्ञानाधिक्यम्

६.१०. अभ्यासप्रश्नाः

## ६.१. उद्देश्यम्

अस्य अध्यायस्य अध्ययनेन भवन्तः -----

- मनुस्मृतेः सप्तमोऽध्यायस्य चतुर्दशश्लोकतः चतुस्त्रिंशतश्लोक – पर्यन्तं संस्कृतपाठान् ज्ञास्यन्ति।
- श्लोकानां मूलसंस्कृतपाठ – अन्वय – शब्दार्थ-व्याख्या – सरलव्याख्या – असमीयानुवादविषये अवगताः भवन्ति।
- श्लोकानां सारांशं प्राप्नुवन्ति।

## ६.२. परिचयः

पूर्वाध्याये भवन्तः मनुस्मृतेः सप्तमोऽध्याये राजधर्मविषये उल्लिखितश्लोकानां सम्यक् ज्ञानं प्राप्स्यन्ति। अस्मिन् अध्याये भवन्तः राज्यशासने राज्ञा विहिता दण्डशक्तिः, दण्डस्य सम्यक् अपि च अनुचितप्रयोगस्य परिणामान् ज्ञास्यन्ति।

## ६.३. श्लोकानां मूलसंस्कृतपाठः, शब्दार्थः, व्याख्या, सरलव्याख्या, असमीयानुवादः

**श्लोकसंख्या १४**

**तस्यार्थे सर्वभूतानां गोप्तारं धर्ममात्मजम्**
**ब्रह्मतेजोमयं दण्डमसृजत्पूर्वमीश्वर : ।।**

**अन्वयः** तस्य अर्थे पूर्वम् ईश्वरः सर्वभूतानां गोप्तारम् ब्रह्मतेजोमयं धर्ममात्मजम् दण्डम् असृजत्।

**शब्दार्थः**

अर्थे – कृते
पूर्वम् – युगारम्भे
सर्वभूतानां – सर्वप्राणिनां
गोप्तारम् – रक्षितारम्
ब्रह्मतेजोमयं- ब्रह्मणः तेजसा युक्तं
धर्ममात्मजम् – धर्मस्वरूपं पुत्रं
असृजत् – सृष्टवान्

**व्याख्या**

तस्य राज्ञः प्रयोजनसिद्धये सर्वप्राणिनां रक्षितारं धर्मस्वरूपं पुत्रं ब्रह्मणो यत्केवलं तेजस्तेन निर्मितं न पाञ्चभौतिकं दण्डं ब्रह्मा पूर्वं सृष्टवान्।

**असमीयानुवाद :**

ৰজাৰ প্রয়োজন সিদ্ধিৰ বাবে পূর্বতেই ঈশ্বৰে সকলো প্রানীৰে ৰক্ষক, ধর্মস্বৰূপ পুত্র ব্রহ্মাৰ শক্তিৰে সৃষ্ট দণ্ডক সৃষ্টি কৰিছিল ।

**श्लोकसंख्या १५**

**तस्य सर्वाणि भूतानि स्थावराणि चराणि च ।**
**भयाद्भोगाय कल्पन्ते स्वधर्मान्न चलन्ति च ।।**

**अन्वयः** तस्य भयात् सर्वाणि स्थावराणि चराणि भूतानि च भोगाय कल्पन्ते स्वधर्मात् न चलन्ति च ।

**शब्दार्थ :**

स्थावराणि – द्रुमादय:
चराणि – जङ्गमानि
भूतानि – प्राणिनः
कल्पन्ते – समर्थाः भवन्ति
न चलन्ति - न विचलन्ति

**व्याख्या**

तस्य दण्डस्य भयेन चराचराः सर्वे प्राणिनो भोगं कर्तुं समर्थाः भवन्ति, अन्यथा बलवता दुर्बलस्य धनदारादिग्रहणे तस्यापि तदपेक्ष्य बलिनेति कस्यापि भोगो न सिध्येत्, वृक्षादीनां स्थावरादीनां छेदने भोगासिद्धिः । तथा सतामपि नित्यनैमित्तिक – स्वधर्मानुष्ठानमकरणे याम्ययातनाभयादेव ।

**असमीयानुवादः**

সেই দণ্ডৰ ভয়ত স্থাৱৰ আৰু জঙ্গম সকলো প্ৰানীয়ে ভোগ কৰিবলৈ সমৰ্থ হয়, নিজ ধৰ্মৰ পৰা বিচলিত নহয় ।

**श्लोकसंख्या १६**

**तं देशकालौ शक्तिं च विद्यां चावेक्ष्य तत्त्वतः।**
**यथार्हतः सम्प्रणयेन्नरेष्वन्यायवर्तिषु ।।**

**अन्वयः** देशकालौ शक्तिं च विद्याम् तत्त्वतः अवेक्ष्य अन्यायवर्तिषु नरेषु तम् यथार्हतः सम्प्रणयेत्।

**शब्दार्थ :**

तत्त्वतः -शास्त्रानुसारेण
अवेक्ष्य – निरुप्य
अन्यायवर्तिषु – अन्यायकारिषु
यथार्हतः – अर्हतानुसारम्
सम्प्रणयेत् – प्रवर्तयेत्

**व्याख्या**

तं दण्डं देशकालौ दण्डयस्य च शक्तिं विद्यादिकं यस्मिन्नपराधे यो दण्डोऽर्हतीत्यादिकं शास्त्रानुसारेण तत्त्वतो निरुप्यापराधिषु प्रवर्तयेत्।

**असमीयानुवादः**

দেশ অথবা স্থান, কাল, শক্তি আৰু বিদ্যা অনুসৰি অন্যায় আচৰণ কৰাজনৰ প্ৰতি (ৰজাই) সেই দণ্ড প্ৰণয়ন কৰিব লাগে ।

**श्लोकसंख्या १७**

**स राजा पुरुषो दण्डः स नेता शासिता च सः।**
**चतुर्णामाश्रमाणां च धर्मस्य प्रतिभूः स्मृतः ।।**

**अन्वयः** स दण्डः पुरुषः राजा सः नेता च शासिता सः चतुर्णाम आश्रमाणां च धर्मस्य प्रतिभूः स्मृतः।

**शब्दार्थ :**

चतुर्णाम् आश्रमाणां – ब्रह्मचर्याश्रमाणां

**व्याख्या**

स एव दण्डो वस्तुतो राजा तस्मिन् सति राजशक्तियोगात्, स एव पुरुषस्ततोऽन्ये स्त्रिय इव तद्विधेयत्वात्, स एव नेता तेन कार्याणि नीयन्ते प्राप्यन्ते, स एव शासिता शासनमाज्ञा तद्दातृत्वात्, स एव चतुर्णामप्याश्रमाणां यो धर्मस्तस्य सम्पादने प्रतिभूरिव प्रतिभूर्मुनिभिः स्मृतः ।

**असमीमानुवाद :**

সেই দণ্ডস্বৰূপ পুৰুষ হৈছে ৰজা, তেওঁ নেতা আৰু শাসক, তেওঁ (ৰজা) চাৰিখন আশ্রমৰ আৰু ধর্মৰ প্রতিভূস্বৰূপ ।

**श्लोकसंख्या १८**

**दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति ।**
**दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः ।।**

**अन्वयः** दण्डः सर्व प्रजाः शास्ति दण्डः एव अभिरक्षति सुप्तेषु दण्डः जागर्ति बुधाः दण्डं धर्मं विदुः।

**शब्दार्थः**

शास्ति – शासनं करोति
सुप्तेषु – निद्राणेषु
बुधाः – विद्वांसः

**व्याख्या**

यस्मात् दण्डः सर्वाः प्रजा आज्ञां करोति तस्मात्साधूक्तं शासितेति ज्ञेयम्। यस्मात्स एव प्रजा रक्षति ततो युक्तमुक्तं शजेति। निद्राणेब्वपि रक्षितृषु दण्ड एव जागर्ति। तद्भयेनैव चौरादीनामप्रवृत्तेः। दण्डमेव धर्महेतुत्वाद्धर्मं जानन्ति। कारणे कार्योपचारः, ऐहिकपारन्निकदण्डभयादेव धर्मानुष्ठानात्।

**सरलव्याख्या**

दण्डः सर्वाः प्रजाः शासनं करोति अर्थात् दण्डः सर्वाः प्रजाः कर्तव्यादिषु स्थापयति। स एव प्रजाः रक्षति, सुप्तेषु रक्षयितृषु दण्ड एव जागर्ति तद्भयादेव चौरादीनां अप्रवृत्तेः दण्डः एव धर्मं विद्वांसः मन्यन्ते।

**असमीयानुवादः**

দণ্ডই সকলো প্রজাক শাসন কৰে, দণ্ডই সকলোকে ৰক্ষা কৰে, দণ্ডই সকলোৰে (ৰক্ষীসকলৰ) নিদ্রিত অৱস্থাতো জাগি থাকে, বিদ্বানসকলে দণ্ডকেই ধর্ম বুলি কয়।

**श्लोकसंख्या १९**

**समीक्ष्य स धृतः सम्यक्सर्वा रञ्जयति प्रजाः।**
**असमीक्ष्य प्रणीतस्तु विनाशयति सर्वत :॥**

**अन्वयः** सम्यक् समीक्ष्य धृतः सः सर्वाः प्रजाः रञ्जयति तु असमीक्ष्य प्रणीतः सर्वतः विनाशयति।

**शब्दार्थः**

सम्यक् समीक्ष्य – यथाशास्त्रं विचार्य
धृतः – प्रणीतः
असमीक्ष्य- अविचार्य
विनाशयति – नाशयति

**व्याख्या**

स दण्डः शास्त्रतः सम्यक् निरुप्यापराधानुरूपेण देहधनादिषु धृतः सर्वाः प्रजाः सानुरागाः करोति। अविचार्य तु लोभादिना प्रयुक्तः सर्वाणि बाह्यार्थपुत्रादीनि नाशयति।

**असमीयानुवादः**

सम्यकभावरे प्रणीत शास्त्रसम्मत दण्डई सकलो प्रजाक आनन्द दिये । अविवेचितभावरे प्रणीत होरा दण्डई सकलोरे विनाश साधन करे ।

**श्लोकसंख्या २०**

**यदि न प्रणयेद्राजा दण्डं दण्डयेष्वतन्द्रितः**
**शूले मत्स्यानिवापक्ष्यन्दुर्बलान्बलवत्तराः ॥**

**अन्वयः** यदि राजा अतन्द्रितः दण्डेयषु दण्डं न प्रणयेत् बलवत्तराः दुर्बलान् शूले मत्स्यान् इव अपक्ष्यन्।

**शद्वार्थ :**

अतन्द्रितः – अनलसो भूत्वा
न प्रणयेत् – प्रणयनं न कुर्यात्
बलवत्तराः – बलिनः
अपक्ष्यन् – हिंसाम् अकरिष्यन्

**व्याख्या**

यदि राजाऽनलसो भूत्वा दण्डप्रणयनं न कुर्यात् तदा शूले कृत्वा मत्स्यानिव बलवत्तो दुर्बलान् अपक्ष्यन्। नृङन्तस्य पचिधातो रूपमिदम्। बलिनोऽल्पबलानां हिंसामकरिष्यन्नित्यर्थः। 'शूले मत्स्यानिवापक्ष्यन्' इत्येष मेधातिथिगोविन्दराजलिखितः पाठः । 'जले मत्स्यानिवाऽऽहिंस्युः इति च पाठान्तरम् । अत्र बलवन्तो दुर्बलान्हिंस्युरिति मत्स्यन्याय एव स्यादित्युक्तम्।

**सरलव्याख्या**

राजा अतन्द्रितः दण्डेषु दण्डं यदि न प्रणयेत् न प्रयोजयेत् तर्हि बलवत्तरः पुरुषो दुर्बलान् पुरुषान् अद्यात् लुम्पेत् अपक्ष्यन् शूले आरोपितान्मत्स्यानिव।

**असमीयानुवादः**

যদি ৰজাই অনলস হৈ দণ্ডৰ যোগ্যজনক দণ্ড প্রদান নকৰে, তেনেহলে শূলত দিয়া মাছবোৰৰ দৰে বলৱানসকলে দুৰ্বলীবোৰক কষ্ট দিলেহেতেন ।

**श्लोकसंख्या २१**

**अद्यात्काकः पुरोडाशं स्वाऽवलिह्याद्धविस्तथा।**
**स्वाम्यं च न स्यात्कस्मिंच्चित्प्रवर्ततताधरोत्तरम् ॥**

**अन्वयः** काकः पुरोडाशम् अद्यात् च श्वा हविः लिह्यात् च कस्मिंश्चित् स्वाम्यं न स्माद् अधरः उत्तरं प्रवर्तते।

**शब्दार्थः**

अद्यात् – भोगाय कल्पते
हविः – घृतादिद्रव्यम्
स्वाम्यं – प्रभुत्वं

**व्याख्या**

यदि राजा दण्डं नाचरिष्यत्तदा यज्ञेषु सर्वथा हविरनर्हः काकः पुरोडाशमखादिष्यत् । तथा कुक्कुरः पायसादिहविरलेक्ष्यत् । न कस्यचित् कुत्रचित् स्वाम्यमयविष्यत् । ततो बलिना तद्ग्रहणात् ब्राह्मणादिवर्णानां च मध्ये यदधरं शूद्रादि तदेवोत्तरं प्रधानं प्रावर्तिष्यत।

**असमीयानुवादः**

(ৰজাই দণ্ডৰ যোগ্যজনক দণ্ড প্ৰদান নকৰিলে) কাউৰীয়ে পুৰোডাশ ভক্ষণ কৰিলেহেতেন, কুকুৰে হবি চেলেকিলেহেতেন, কতো প্ৰভুত্ব নথাকিলেহেতেন আৰু নিম্নবৰ্ণৰ লোকে উচ্চবৰ্ণৰ ওপৰত প্ৰাধান্য বিস্তাৰ কৰিলেহেতেন ।

**श्लोकसंख्या २२**

**सर्वो दण्डजितो लोको दुर्लभो हि शुचिर्नरः ।**
**दण्डस्य हि भयात्सर्वं, जगद्भोगाय कल्पते ।।**

**अन्वयः** सर्वः लोकः दण्डजितः हि शुचिः नरः दुर्लभः दण्डस्य हि भयात् सर्वं जगत् भोगाय कल्पते ।

**शब्दार्थः**

दण्डजितः - दण्डेन नियमितः
शुचि नरः - विशुद्धः नरः
कल्पते - समर्थं भवति

**व्याख्या**

सर्वोऽयं लोको दण्डेनैव नियमितः सन्मार्गेऽवतिष्ठते । स्वभावविशुद्धो हि मानुषः कष्टेन लभ्यते । तथा सर्वमिदं जगद्दण्डस्यैव भयादावश्यकभोजनादिरूपेऽपि भोगे समर्थं भवति ।

**असमीयानुवादः**

সকলো লোক দণ্ডৰ জৰিয়তেই নিয়ন্ত্ৰিত হয় অৰ্থাৎ প্ৰকৃত পথত অৱস্থান কৰে । বিশুদ্ধ স্বভাৱৰ লোক অতি দুৰ্লভ । দণ্ডৰ ভয়তেই সমগ্ৰ জগতখনে ভোগ কৰিবলৈ সমৰ্থ হয় ।

**श्लोकसंख्या २३**

**देवदानवगन्धर्वा रक्षांसि पतगोरगाः**
**तेऽपि भोगाय कल्पन्ते दण्डेनैव निपीडिताः ।।**

**अन्वयः** देव-दानव-गन्धर्वाः रक्षांसि पतग – उरगाः ते अपि दण्डेन एव निपीडिताः भोगाय कल्पन्ते।

**शब्दार्थः**

रक्षांसि - राक्षसः

उरगाः - सर्पा :

निपीडिताः - दण्डेन नियमिताः

भोगाय - उपकाराय

कल्पन्ते - प्रवर्तन्ते

**व्याख्या**

इन्द्राग्निसूर्यवाख्यादयो देवास्तथा दानवगन्धर्वराक्षसपक्षिसर्पा अपि, जगदीश्वरपरमार्थभयपीडिता एव वर्षदानाद्युपकाराय प्रवर्तन्ते। तथाच श्रुतिः- 'भयादस्याग्निस्तपति भयात्तपति सूर्यः। भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः' इति।

**असमीयानुवादः**

দেৱতা, দানৱ , গন্ধর্ব, ৰাক্ষস, পক্ষী আৰু সর্প – সেইসমূহেও দণ্ডৰ দ্বাৰাই পীড়িত হৈ অর্থাৎ দণ্ডৰ ভয়ত ভীত হৈ উপকাৰ সাধনৰ বাবে প্রবৃত্ত হয়।

**श्लोकसंख्या २४**

**दुष्येयुः सर्ववर्णाश्च भिद्येरन्सर्वसेतवः।**
**सर्वलोकप्रकोपश्च भवेद्दण्डस्य विभ्रमात्॥**

**अन्वयः** दण्डस्य विभ्रमात् सर्ववर्णाः दुष्येयुः सर्वसेतवः भिद्येरन् च सर्वलोकप्रकोपः।

**शब्दार्थः**

विभ्रमात् - अनुचितेन प्रवर्तनात्
सर्ववर्णा : - ब्राह्मणादिवर्णाः
दुष्येयु : - संकीर्णाः भवेयुः
सर्वसेतवः - सर्वमर्य्यादा:
भिद्येरन् - परिलोपः स्यात्
सर्वलोकप्रकोप : - सर्वलोकसंक्षोभः

**व्याख्या**

दण्डस्य अनाचरणात् अनुचितेन वा प्रवर्तनात् सर्वे ब्राह्मणादिवर्णा इतरेतरस्त्रीगमनेन संकीर्येरन्, सर्वशास्त्रीयनियमात् चतुर्वर्गफलानि उत्सीदेयुः, चौर्यसाहसादिना च परस्य उपकारात् सर्वलोकसंक्षोभः च जायेत।

**असमीयानुवादः**

দণ্ড অনুচিতভাৱে প্রবর্ত্তন হ'লে সকলো বর্ণৰ লোক (দূষিত হ'লহেতেন) সংকীর্ণ হ'লহেতেন, সকলো মর্য্যাদা উচ্ছেদিত হ'লহেতেন, সকলো লোকৰ মাজত ক্ষোভৰ সৃষ্টি হ'লহেতেন ।

**श्लोकसंख्या २५**

**यत्र श्यामो लोहिताक्षो दण्डश्चरति पापहा।**
**प्रजास्तत्र न मुह्यन्ति नेता चेत्साधु पश्यति॥**

**अन्वयः** यत्र श्यामः लोहिताक्षः पापहा दण्डः चरति चेत् नेता साधु पश्यति तत्र प्रजाः न मुह्यन्ति।

**शब्दार्थ**:
श्यामवर्ण : - कृष्णवर्णः
लोहिताक्ष : - लोहितनयनः
पापहा - पापनाशी
साधु - उपयुक्तं
न मुह्यन्ति - व्याकुलं न भवन्ति

**व्याख्या**

यत्र देशे शास्त्रप्रमाणावगतः श्यामवर्णः लोहितनयनोऽधिष्ठातृदेवताको दण्डो विचरति तत्र प्रजा व्याकुला न भवन्ति। दण्डप्रणेता यदि विषयानुरूपं सम्यग्जानाति।

**असमीयानुवाद :**

যত শ্যামবর্ণৰ , ৰঙা চকু বিশিষ্ট, পাপনাশী দণ্ডই বিচৰণ কৰে, যদি নেতাজনে উপযুক্তভাৱে দণ্ডবিধান কৰে ,তাত প্রজা ব্যাকুল হ`ব লগা নহয় ।

**श्लोकसंख्या २६**

**तस्याहुः संप्रणेतारं राजानं सत्यवादिनम्।**
**समीक्ष्यकारिणं प्राज्ञं धर्मकामार्थकोविदम्॥**

**अन्वयः** सत्यवादिनं समीक्ष्यकारिणं प्राज्ञं धर्मकामार्थकोविदम् राजानं तस्य संप्रणेतारं आहुः।

**शब्दार्थ**:

धर्मकामार्थकोविदम् - त्रिवर्गज्ञातारम्

**व्याख्या**

तस्य दण्डस्य प्रवर्तयितारमभिषेकादिगुणयुक्तं नृपतिमवितभवादिनं समीक्ष्यकारिणं तत्त्वातत्त्वविचारोचितं प्रज्ञाशालिनं धर्मार्थकामानां ज्ञातारं मन्वादयोऽव्याहुः।

**असमीयानुवादः**

সত্যবাদী, সমীক্ষ্যকাৰী, প্রাজ্ঞ, ধর্ম-অর্থ- কাম জ্ঞাতা ৰজাক তাৰ (দণ্ডৰ) প্রৱর্ত্তক বুলি কোৱা হয় ।

**श्लोकसंख्या २७**

**तं राजा प्रणयन्सम्यक् त्रिवर्गेणाभिवर्धते।**
**कामात्मा विषमः क्षुद्रो दण्डेनैव निहन्यते ॥**

**अन्वयः** तं सम्यक् प्रणयन् राजा त्रिवर्गेण अभिवर्धते कामात्मा विषमः क्षुद्रः दण्डेन एव निहन्यते।

**शब्दार्थः**

सम्यक् - यथायथं
प्रणयन् - प्रवर्तयन्
त्रिवर्गेण - धर्मार्थकामैः
कामात्मा - विषयाभिलाषी
विषमः - कोपनः
क्षुद्रः - छलान्वेषी

**व्याख्या**

तं दण्डं राजा सम्यक् प्रवर्तयन् धर्मार्थकामैः वृद्धिं गच्छति। यः पुनः विषयाभिलाषी विषमः कोपनः क्षुद्रः छलान्वेषी नृपः स प्रकृतेनैव दण्डेन अमात्यादिना कोपाद् अधर्माद्वा विनाश्यते।

**असमीयानुवाद :**

ৰজাই দণ্ড সম্যকভাৱে প্ৰনয়ন কৰি ত্ৰিবৰ্গৰ দ্বাৰা বৃদ্ধিপ্ৰাপ্ত হয়। বিষয়াভিলাষী, ক্ৰোধমুক্ত, ছলান্বেষীজনৰ দণ্ডৰ দ্বাৰাই বিনাশ হয়।

**श्लोकसंख्या २८**

**दण्डो हि सुमहत्तेजो दुर्धरश्चाकृतात्मभिः ।**
**धर्माद्विचलितं हन्ति नृपमेव सबान्धवम् ॥**

**अन्वयः** दण्डः हि सुमहत् तेजः अकृतात्मभिः दुर्धरः धर्मात् विचलितं नृपम् सबान्धवम् एव हन्ति।

**शब्दार्थः**

सुमहत्तेजः - प्रकृष्टतेजः

अकृतात्मभिः - अजितेन्द्रियै

दुर्धरः - धारयितुं अशक्यः

सबान्धवम् - पुत्रबन्धुसहितम्

**व्याख्या**

यतो दण्डः प्रकृष्टतेजोस्वरुपः स्वशास्त्रैरसंस्कृतात्मभिः दुःखेन ध्रियतेऽतो राजधर्मरहितं नृपमेव पुत्रबन्धुसहितं नाशयति।

**असमीयानुवादः**

অজিতেন্দ্রিয় ৰজাই অত্যন্ত তেজস্বৰূপ দণ্ডৰ সম্যকভাৱে ধাৰন কৰিবলৈ অক্ষম। ধর্মৰ পৰা বিচলিত হ'লে (দণ্ডই) ৰজাক আত্মীয়স্বজনৰ সৈতে নাশ কৰে।

**श्लोकसंख्या २९**

**ततो दुर्गं च राष्ट्रं च लोकं च सचराचरम्।**
**अन्तरिक्षगतांश्चैव मुनीन्देवांश्च पीडयेत्॥**

**अन्वयः** ततः दुर्गं राष्ट्रं च सचराचरं लोकम् च अन्तरिक्षगतान् मुनीन् च देवान् पीडयेत्।

**शब्दार्थः**

सचराचरं – जङ्गमस्थावरसहितं

लोकम् – पृथिवीम्

अन्तरिक्षगतान् – द्युलोकगतान्

**व्याख्या**

दोषाद्यनपेक्षया यो दण्डः क्रियते स बन्धुनृपनाशानन्तरं धन्व्यादिदुर्गराष्ट्रं देशं पृथिवीलोकं जङ्गमस्थावरसहितं 'हविः प्रदानजीवनादेवाः' इति श्रुत्या हविः प्रदानाभावेऽन्तरिक्षगतानृषीन्देवांश्च पीडयेदिति।

**सरलव्याख्या**

ततो राज्ञि विनष्टे रक्षकाभावात् दुर्गं राज्यं तदीयलोकमिमं सचराचरं जङ्गमस्थावरसहितं देवांश्च हविर्दानाद्यभावेन पीडयेत्।

**असमीयानुवाद:**

(ৰজাৰ বিনাশৰ পাছত) দুর্গ, ৰাষ্ট্ৰ, জঙ্গমস্থাৱৰসহিতে পৃথিৱীলোকক আৰু অন্তৰীক্ষগামী মুনি আৰু দেৱতাসকলকো পীড়া দিয়ে ।

**श्लोकसंख्या ३०**

**सोऽसहायेन मूढेन लुब्धेनाकृतबुद्धिना।**
**न शक्यो न्यायतो नेतुं सक्तेने विषयेषु च॥**

**अन्वयः** असहायेन मूढेन लुब्धेन अकृतबुद्धिना च विषयेषु सक्तेन सः न्यायतः नेतुं न शक्यः।

**शब्दार्थः**

असहायेन - सहायरहितेन
मूढेन - मूर्खेन
लुब्धेन - लोभवता
अकृतबुद्धिना - शास्त्रानभिज्ञेन
नेतुं - प्रणेतुं

**व्याख्या**

स दण्डो मन्त्रिसेनापतिपुरोहितादि सहायरहितेन मूर्खेण लोभवता शास्त्रसंस्कृतबुद्धिपरेण नृपतिना शास्त्रतो न प्रणेतुं शक्यते।

**असमीयानुवादः**

সহায়হীন, মূৰ্খ, লোভী, শাস্ত্রজ্ঞানহীন বিষয়ত আসক্তজনৰ দ্বাৰা (ৰজাৰ দ্বাৰা) ইয়াক (দণ্ডক) ন্যায় অনুসৰি প্রণয়ন কৰিব নোৱাৰি ।

**श्लोकसंख्या ३१**

**शुचिना सत्यसंधेन यथाशास्त्रानुसारिणा ।**
**प्रणेतुं शक्यते दण्डः सुसहायेन धीमता ।।**

**अन्वयः** शुचिना सत्यसन्धेन यथाशास्त्र-अनुसारिणा सुसहायेन धीमता दण्डः प्रणेतुं शक्यते ।

**शब्दार्थः**

शुचिना – अर्थादिशौचयुक्तेन
सत्यसन्धेन – सत्यप्रतिज्ञेन
सुसहायेन – शोभनसहायेन
धीमता – प्राज्ञेन

**व्याख्या**

अर्थादिशौचयुक्तेन सत्यप्रतिज्ञेन यथाशास्त्रव्यवहारिणा शोभनसहायेन तत्त्वज्ञेन कर्तुं शक्य इति पूर्वोक्तदोषप्रतिपक्षे गुणा अनेन श्लोकेनोक्ताः ।

**असमीयानुवादः**

পবিত্র, সত্যপ্রতিজ্ঞ, শাস্ত্র অনুসৰি আচৰণকাৰী, সুসহায়সম্পন্ন, বুদ্ধিমানৰ দ্বাৰা (ৰজাৰ দ্বাৰা) দণ্ড প্রণয়ন কৰিব পাৰি ।

**श्लोकसंख्या ३२**

**स्वराष्ट्रे न्यायवृत्तः स्याद्भृशदण्डश्च शत्रुषु।**
**सुहृत्स्वजिह्मः स्निग्धेषु ब्राह्मणेषु क्षमान्वितः॥**

**अन्वयः** स्वराष्ट्रे न्यायवृत्तः च शत्रुषु भृशदण्डः स्निग्धेषु सुहृत्सु अजिह्मः ब्राह्मणेषु क्षमान्वितः स्यात्।

**शब्दार्थः**

स्वराष्ट्रे - आत्मदेशे
न्यायवृत्तः - शास्त्रानुसारव्यवहारी
शत्रुषु - शत्रुविषयेषु
भृशदण्डः - तीक्ष्णदण्डयुक्तः
स्निग्धेषु - स्नेहविषयेषु
सुहृत्सु - मित्रेषु
अजिह्मः - अकुटिल :

**व्याख्या**

आत्मदेशे यथाशास्त्रव्यवहारी स्यात् शत्रुविषयेषु तीक्ष्णदण्डो भवेत् स्नेहविषयेषु मित्रेषु अकुटिलः स्यात् न कार्यमित्रेषु ब्राह्मणेषु च कृताल्पापराधेषु च क्षमावान् भवेत।

**असमीयानुवादः**

নিজৰ দেশত (ৰজা) শাস্ত্রানুসৰি আচৰণকাৰী, শত্রুৰ ক্ষেত্রত তীক্ষ্ণ দণ্ডযুক্ত হ'ব লাগে, স্নেহৰ পাত্র মিত্রসকলৰ ক্ষেত্রত অকুটিল আৰু ব্রাহ্মণৰ ক্ষেত্রত ক্ষমাশীল হোৱা উচিত ।

**श्लोकसंख्या ३३**

**एवं वृत्तस्य नृपतेः शिलोञ्छेनापि जीवतः।**

**विस्तीर्यते यशो लोके तैलबिन्दुरिवाम्भसि ॥**

**अन्वयः** एवं वृत्तस्य नृपतेः शिलोच्छेन अपि जीवतः यशः अम्भसि तैलबिन्दुः इव लोके विस्तीर्यते।

**शब्दार्थः**

वृत्तस्य - आचारस्य
शिलोच्छेन - क्षीणकोशत्वेन
अभ्भसि - जले
लोके - जगति
विस्तीर्यते - विस्तारयति

**व्याख्या**

शिलोच्छेनेति क्षीणकोशत्वं विवक्षितम् । क्षीणकोशस्यापि नृपतेरुक्ताचारवतो जले तैलविन्दुरिव कीर्तिलोके विस्तारमेति।

**असमीयानुवादः**

এনে আচৰণসম্পন্ন হ'লে ৰজা ক্ষীণবৃত্তৰে জীয়াই থাকিলেও ৰজাৰ যশ পৃথিৱীত পানীত তেলৰ বিন্দুৰে বিস্তাৰ লাভ কৰাৰ দৰে বিস্তাৰিত হয় ।

**श्लोकसंख्या ३४**

**अतस्तु विपरीतस्य नृपतेरजितात्मनः।**
**संक्षिप्यते यशो लोके घृतबिन्दुरिवाम्भसि ।।**

**अन्वयः** अतः तु विपरीतस्य अजितात्मनः नृपतेः यशः अम्भसि धृतबिन्दुरिव लोके संक्षिप्यते।

**शब्दार्थः**

अजितात्मनः – धनलोभवश्यात्मनः
संक्षिप्यते – संकोचयति

**व्याख्या**

उक्ताचारात् विपरीताचारवतो नृपतेरजितेन्द्रियस्य जले घृतबिन्दुरिव कीर्तिः लोके संकोचयति।

**असमीयानुवादः**

ইয়াৰ (স্বভাৱৰ) বিপৰীতে আচৰণ কৰা অজিতেন্দ্রিয়, নৃপতিৰ যশ পৃথিৱীত পানীত মিহলি হোৱা, ঘৃতবিন্দুৰ দৰে সংকুচিত হয় ।

## ६.४. संस्कृतसारांशः

राज्ञः प्रयोजनसिद्धये ईश्वरः दण्डं सृष्टवान्। एषः दण्डः सर्वेषां प्राणिनां रक्षकः अस्ति यतोहि दण्डभयात् कोऽपि नियमात् व्यभिचरितुं न शक्नोति। सर्वे प्राणिनः दण्डभयात् जगति भोक्तुं समर्थाः भवन्ति। दण्डः वस्तुतः नेता, शासकः चतुर्णाम् आश्रमानां धर्मस्य च प्रतिभूस्वरुपः। दण्डः हि सर्वाः प्रजाः कर्तव्यादिषु स्थापयति, वस्तुतः प्रजाः शास्ति रक्षति च। राजा सम्यक् विचार्य लोभादिपरित्यागेन दण्डस्य प्रयोगं कुर्यात्, अन्यथा दण्डः सर्वेषां विनाशं करोति। राजा यदि अनलसो भूत्वा दण्डार्हं न दण्डयति तर्हि जगति अराजकता वर्धते। देवदानवखगसर्पाः सर्वे एव दण्डभीताः भवन्ति। सर्वमिदं जगत् दण्डभयात् भोगं कर्तुं समर्थं भवति। यः राजा दण्डं सम्यक् प्रयोगं करोति, सः धर्मार्थकामैः वृद्धिं लभते। किन्तु यदि राजा क्रोधादिषु विषयेषु आसक्तः भवति तस्य राज्ञः अपि आत्मीयस्वजनसहितं विनाशं भवति। यतः दण्डः प्रकृष्टतेजस्वरूपः, अन्यायवर्तिनं राजानमेव विनाशयति। राज्ञि विनष्टे रक्षकाभावात् दुर्गं, राज्यं, सचराचरं लोकं, देवान्, सर्वान् दण्डः पीडयेत्। दण्डः मूढेन, अकृतबुद्धिना एतादृशेन राज्ञा न्यायतः प्रवर्तियतुं न शक्यते। शुचिना, धीमता, सुसहायेन राज्ञा सम्यक् दण्डं प्रणेतुं शक्यते। दण्डः सदैव शत्रुविषये तीक्ष्णः अपि च स्निग्धविषये अकुटिलः भवेत्। ब्राह्मणानां प्रति अविचलः क्षमाशीलः च भवेत्। तादृशव्यवहारयुक्तस्य राज्ञः कीर्तिः जगति प्रसरति।

## ६.५. केषाचनं श्लोकानां व्याख्या

**श्लोकसंख्या १४.**

**तस्यार्थे सर्वभूतानां गोप्तारं धर्ममात्मजम्।**
**ब्रह्मतेजोमयं दण्डसृजत्पूर्वमीश्वरः।।**

उपयुक्तः श्लोकोऽयं मनुसंहितायाः सप्तमोऽध्यायस्य अन्तर्गतोऽस्ति।

अस्मिन् श्लोके राजदण्डस्य उत्पत्तिर्वर्णना वर्णिताऽस्ति।

मनुसंहितायां मनुः कथयति यत् राज्ञः प्रयोजनसिद्धये ईश्वरः दण्डं सृष्टवान्। एसः दण्डः सर्वेषां प्राणिनां रक्षकोऽस्तिायतोहि दण्डभयात् कोऽपि नियमात् व्यभिचरितुं न शक्नोति । दण्डः सर्वान् प्रजान् कर्तव्यादिषु स्थापति। यतः दण्डः प्रकृष्टः तेजस्वरुपः ,अन्यायवर्तिनं राजानामेव विनाशयति। राज्ञः प्रयोजन सिद्धयैव सर्वप्राणिनां रक्षितारं धर्मस्वरूपं पुत्रं दण्डं ब्रह्मणः तेजेन निर्मितम्। दण्डोऽयं न पञ्चथै अपितु प्रकृष्टः तेजस्वरुपः ।

**श्लोकसंख्यां १९**

**समीक्ष्य स धृतः सम्यक्सर्वा रञ्जयति प्रजा।**
**असमीक्ष्य प्रणीतस्तु विनाशयति सर्वतः ।।**

श्लोकोऽयं मनुसंहितायाः सप्तमोऽध्यायात् उद्धृतोऽस्ति।

श्लोकेऽस्मिन् शास्त्रविहितदण्डस्य प्रयेगविधिविषये उल्लिखितमस्ति।

दण्डः सर्वेषां प्राणिनां रक्षकोऽस्ति अतः दण्डस्य प्रयोगः सर्वथा शास्त्रविहितनियमानुसारमेव भवेत् इति मनुः प्रतिपादयति । दण्डः वस्तुतः नेता,शासकः चतुर्णाम् आश्रमानां धर्मस्य च प्रतिभुस्वरुपः । राजा सम्यक् विचार्य लोभादिपरित्यागेन दण्डस्य प्रयोगं कुर्यात्, अन्यथा दण्डः सर्वेषां विनाशं करोति।यतः दण्डः प्रकृष्टः तेजस्वरूप अन्यायवर्तिनं राजानमेव विनाशयति। दण्डः मूढेन , अकृत बुद्धिना राज्ञा न्यामतः प्रवर्तयितुं न शक्यते।शुचिता,धीमता,सुसहायेन राज्ञैव सम्यक् दण्डं प्रणेतुं शक्यते। किन्तु यदि राजा क्रोधादिषु विषयेषु आसक्तं भवति तस्य राज्ञः आत्मीयस्वजनसहितं विनाशं भवति ।

**श्लोकसंख्या ३३**

**एवं वृत्तस्य नृपतेः शिलोद्देनापि जीवंतः ।**
**विस्तीर्यते यशो लोके तैलबिन्दुरिवाम्भसि।।**

श्लोकोऽयं मनुसंहितायाः सप्तमोऽध्यायात् उद्धृतोऽस्ति ।

श्लोकेऽस्मिन् शास्त्रानुसारं दण्डप्रणीतराज्ञः यशवृद्धिर्विषये उल्लिखित ।

दण्डोऽस्ति सर्वेषां प्राणिनां रक्षकः । सर्वमिदं जगत् दण्डभयात् भोगं कर्तुं समर्थं भवति।यः राजा दण्डं सम्यक् प्रयोगं करोति,सः धर्मार्थकामैः वृद्धिं लभते। किन्तु यदि राजा क्रोधादिषु विषयेषु आसक्तः भवति तस्य राज्ञः अपि

आत्मीयस्वजनसहितं विनाशं भवति । दण्डः सदैव शत्रुविषये तीक्ष्णः अपि च स्निग्धविषयेषु अकुटिलः भवेत्। ब्राह्मणान् प्रति अविचलः क्षमाशीलः भवेत् । तादृश्यव्यवहारयुक्तस्य राज्ञः कीर्तिः जले तैलविन्दुरिव जगति प्रसरति।

## ६.६ सन्धियुक्तशब्दानां सन्धिविच्छेदः

| श्लोकसंख्या | सन्धियुक्तशब्दः | सन्धिविच्छेदः |
|---|---|---|
| १४ | तस्यार्थे धर्ममात्मजम् | तस्य+अर्थे धर्मम्+ आत्मजम् |
| | दण्डमसृजत्पूर्वमीश्वरः | दण्डम्+ असृजत्+पूर्वम्+ईश्वरः |
| १५ | भयाद्भोगाय स्वधर्मान्न | भयात्+भोगाय स्वधर्मात् + न |
| १६ | सम्प्रणयेन्नरेष्वन्यायवर्तिषु | सम्प्रणयेत्+ नरेषु+अन्यायवर्तिषु |
| १८ | एवाभिरक्षति दण्डेष्वतन्द्रितः | एवं+अभिरक्षति |
| २० | दण्डेषु+ अतन्द्रितः | |
| | मत्स्यानिवापक्ष्यन्दुर्बलान्बलवन्तरा | मत्स्यान्+इव+अपक्ष्यन्+ दुर्बलान्+अबलवन्तरा |
| २१ | अद्यात्काकः लिह्याद्धविस्तथा | अद्यात्+काकः लिह्यात्+ हविः+ तथा |
| | स्यात्कस्मिंच्चित्प्रवर्तताधरोत्तरम् | स्यात्+कस्मिन्+चित्+प्रवर्तते+ अधरः+उत्तरं |
| २२ | भयात्सर्वं जगद्भोगाय | भयात्+ सर्वं जगत्+ भोगाय |
| २४ | भिद्येरन्सर्वसेतवः | भिद्येरन्+ सर्वसेतवः |
| २८ | दण्डश्चरति चेत्साधुः | दण्डः+ चरति चेत्+ साधुः |
| २६ | तस्याहु | तस्य + आहुः |
| २७ | प्रणयन्सम्यक् त्रिवर्गेणाभिबर्धते | प्रणयन्+ सम्यक् त्रिवर्गेण+ अभिबर्धते दण्डेनैव दण्डेन+ एव |
| २८ | दुर्धरश्चाकृताम्थाभिः धर्माद्विचलितं | दुर्धरः+च+ अकृताम्थाभि धर्मात्+ विचलितं |
| २९ | मुनीन्द्रेबांश्च | मुनीन्+ देवान्+ च |
| ३० | लुब्धेनाकृतबुद्धिना | लुब्धेन+ अकृतबुद्धिना |
| ३१ | स्याद्भृशदण्डश्च | स्यात्+ भृशत्+ दण्डः+ च |
| ३२ | शिलोच्छेनापि | शिलोच्छेन+ अपि |

| | | |
|---|---|---|
| ३३ | तैलविन्दुरिवाम्भसि | तैलविन्दुः+ इव+ अम्भसि |
| ३४ | नृपतेरजितात्मन: | नृपतेः+ अजितात्मन |

## ৩৬.৭ अध्यायस्य असमीयासारांशः

ৰজাৰ প্ৰয়োজন সিদ্ধিৰ বাবে ঈশ্বৰে দণ্ডৰ সৃষ্টি কৰিছিল । এই দণ্ড সকলো প্ৰাণীৰেই ৰক্ষক কিয়নো দণ্ডৰ ভয়ত কোনেও নিয়মৰ পৰা বিচলিত হ`ব নোৱাৰে । দণ্ডৰ ভয়ৰ বাবেই সকলো প্ৰাণীয়ে এই জগতত ভোগ কৰিবলৈ সমৰ্থ হয় । দণ্ডই হৈছে নেতা, শাসক, চাৰিখন আশ্ৰমৰ আৰু ধৰ্মৰ প্ৰতিভূস্বৰূপ । দণ্ডই সকলো প্ৰাণীকেই স্বকীয় কৰ্তব্যত স্থাপন কৰে, বস্তুতঃ দণ্ডই প্ৰজাগনক শাসন আৰু ৰক্ষা কৰে । ৰজাই যথাযথভাৱে বিচাৰ কৰি লোভাদিবিষয় ত্যাগ কৰি দণ্ডৰ প্ৰয়োগ কৰিব লাগে, অন্যথা দণ্ডই সকলোৰে বিনাশ সাধন কৰে । ৰজাই যদি অনলস হৈ দণ্ডযোগ্যজনক দণ্ড প্ৰদান নকৰে, তেনেহ`লে জগতত অৰাজকতাৰ বৃদ্ধি হ`ব । দেৱতা, দানৱ, পক্ষী, সৰ্প সকলোবোৰ দণ্ডৰ ভীতিগ্ৰস্থ । এই সমস্ত জগতখনে দণ্ডৰ ভয়তেই ভোগ কৰিবলৈ সমৰ্থ হৈছে । যিজন ৰজাই দণ্ড ভালদৰে প্ৰয়োগ কৰে, সেই ৰজাৰ ধৰ্ম, অৰ্থ আৰু কামৰ দ্বাৰা বৃদ্ধি হয় । কিন্তু যদি ৰজাই ক্ৰোধাদিবিষয়ত আসক্ত হয় সেই ৰজাৰ দণ্ডৰ দ্বাৰাই আত্মীয়স্বজনসহিতে বিনাশ হয় । যিহেতু দণ্ড অত্যন্ততেজস্বৰূপ, সেয়ে অন্যায়যুক্ত ৰজাকো এই দণ্ডই বিনাশ কৰে । ৰজাৰ বিনাশৰ পাছত দুৰ্গ, ৰাজ্য এই চৰাচৰজগত, দেৱতা সকলোবোৰকে দণ্ডই পীড়া দিয়ে । মূৰ্খ, শাস্ত্ৰজ্ঞানহীন ৰজাই ন্যায়সংগত দণ্ড প্ৰদান কৰিব নোৱাৰে । পবিত্ৰ, বুদ্ধিমান, সুসহায়সম্পন্ন ৰজাইহে যথাযথভাৱে দণ্ড প্ৰদান কৰিব পাৰে । দণ্ড শত্ৰুৰ ক্ষেত্ৰত সদায় তীক্ষ্ণ আৰু স্নেহৰ ক্ষেত্ৰত সদায় অকুটিল হ`ব লাগে । ব্ৰাহ্মণৰ ক্ষেত্ৰত দণ্ড অবিচলিত আৰু ক্ষমাশীল হোৱা উচিত । এনেধৰণৰ আচাৰযুক্ত ৰজাৰ কীৰ্তি সমগ্ৰ জগততেই প্ৰসাৰিত হয় ।

## ৭৬.৮. अध्यायात् किमवगतम्

• अस्य अध्ययनानन्तरं भवद्भिः राज्ञः लक्षणं, तस्य प्रजायाः संरक्षणार्थं करणीयम् दण्डविधानम् ज्ञातुं शक्यन्ते ।

• दण्डेन निपीडिताः इन्द्राग्निसूर्यादयो देवाः दानवगन्धर्वराक्षसादयश्च परोपकाराय स्वकायार्थं प्रवर्तिताः भवन्ति।

• यत्र श्यामः लोहिताक्षः पापहा अधिष्ठातृ देवताको दण्डो विचरति तत्र प्रजाः व्याकुलाः न भवन्ति । दण्डप्रणेता यदि विषयानुरूपं सम्यग्जानाति ।

• राजा स्वदेशे यथाशास्त्रव्यवहारी स्यात्, शत्रुविषयेषु तीक्ष्णदण्डो भवेत्, स्नेहविषयेषु मित्रेषु अकुटिलः स्याद् न कार्यमित्रेषु ब्राह्मणेषु च कृतात्पापराधेषु च क्षमावान् भवेत् ।

## ✓६.९ ज्ञानाधिक्यम्


- दवे, जयन्त कृष्णः (१९७२), मनुस्मृतिः, ( मेधातिथि- सर्वज्ञनारायण – कुल्लुक – राघवानन्द-नन्दन – रामचन्द्र – मणिराम – गोविन्दराज – भारुचि इति व्याख्यानवकेन समलंकृता), भारतीय विद्या भवनम्, मुम्बाईः ।
- नेने, गोपालशास्त्री, (१९७०), मनुस्मृतिः, चौथम्बा संस्कृत सीरीज आफिस, वाराणसी ।
- शर्मा, किरणः, (२००८) मनुसंहिता, चन्द्रप्रकाशः, गुवाहाटी ।


## ⍰६.१०. अभ्यासप्रश्नाः

**लघुप्रश्नाः**

**प्रश्नः१** दण्डभयात् प्राणिनः किं कुर्वन्ति ?

**प्रश्नः२** यदा दण्डः सम्यक् प्रयुक्तः भवति, तदा किं भवति ?

**निबन्धप्रश्नाः**

**प्रश्नः१** मनुस्मृतेः सप्तमोऽध्यायस्य चर्तुदशश्लोकतः चतुर्त्रिंशत् श्लोकपर्यन्तं श्लोकानां विषयवस्तुनः सारांशं लिख्यताम् ।

**प्रश्नः२** दण्डस्य उचितप्रयोगस्य लाभविषये अनुचितप्रयोगस्य हानिविषये च सविस्तरं लिख्यताम् ।

*****

# अध्याय- ७ नारदस्मृतिः (सामान्याध्ययनम्)

## अध्यायसंरचना

७.१ उद्देश्यम्

७.२ परिचयः

७.३ स्मृतेः संक्षिप्तपरिचयः

७.४ धर्मशास्त्रस्य स्मृतेः वा मुख्यविषयः

७.५ धर्मविषयकप्राचीनग्रंथाः धर्मसूत्राणि

७.६ स्मृतीनां संख्या

७.७ स्मृत्याः विषयवस्तु

७.८ केचन प्रमुखाः स्मृतयः

७.९ नारदस्मृतिः

७.९.१ नारदस्मृतेः रचनाकालः

७.९.२ नारदस्मृते विषयवस्तुः

७.९.३ नारदस्मृतिसंकलनम्

७.९.४ नारदस्मृतिव्याख्याकारः

७.१० अध्यायस्य असमीयासारांशः

७.११ अग्रगत्याः निरूपणम्

७.१२ अध्यायात् किमवगतम्

७.१३ अभ्यासप्रश्नाः

## ७.१ उद्देश्यम्

अनेन अध्यायेन अध्ययनं कृत्वा भवन्तः –

• स्मृतिसाहित्यविषयकं ज्ञानं प्राप्तुं शक्नुवन्ति।

• स्मृतिसाहित्यस्य स्रोतविषये ज्ञातुं शक्नुवन्ति।

• नारदस्मृतिसविषयकं ज्ञानं प्राप्तुं शक्नुवन्ति।

• नारदस्मृतिकालविषये अवगन्तुं शक्नुवन्ति।

• नारदस्मृतिसम्बद्धानि विभिन्नानि अध्यायानि परिष्कृत्य परिचयं प्राप्नुवन्ति।

• नारदस्मृतेः भाष्यकाराणां विषये ज्ञानं प्राप्नुवन्ति।

## ७.२ परिचयः

भारतीयसाहित्यानां विकासे वेदपुराणमहाकाव्यानां पश्चात् स्मृतिसाहित्यस्य महत्त्वपूर्णं स्थानं अस्ति । सुसङ्गठितं सुसंस्कृतं च समाजं निर्मातुं नीति-नियमाः आचार-व्यवहाराः विधि-व्यवस्थाश्च अत्यावश्यकाः। यद्यपि कश्चन समाजः नियमान् आचारान् च न अनुवर्तते, तर्हि तत्र अराजकता अनीतिश्च भवितुमर्हति। अस्य परिणामतः समाजः अधःपतनाभिमुखं गन्तुमर्हति। अतएव प्राचीनाः ऋषयः मुनयः च तथा समाजसंस्कारकाः समाजस्य हितं दृष्ट्वा विविधान् नीति-नियमान् आचार-विधीन् च प्रणीतवन्तः, स्वज्ञानं च लिपिबद्धं कृतवन्तः। एते लिपिबद्धग्रन्थाः "स्मृति" इति अभिहिताः भवन्ति ।

स्मृतिसाहित्यं धर्मशास्त्रस्य अन्यं रूपं इति वक्तुं शक्यते। एषु स्मृतिग्रन्थेषु मुख्यतः त्रयः विषयाः चर्च्यन्ते— आचारः, व्यवहारः, प्रायश्चित्तं च। आचारः नाम दैनिकजीवनकृतनियमाः, व्यवहारः समाजे स्थितानां न्यायिक-वैधानिकपक्षानां चर्चा, तथा प्रायश्चित्तं दोषपरिहारस्य उपायः। प्राचीनभारतं यत्र बहवः ऋषिमुनयः समाजस्य उन्नतिः हेतोः स्मृतिग्रन्थान् लिखितवन्तः। उल्लेखनीयं यत् शतमेकं स्मृतिग्रन्थानां नामानि विभिन्नसाहित्ये दृश्यन्ते ।

एषु स्मृतिग्रन्थेषु मनुस्मृतिः, याज्ञवल्क्यस्मृतिः, पराशरस्मृतिः, नारदस्मृतिः, बृहस्पतिस्मृतिः, कात्यायनस्मृतिः च सर्वाधिकाः प्रसिद्धाः। एते ग्रन्थाः न केवलं समाजस्य नियमनिर्धारणे अपि च मानवानां जीवनयापनं शृङ्खलितं कृत्वा समाजस्य प्रगतिमार्गे नेतृत्वं कृतवन्तः ।

नारदस्मृतिः, या "नारदस्य स्मृतिः" इति कथ्यते, स्मृतिसाहित्यानां प्रमुखभागरूपेण प्रसिद्धा । विविधसाहित्येषु नारदस्मृतिशास्त्रस्य उल्लेखः अस्ति, तथा अस्य विधिनियमाः व्यवहाराय प्रयुक्ताः इति स्पष्टप्रमाणानि अपि लभ्यन्ते । अस्मिन् स्मृतिग्रन्थे सामाजिक, आर्थिक, न्यायिक च विषयानां विशेषतया चर्चा कृता वर्तते । विशेषतः न्यायव्यवस्थायां नारदस्मृतिः प्रमुखदस्तावेजरूपेण परिगण्यते ।

## ७.३ स्मृतेः संक्षिप्तपरिचयः

स्मृतिः साहित्यस्य शाखा अस्ति, यत्र पारम्परिकाचारविधयः, नियमाः, तथा प्राचीनन्यायव्यवस्था लिपिबद्धाः सन्ति। 'शब्दकल्पद्रुमः' नामके कोशग्रन्थे उल्लिखितं यत् मन्वादयः महर्षयः वेदार्थस्मरणयज्ञेन स्मृतेः सृष्टिं कृतवन्तः (महर्षिभिर्वेदार्थस्मरणं स्मृतिः)। अतः स्मृतिः मूलतः एकं व्यवस्था-शास्त्रम् इति गण्यते । उच्यते यत् प्राचीनकाले मनुः, याज्ञवल्क्यादयः ऋषयः मुखेन व्यवस्थाविषयकं ज्ञानं शिष्यान् उपादिशन् । कालान्तरेण ते ऋषयः स्वस्मृतिमाधारित्य तान् नियमान् लिपिबद्धान् अकुर्वन् । अतः, एतेषां ग्रन्थानां वर्गः "स्मृति" इति नाम्ना अभिहितः। 'स्मृति' इति शब्दस्य द्वौ अर्थौ स्तः । व्यापकार्थे, एतत् वेदातिरिक्तं अन्यं साहित्यं, यथा पाणिनेः

व्याकरणं, श्रौतसूत्रं, गृह्यसूत्रं, धर्मसूत्रं, महाभारतं, मनु-याज्ञवल्क्यादीनां ग्रन्थान् च बोधयति। किन्तु संकीर्णार्थे, 'स्मृति' इति शब्दः केवलं स्मृतिसाहित्यं वा धर्मशास्त्रं एव सूचयति, यत् वास्तवतः एकमेव।

आचार्यः मनुः स्वलिखित – मनुसंहितायां द्वितीयाध्याये वदति यत् स्मृतिः धर्मशास्त्रम् इति ज्ञायते, तथा धर्मशास्त्रमेव स्मृति-शब्देन अभिहितं भवति। मुनयः वदन्ति यत् वेदः, स्मृतिः, सदाचारः, स्वस्य च प्रियमात्मनः इत्येतानि धर्मस्य मुख्यलक्षणानि। मनुसंहितायाम् एषा वाणी एवं व्यक्ता—

"वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम्॥" (मनुसंहिता, २/१२)

मनुः अपि उक्तवान् यत् वेदः श्रुतिः, धर्मशास्त्रं च 'स्मृतिः' इति ज्ञातव्यम्। एतौ उभौ ग्रन्थौ विवादपरिधेः बहिर्भूतौ स्थातव्यौ, यतः धर्मस्य उत्पत्तिः एभ्यः एव जाता। मनुसंहितायाम् उक्तम्—

"श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः।
ते सर्वार्थेष्वमीमांस्ये मान्ये ताभ्यां धर्मो हि निर्बभौ॥" (मनुसंहिता २/१०)

मनुसंहितायाः भाष्यकारः कुल्लूकभट्टः अस्य श्लोकस्य व्याख्यायां उल्लेखं करोति यत् वेदः 'श्रुति' इति ज्ञायते, तथा मनुयाज्ञवल्क्यादीनां शास्त्राणि 'स्मृति' इति ज्ञायते। यतो हि एतौ द्वौ अपि धर्मस्य प्रतिबिम्बं दर्शयतः। सः अपरं अपि उल्लेखयति यत् एषः विषयः कस्यापि प्रतिकूलतर्कविषयः न भवति। अन्यः एकः भाष्यकारः मेधातिथिः अपि वेदं धर्मानुशासनस्य मूलं इति स्वीकृत्य वदति— यत्र धर्मस्य उपदेशः श्रूयते तत् 'श्रुति' इति, तथा यत्र सः स्मर्यते तत् 'स्मृति' इति।

वेदनिष्णाताः ऋषयः मुनयश्च वेदं आधृत्य आचारविधेः व्यवहारस्य च विषयेषु चिन्तनं कृत्वा यान् नियमान् रचितवन्तः, तानि एव स्मृतयः। एते ऋषयः मुनयश्च वेदं ब्राह्मणं च उपनिषत् च गभीरमध्ययनेन अधीत्य तस्मात् यागयज्ञाचारानुष्ठाननीतिनियमप्रतिषेधज्ञानं प्राप्तवन्तः। यत्र ज्ञानाधारेण ये ग्रन्थाः रचिताः, ते एव स्मृतयः इति अभिहिताः। यतः वेदः सर्वधर्माणां मूलम् इति धार्यते (वेदोऽखिलधर्ममूलम्), तस्मात् स्मृतयः अपि पूर्णरूपेण वेदं आधृत्य रचिताः। अतः एव, स्मृतयः धर्मशास्त्रस्य समानार्थकत्वेन गण्यन्ते।

वेदः अपौरुषेयः, अर्थात् वेदः कस्यचित्पुरुषेण न रचितः। महर्षयः वेदमन्त्रान् दृष्टवन्तः, ते स्रष्टारः न, अपितु केवलं द्रष्टारः। किन्तु स्मृतयः पूर्णतः लौकिकाः, ताः ऋषिभिः विभिन्नकालेषु रचिताः। सर्वासां स्मृतिनां मूलाधारः वेदः एव। स्मृतिषु स्थितं यत्किञ्चिद् विषयं अस्ति ते वेदस्य कस्यचित् अंशे अवश्यमेव प्राप्यन्ते। यदि कश्चन विषयः वेदेषु न दृश्यते, तर्हि तत् कालप्रवाहे लुप्तम् इति धार्यते। कश्चित् अपि स्मृतिग्रन्थः वेदाधानं विना न रचितः।

अपरे पक्षे, यदि वेदस्मृत्योः मध्ये कस्यचित् विषये विरोधः दृश्यते, तर्हि प्रमाणरूपेण वेदमेव ग्रहणीयः-
'श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी।'

## ७.४ धर्मशास्त्रस्य स्मृतेः वा मुख्यविषयः -

धर्मशास्त्रं वा स्मृतेः इत्यस्य मुख्यविषयः 'धर्मः' एव। यद्यपि 'धर्म' इत्यस्य विविधार्थाः सन्ति, तथापि तस्य व्युत्पत्तिगतः अर्थः 'धारणम्' इति। संस्कृतस्य 'धृ' धातोः 'मनिन्' प्रत्ययेयोगेन 'धर्म' इति शब्दः उत्पन्नः, यस्य अर्थः भवति— येन समग्रं विश्वं धार्यते, सः एव धर्मः । समाजं वा राष्ट्रं वा सामाजिकनियमाः, आचारव्यवहारः, शिक्षासंस्कृतिः इत्यादिभिः सुशृङ्खलतया अग्रे नीयते, सः एव तस्य समाजस्य वा राष्ट्रस्य वा धर्मः । अस्मिन्परिप्रेक्ष्ये महाभारते उक्तम् यत् यत्र सर्वप्राणिनां कल्याणं निहितं भवति, स एव धर्मः।

अस्मात् ज्ञायते यत् धर्मस्य अन्तर्गताः सर्वे आचारव्यवहाराः न्यायनीतयश्च प्राणिनां कल्याणकामना इति मुख्यलक्ष्यम्। एवं महाभारते अपि उल्लिखितम्—

'धारणाद्धर्ममित्याहुः ऊधर्मेण विधृताः प्रजाः।' (महाभारत, १२/१०९/११)

अपि च—

'प्रभवार्थाय भूतानां धर्मप्रवचनं कृतम्।
यः स्यात् प्रभवसंयुक्तः स धर्म इति निश्चितम्॥' (महाभारत, १२/१०९/१०)

ऋग्वेदादिषु ग्रन्थेषु 'धर्म' इत्यस्य प्रयोगः धार्मिकविधेः, आचारस्य, संस्कारस्य च अर्थे प्रयुज्यते। ऋग्वेदस्य एका ऋचा अपि प्रमाणरूपेण दृश्यते—

'तानि धर्माणि प्रथमान्यासन्' (ऋग्वेद, १०.९०.१६)।

अथर्ववेदे 'धर्म' इत्यस्य प्रयोगः धार्मिकक्रियायाः तथा च संस्कारस्य फलस्वरूपार्जितगुणरूपेण वर्णितं अस्ति—
'ऋतं सत्यं तपो राष्ट्रं श्रमो धर्मश्च कर्म च।' (अथर्ववेद, १/९/१७)

अपि च, श्रीमद्भगवद्गीतायाम् उल्लिखितम्—

'स्वधर्मे निधनं श्रेयः।'

अर्थात्, स्वधर्मे स्थितिः एव श्रेष्ठा, यद्यपि जीवनस्य समाप्तिः भूयते।

तदुपरि, 'तन्त्रवार्तिकम्' ग्रन्थे धर्मशास्त्रस्य मुख्यकार्यम् अस्ति वर्णाश्रमधर्मस्य उपदेशप्रदानम् इति निर्दिष्टम्—

'सर्वधर्मसूत्राणां वर्णाश्रमधर्मोपदेशित्वात्।'

मनुसंहितायाः भाष्यकारः मेदातिथिः स्मृतिशास्त्रे धर्मस्य पञ्च स्वरूपानि उल्लिखितवान् । तानि सन्ति—
१. वर्णधर्मः, २. आश्रमधर्मः, ३. वर्णाश्रमधर्मः, ४. नैमित्तिकधर्मः, ५. गुणधर्मः च।

गौतमधर्मसूत्रस्य मतानुसारं, वेदः एव धर्मस्य मूलम् (वेदो धर्ममूलम्)। मनुः अपि उक्तवान् यत् धर्मस्य पञ्च अवयवाः सन्ति— संपूर्णः वेदः, वेदविदां परम्परा, सदाचारः, साधूनाम् आचारः, आत्मतुष्टिश्च। मनुसंहितायां तेन उक्तम्—
'वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च॥' (मनुसंहिता, २/६)।"

याज्ञवल्क्यमतानुसारं, धर्मस्य मूलोपादानानि सन्ति— वेदः, स्मृतिः (परम्परागतज्ञानम्), सदाचारः (सद्व्यवहारः), आत्मसन्तोषः, तथा च सम्यक् संकल्पतः उत्पन्नः कामः। तेनोक्तम्—
'श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
सम्यक् संकल्पजः कामो धर्ममूलमिदं स्मृतम्॥' (याज्ञवल्क्यः, १/७)।"

आचार्यः मनुः अपि धर्मस्य संज्ञां निरूप्य वेदं, स्मृतिम्, सदाचारं, आत्मसन्तोषं च धर्मस्य चत्वारि मुख्यलक्षणानि इति अभिहितवान्—

'श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम्॥' (मनुसंहिता, २/१२)।"

## ७.५. धर्मविषयकं प्राचीनधर्मसुत्राणि-

धर्मसूत्राणि प्राचीनभारतीयधर्मशास्त्रस्य अति महत्वपूर्णग्रन्थाः सन्ति, यानि वेदस्य मन्त्राणां सुबोधतां प्रदातुं उपायं ददाति। वेदः भारतीयसमाजस्य प्रमुखं धार्मिकी सम्पत्तिः अस्ति, वेदमन्त्राणां यथार्थं अर्थं ज्ञातुं विशेषग्रन्थाः निर्मिताः आसन्, यान् 'वेदाङ्ग' इति उच्यते । वेदाङ्गेषु षड्विशिष्टाः शाखाः सन्ति— शिक्षा, कल्पः, व्याकरणम्, निरुक्तम्, छन्दः, ज्योतिषम् चेति ।

एतानि अङ्गानि वेदमन्त्राणां बोधनाय साहाय्यं कुर्वन्ति, यथा कस्यचित् अङ्गस्य कार्यं भवति तथैव। तेषु 'कल्पः' इत्यत्र यज्ञस्य नियमसंग्रहितम् अस्ति, तथा च एतेषां कल्पस्य अधीने कल्पसूत्राणि तथा च धर्मसूत्राणि निर्मितानि । 'कल्पः' इत्यस्य अर्थः यज्ञस्य विधिः, अर्थात् वेदमन्त्राणां प्रयोगः कुत्र तथा कथं भवेत् इति निर्देशाः कल्पसूत्रेषु प्रकाश्यन्ते ।

कल्पसूत्राणां मुख्यं उद्देश्यं वेदमन्त्राणां यथोचितं प्रयोगं तथा च तेषां विधिं निर्देशनम्। एतानि कल्पसूत्राणि चतुर्धा विभक्तानि— श्रौतसूत्रम्, गृह्यसूत्रम्, धर्मसूत्रम्, शुल्बसूत्रम् च । श्रौतसूत्रेषु वैदिकयज्ञस्य तत्सम्बद्धनियमानां च वर्णनं क्रियते । गृह्यसूत्रेषु गृहस्थ्येन क्रियमाणाः संस्कारात्मकयज्ञाः, वार्षिकश्राद्धं तथा अन्ये धार्मिकाः अनुष्ठानाः चर्च्यन्ते। शुल्बसूत्रेषु यज्ञवेदी इत्यस्य, कुण्डस्य तथा अन्येषां यज्ञसम्बद्धोपकरणानां निर्माणविधयः उल्लिख्यन्ते । धर्मसूत्रेषु यज्ञस्य दार्शनिकदृष्टिकोणः, चतुर्णां वर्णानां कर्तव्यकार्याणि, चत्वार आश्रमाः, उपनयनविवाहादयः संस्काराः, वाचनार्थं कर्तव्यकार्याणि, न्यायविचारः, दण्डविधानम्, करकृत्यव्यवस्था, श्राद्धप्रायश्चित्तादीनां विषयाः चर्च्यन्ते । एतानि सर्वाणि धर्मशास्त्रस्य दिशा निरूपयन्ति तथा च समाजस्य नियमव्यवस्थायाः आधारं ददाति । धर्मसूत्रेषु एव श्रुति-स्मृति-सम्मताः सर्वे धार्मिकाचाराः पूर्णरूपेण प्रतिष्ठिताः।

वर्तमानकाले यानि धर्मसूत्राणि उपलब्धानि सन्ति, तानि अष्टसङ्ख्याकानि । तानि च— बौधायनधर्मसूत्रम्, गौतमधर्मसूत्रम्, आपस्तम्बधर्मसूत्रम्, हिरण्यकेशिधर्मसूत्रम्, वसिष्ठधर्मसूत्रम्, विष्णुधर्मसूत्रम्, वैखानसधर्मसूत्रम्, हारितधर्मसूत्रम् इति ।

एतानि धर्मसूत्राणि निश्चितं सुव्यवस्थितं च धार्मिकं संरचनाम् प्रतिष्ठापयन्ति, यत् वेदमन्त्राणां प्रामाण्यमनुसृत्य समाजे सदाचारस्य नियमानां च पालनाय साहाय्यं करोति ।

## ७.६. स्मृतीनां संख्याः -

स्मृतिग्रन्थानां संख्या प्रारम्भे अतिन्यूनाः आसीत् । गौतमस्य ग्रन्थे मनोः बहिः अन्यस्य कस्यापि स्मृतिकारस्य नाम उल्लेखितं नास्ति। बौधायनः स्वग्रन्थे सप्त स्मृतिकाराणां नामानि निर्दिशति, यानि— औपजङ्घनि, कात्यः, काश्यपः, गौतमः, प्रजापतिः, मौद्गल्यः, हारितः। वसिष्ठस्य मतानुसारं पञ्च स्मृतिकाराणां नामानि विद्यन्ते— गौतमः, प्रजापतिः, मनुः, यमः, हारितः। आचार्यः मनुः अपि आत्मान् विना षडस्मृतिकारान् निर्दिशति, ते च— अत्रिः, उत्तथ्यपुत्रः भृगुः, वसिष्ठः, वैखानसः, शौनकः। स्मृतिसंख्या यथावत् निर्दिष्टा नास्ति,

किन्तु कुल्लूकभट्टः 'तन्त्रवार्तिकम्' इति ग्रन्थे अष्टादश धर्मसंहिताः तथा स्मृतयः निर्दिशति। 'वीरमित्रोदयः' इति ग्रन्थे अष्टादश-मुख्यस्मृतयः, अष्टादश उपस्मृतयः, एकविंशति स्मृतिकाराणां च नामानि उल्लिख्यन्ते।

अष्टादश मुख्यस्मृतिकाराणां मध्ये मनुः, बृहस्पतिः, दक्षः, गौतमः, यमः, अङ्गिराः, योगीश्वरः, प्रचेताः, शातातपः, पराशरः, संवर्तः, उशनाः, शङ्खः, लिखितः, विष्णुः, आपस्तम्बः, हारितः चेति अन्तर्भूयन्ते। अष्टादश उपस्मृतिनां लेखकाः आसन्— नारदः, पुलहः, गार्ग्यः, पुलस्त्यः, शौनकः, क्रतुः, बौधायनः, जातुकर्णः, विश्वामित्रः, पितामहः, जाबालिः, नाचिकेतः, स्कन्दः, लौगाक्षिः, कश्यपः, व्यासः, सनत्कुमारः, शन्तनुजनकः चेति। तदुपरि, अन्ये एकविंशति स्मृतिकाराः उल्लिख्यन्ते— वसिष्ठः, नारदः, सुमन्तुः, पितामहः, विष्णुः, कार्षाजिनिः, सत्यव्रतः, गार्ग्यः, देबलः, जमदग्निः, भरद्वाजः, पुलस्त्यः, पुलहः, क्रतुः, आत्रेयः, गवेयः, मरीचिः, वत्सः, पारन्धरः, चर्ष्यशृङ्गः, वैजवापः।

भिन्नैः विद्वद्भिः मतानुसारेण स्मृतिग्रन्थानां संख्या शतसंख्यापर्यन्तं संभाव्यते। किन्तु याः स्मृतयः सर्वाधिकाः महत्वपूर्णाः मन्यन्ते, ताः एव प्रमाणीकृताः सन्ति। एतासु सर्वमान्येषु स्मृतिषु मनुः, याज्ञवल्क्यः, विष्णुः, बृहस्पतिः, कात्यायनः, पराशरः, गौतमः, अत्रिः, हारितः, व्यासः, दक्षः, उशनसः, यमः, आपस्तम्बः, वसिष्ठः, अङ्गिराः, भृगुः, नारदः इति नामानि सर्वाधिकं उल्लेखनीयानि।

## ७.७. स्मृत्याः विषयवस्तु-

पूर्वम् उल्लिखितं यत् स्मृतिषु मुख्यविषयाः आचारः, व्यवहारः, प्रायश्चित्तं च इत्येतानि। आचारः इत्युक्ते सदाचारः, सत्पुरुषाणां आचरणं वा। स्मृतिषु आचारस्य अन्तर्गतं केचन विषयाः चर्च्यन्ते, यथा वर्णाश्रमधर्माः, वर्णाश्रमनियमाः, षोडशसंस्काराः, चतुर्वर्णस्य कर्तव्याः अकर्तव्याः च, श्राद्धतर्पणविधयः, पतिपत्न्योः कर्तव्यानि दायित्वानि च, गृहस्थस्य तथा शिष्यगुर्वोः परस्परव्यवहारस्य विवरणम्।

स्मृतिषु 'व्यवहारः' इत्यस्य अर्थः वादविवादः इति। अत्र येभ्यः दोषेभ्यः निष्पत्तिः कारयते, तेषां परिसमाप्तिः, दोषिणं प्रति दण्डविधानं च चर्च्यते।

तदुपरि, स्मृतिषु 'प्रायश्चित्त' नामकः विषयः अपि अन्तर्भूतः अस्ति। आचार अथवा संस्कारसंबद्ध विधिनिषेधानां पालनं न कृत्वा यः दोषः वा पापं भवति, तस्मात् विमुक्तिं प्राप्तुं उपायः प्रायश्चित्तम् इत्युच्यते। एतत् सर्वेषां तेषां दोषाणां निमित्तं प्रयुज्यते, यानि राजकीयदण्डविधानस्य अधीने न पतन्ति, तेभ्यः मुक्त्यर्थं विशेषविधानं निर्दिष्टं भवति।

## ७.८. केचन प्रमुखाः स्मृतयः-

कस्याञ्चित् प्रमुखस्मृतिषु चर्चां कुर्वन्तः प्रथमं मनुस्मृतिं उल्लेखं करणीयम्।

**मनुस्मृतिः** – आचार्येण मनुना विरचितं महद् धर्मग्रन्थमिदम्। एषा स्मृतिः सर्वासु स्मृतिषु सर्ववृहत्तमा, सर्वश्रेष्ठा, सर्वजनमान्याश्च । मनुः, यस्य उल्लेखः स्वयंभुवः ब्रह्मणः पुत्रः इति कृतः, सः मनुस्मृत्याः प्रथमे अध्याये एतद्वर्णयति। अस्यां स्मृतौ द्वादश अध्यायाः सन्ति तथा च २६९४ श्लोकाः विद्यन्ते। मनुस्मृत्यां वर्णव्यवस्था, आश्रमधर्मः, नार्याः मर्यादा, दण्डविधानं, वाणिज्यम्, राजधर्मः, विवादमीमांसा, स्नातकस्य प्रकाराः इत्यादीनां विविधधार्मिकसामाजिकविषयाणां विवरणं अस्ति । एषा मनुस्मृतिः मनोः शिष्येण भृगुणा सम्पादिता ।

**विष्णुस्मृतिः** – औपचारिकधार्मिकशास्त्रेषु विष्णुस्मृतिः विशेषं स्थानं धारयति। अस्य स्मृत्याः परिचयं कलापग्रामस्य मुनेः विष्णोः समीपं गत्वा कृतानुरोधात् लभ्यते। विष्णुप्रदत्तं धर्मोपदेशं आधारं कृत्वा विष्णुस्मृतिः विरचिता, यस्य मध्ये ११३ श्लोकाः सन्ति । अस्याः स्मृत्याः विषयवस्तु मुख्यतः भगवतः विष्णोः उपदेशेन धर्मनीतेः चर्चां करोति ।

**याज्ञवल्क्यस्मृतिः**– याज्ञवल्क्यस्मृतिः विशेषा स्मृतिः, यस्य रचयिता ऋषिः याज्ञवल्क्यः। छान्दोग्योपनिषदा, बृहदारण्यकोपनिषदा, महाभारतेन च याज्ञवल्क्यस्य उल्लेखः क्रियते, यस्मात् याज्ञवल्क्यस्मृत्याः प्रसङ्गः प्रस्फुटति। अस्यां स्मृत्यां त्रयः अध्यायाः विद्यन्ते— (१) आचाराध्यायः (३६८ श्लोकाः), (२) व्यवहाराध्यायः (३०७ श्लोकाः), (३) प्रायश्चित्ताध्यायः (३३४ श्लोकाः) । एतेषु अध्यायेषु आचारस्य, व्यवहारस्य, प्रायश्चित्तस्य च विधयः वर्णिताः सन्ति ।

**पराशरस्मृतिः** – अस्य रचयिता व्यासदेवस्य पिता पराशर ऋषिः । अस्यां स्मृत्यां द्वादशाध्यायाः षट्शतश्लोकसंयुक्ताः सन्ति। पराशरस्मृत्यां सत्ययुगे मनोः द्वारा प्रणीतो धर्मः मुख्यरूपेण गृहीतः। तत् पश्चात् गौतमस्य धर्मविषये, शङ्खस्य धर्मविषये, पराशरस्य धर्मविषये अपि च वर्णिताः ।

**गौतमस्मृतिः** – गद्यरूपेण रचिता एका स्मृतिः, यस्य मध्ये एकोनत्रिंशत् (२९) अध्यायाः सन्ति। अस्यां स्मृत्याम् उपनयनसंस्कारस्य चान्येषां संस्काराणां विस्तृतं विवरणं दत्तम् अस्ति, यस्यां गौतमस्य धार्मिकदृष्टिकोणं स्पष्टं भवति ।

**बृहस्पतिस्मृतिः** – अस्याः स्मृतिविषयस्य महाभारतस्य शान्तिपर्वणि उल्लेखः अस्ति यत् ब्रह्मणा लक्षाधिकाध्याययुक्तं नीतिशास्त्रं प्रणीतम्, यं पश्चात् ऋषयः मुनयश्च संक्षिप्य "बैस्पत्यशास्त्र" इति नाम्ना स्मृतिं प्रकाशितवन्तः । अस्यां स्मृत्यां आचारस्य, व्यवहारस्य, प्रायश्चित्तस्य च विषये विस्तृतं वर्णनम् अस्ति ।

**कात्यायनस्मृतिः** – कात्यायनस्मृतिः महर्षिणा गोभिलेन विरचिता। अस्यां स्मृत्यां एकोनत्रिंशत् अध्यायाः सन्ति, तथा च अस्याः विषयाणां साम्यं मनु, बृहस्पति, नारदादिस्मृतिभिः दृश्यते।

एतासु सर्वासु स्मृतिषु धार्मिकाः, सामाजिकाः, नैतिकाश्च विधयः वर्णिताः सन्ति, ये भारतीयसमाजस्य प्राचीनधार्मिकविधिबद्धजीवनस्य प्रतिष्ठायै प्रचाराय च परमं महत्त्वं वहन्ति।

## ७.९. नारदस्मृतिः

नारदस्मृतिः एकं उल्लेखनीयं संस्कृतधर्मशास्त्रमस्ति, यया न्यायं तथा विधिप्रक्रियाम्, विशेषतः "व्यवहारम्" इति विषये अधिकं महत्वं प्रदीयते। अन्यासु स्मृतिषु आचारव्यवहारप्रायश्चित्तानां विषये विशेषं ध्यानं दत्तं, किन्तु नारदस्मृतिः केवलं "व्यवहारस्य" विषये विशेषतः प्रकाशयति। नारदस्मृतेः सृष्टिसम्बद्धतया ज्ञायते यत् इदं शास्त्रं भगवान्नारदेन विरचितः। यस्य मुख्योद्देश्यः आसीत् सर्वप्राणिनां कल्याणाय आचारपरम्परायाः संरक्षणं च । अस्मिन्शास्त्रे चतुर्विंशति प्रमुखप्रकरणानां वर्णनं क्रियते। एतेषु विषयेषु अन्तर्भूतानि सन्ति—

१। जगतः सृष्टिः (creation of the world), २। प्राणिनां वर्गीकरण (classification of beings), ३। उत्तमदेशप्रमाणं विस्तारः, सीमाबन्धः (extent of the land of the virtuous), ४। राज्यपरिषद्संविधानं, स्वरूपं आदि (constitution of the assembly), ५। वेद वेदाङ्गानुसारं यज्ञविधानं (prescription of sacrifice according to the vedas and the vedangas), ६। आचार वा सदाचार (proper conduct), ७। लोकव्यवहार (legal procedure), ८। कण्टकशोधनं (शत्रुनाशः) (banishment of offensive persons), ९। राजधर्मः (conduct of the king), १० एवं ११। वर्णाश्रमविभागः (distinctions between caste, the stages of life), १२। विवाहविधानं (law of marriage), १३। न्यायविधानं (justice), १४। स्त्रीपुरुषवैकल्पिकधर्मः (arrangements between men and women), १५। दायभागः (order of succession), १६। श्राद्धविधानं (prescription of funerary rites), १७। शौचाचारवैकल्पिकव्यवस्था (arrangements for acts of purification), १८। भक्ष्याभक्ष्यविचारः (indication of what may and may not be eaten), १९। विक्रेय- अविक्रेयमीमांसा (discussion of what may be sold and what may not be sold), २०। पातकविभागः (kinds of sin), २१ एवं २२। स्वर्गनरकवर्णनम् (description of heavens and hells), २३। प्रायश्चित्तविधानं (penances), २४। उपनिषदां रहस्यस्थानम् (Upanishadic secrets) इत्यादि।

नारदस्मृत्याम् एते सर्वे विषयाः १००८ अध्यायेषु, एकलक्षं (१००००००) श्लोकेषु संयोजिताः। एते श्लोकाः भगवान्मनुः नारदमुनये प्रदत्तवान्। नारदेन चैतत् शास्त्रं द्वादशसहस्रश्लोकैः (१२०००) संक्षिप्य महर्षये मार्कण्डेयाय प्रदत्तम्। मार्कण्डेयेनैतत् शास्त्रं अष्टसहस्रश्लोकपरिमाणं (८०००) संक्षिप्य भार्गवाय प्रदत्तम् । भार्गवेणापि अस्याः स्मृतेः चतुर्सहस्रश्लोकपर्यन्तं (४०००) संक्षेपः कृतः ।

नारदस्मृतिमनुस्मृत्योः मध्ये विशेषरूपेण साम्यं दृश्यते। केचन पण्डिताः मन्यन्ते यत् नारदस्मृतिः मनुस्मृतेः नवमं अध्यायमित्यभिमन्यते, यतः उभयत्र अपि व्यवहारः वा विधिप्रक्रिया वर्णिता अस्ति। भागवतपुराणे अपि मनुस्मृतेः नारदस्मृतेश्च सम्बन्धः वर्णितः अस्ति, यत्र भगवान्मनुना विरचितं लक्षश्लोकात्मकं ग्रन्थं संक्षिप्तरूपेण नारदस्मृतिरूपेण प्रतिपादितम् ।

केचन पण्डिताः मन्यन्ते यत् नारदस्मृतिः एककृतिरूपेण निर्मिता नासीत्। तेषां मतानुसारं नारदः एकः देवदूतः, यः देवतानां सन्देशं पृथिव्यां प्रसारयति। अयं नारदः संगीतवाणीः विष्णु-कृष्णयोः सहचारीरूपेण स्वीकृतः। यद्यपि महाभारतस्य शान्तिपर्वे नारदेन युधिष्ठिराय नीति-विधि-संबन्धिनी उपदेशा दत्ता, तथापि नारदस्मृतौ तादृशं किमपि सङ्केतं न दृश्यते ।

पराशरस्य याज्ञवल्क्यस्य च मतानुसारं शास्त्रविदां मध्ये नारदस्य नाम न विद्यते। यद्यपि बृहस्पतेः अन्येषां च कस्यचित् शास्त्रज्ञानां मतानुसारं नारदः प्रख्यातः धर्मशास्त्रकर्ता इति गण्यते। केचन पण्डिताः मन्यन्ते यत् नारदस्य आगमनं नेपालदेशतः वा मध्यप्रदेशतः अभवत्, सः च प्रसिद्धः ऋषिः इति परिगण्यते ।

अत एव, नारदस्मृतिः विशेषं धर्मशास्त्रं इति परिगण्यते, यस्य न्यायविधानः, सामाजिक-धार्मिक विधयः प्राचीनभारतीयसमाजे महत्त्वपूर्णं भूमिकां वहन्ति स्म ।

## ७.९.१ नारदस्मृतेः रचनाकालः-

नारदस्मृतिरचनाकालसम्बन्धे विभिन्नपण्डितानां भिन्नानि मतानि सन्ति । भारतस्य प्रख्यातधर्मशास्त्रज्ञः महामहोपाध्यायः डॉ. पाण्डुरङ्ग-वामनेन मन्यते यत् नारदस्मृतिरचनाकालः ख्रीष्टाब्दस्य १००-३०० मध्ये स्थितः। इतोपि पण्डितः जुलियस्-जली ख्रीष्टाब्दस्य ५००तमस्य वर्षस्य समीपे रचितमिति अभिमतं प्रकाशयति । तथैव प्रसिद्धः पण्डितः के.पी. जयसवाल अस्य स्मृतेः रचनाकालं ख्रीष्टाब्दस्य ३००-४०० मध्ये भूतमिति वदति । अन्यापि एकः पण्डितः जे.जे. मेयरः तु ख्रीष्टपूर्वेऽपि नारदस्मृतिरचितेति मन्यते, अपि च तस्य मते मनुस्मृति-याज्ञवल्क्यस्मृतीनाम् अपि पूर्वं रचितमिति वदति ।

नारदस्मृतौ धर्मशास्त्रस्य अर्थशास्त्रस्य च संयोगः दृश्यते। यद्यपि धर्मशास्त्रस्य प्रधानता अस्ति, तथापि अर्थशास्त्रस्योऽपि कतिपयः विचाराः वर्णिताः। नारदः वसिष्ठस्य धर्मसूत्रं पौराणिकचिन्तनं च उद्धृतवान्, मनोः नामापि उल्लिखितम्। महाभारतस्य कतिपयानां श्लोकानाम् उल्लेखः नारदस्मृतिं महाभारतेन सह सम्बद्धयति । कौटिल्यस्य अर्थशास्त्रे अपि नारदस्मृतौ कतिपयेऽर्थे साम्यं दृश्यते ।

यद्यपि नारदस्मृतिरचनाकाले एकमतं निश्चितं न भवति, तथापि तस्या याज्ञवल्क्यस्मृतेः पश्चाद्रचितत्वं सम्भाव्यते। उदाहरणरूपेण, याज्ञवल्क्यस्मृतौ 'दिव्य'प्रकाराः पञ्च दृश्यन्ते, किन्तु नारदस्मृतौ सप्त इति, येन तस्यां याज्ञवल्क्यस्मृतेः अनन्तरं रचनाभूतत्वं प्रतीयते।

## ७.९.२ नारदस्मृतेः विषयवस्तुः-

नारदस्मृत्याः अध्ययनक्षेत्रे डॉ. जुलियस्-जली नामकः जर्मनदेशीयः प्रमुखः पण्डितः आसीत्। सः अस्य ग्रन्थस्य द्वे संस्करणे सम्पाद्य प्रकाशितवान्। प्रथमे संस्करणे (१८७६ ख्रीष्टाब्दे) नारदस्मृतिः अनूदिता आसीत्। द्वितीयं विस्तृततरं संस्करणं १८८९ ख्रीष्टाब्दे "Sacred Books of the East Series" (Vol. 33) अन्तर्गतं प्रकाशितमभवत्। अस्मिन्नेव संस्करणे 'अभ्युपेत्याशुश्रूषा' नामकस्य पञ्चमपदस्य २१तमश्लोकपर्यन्तं व्याख्यानमपि सम्मिलितमासीत्।

नारदस्मृतौ चत्वारि अध्यायानि निर्दिष्टानि सन्ति। प्रथमतः त्रिषु न्यायसंबद्धाः विधयः, न्यायालयव्यवस्था च प्रतिपादिते। चतुर्थे अध्याये व्यवहारपद्धतीः विवृताः, येभ्यः समाजस्य नियमाः आदर्शाश्च स्पष्टं प्रतितिष्ठन्ति।

परिशिष्टभागे 'चौर्यवृत्ति' नामकं विशेषं वर्णनमस्ति, यत्र चौरकार्य-अपराधानां सामाजिकभावना-परिणामानां च विषये विशदीकरणमस्ति। पूर्वमेव 'साहसम्' इति व्यवहारप्रकरणेऽपि एते विषयाः उल्लिखिताः, यत्र नारदः सामाजिकदृष्ट्या धर्मस्य नीतेः च स्वरूपं निरूपयति।

संक्षेपतः, नारदस्मृतौ न्यायव्यवस्था, सामाजिकशासनम्, नीतिप्रणालीं च विशेषरूपेण प्रतिपादितानि, ये भारतस्य प्राचीनसामाजिकजीवने महत्त्वपूर्णं स्थानं धारयन्ति।

**ज्ञातव्यम्**

जुलियस्-जली (Julius Jolly) नामकः प्रख्यातः जर्मनदेशीयः विद्वान् आसीत्। सः भारतीयधर्मशास्त्रस्य चिकित्साशास्त्रस्य च प्रमुखः अनुवादकः इति ख्यातिमायात्। सः १८४९ तमे ख्रीष्टाब्दे डिसेम्बरमासस्य अष्टाविंशतितमे दिवसे जर्मनदेशीयहेडेलबर्गनगरे जन्मः जातः। सः बर्लिनविश्वविद्यालये तुलनात्मकं भाषाशास्त्रं, संस्कृतम्, ईराणीयभाषां च अध्ययनम् अकरोत्। तेन लिखिताः कतिपयाः प्रमुखाः ग्रन्थाः सन्ति- 1. Minor Law books (१८८९), 2. Indian Medicine, 3. Outline of an History of the Hindu Law in partition, Inheritance and Adoption as contained in the original Sanskrit Treatises, 4. Manava Dharmasastra, 5. The Institutes of Vishnu, 6. Naradiya Dharmasastra: or the Institutes of Narada. सः १९३२ तमे ख्रीष्टाब्दे एप्रिलमासस्य चतुर्विंशतितमे दिने दिवंगतः।

**प्रथमोध्यायः-**

नारदस्मृतौ प्रथमाध्याये चतुस्सप्ततिशतश्लोकाः सन्ति, यत्र न्यायसंबद्धानि विधिनिषेधानि विस्तरेण वर्णितानि। डॉ॰ ब्रजकिशोरस्वामिना एषः अध्यायः "विचारदर्शनम्" इति नाम्ना निर्दिष्टः । अस्य अध्यायस्य प्रारम्भे मनोः कृत- नारदस्मृतेः उत्पत्तिविषये चर्चा क्रियते ।

अत्र "व्यवहार" इति तात्पर्येण विचारप्रक्रियायाः विविधाः पक्षाः वर्णिताः। विविधविध्यनुसारं चत्वारः पादाः, चत्वारः स्थानाः, सप्त साधनानि, अष्टाङ्गानि, शतशाखाः, द्वे च अभियोगे इत्येतेषां चर्चा कृताः । ततः पश्चात् राज्ञः कर्तव्यं, बन्धनप्रकाराः, न्यायाधीशस्य दायित्वानि च वर्णितानि। अस्मिनध्याये विचारपद्धतेः औचित्यं तथा च न्यायप्रक्रियायाः विविधावयवानां गम्भीरविश्लेषणं क्रियते ।

**द्वितीयोऽध्यायः-**

नारदस्मृतौ द्वितीयाध्याये चतुश्चत्वारिंशच्छतश्लोकाः सन्ति। अयं अध्यायः "व्यवहारमातृका" इति नाम्ना निर्दिष्टः । अत्र लक्ष्यम् (पक्षयोः) प्रतिवादः, वादिनः अभियोगपत्रस्य दोषाः, साक्ष्यं च साक्ष्यग्रहणं च विस्तरेण निरूपितम्। एषः न्यायप्रक्रियायाः अत्यन्तं महत्वपूर्णभागं वर्णयति, यथा साक्ष्यप्रमाणादिग्रहणं, वादिप्रतिवादिनोः उत्तरं च । अस्मिनध्याये विचारप्रक्रियायाः सम्यक् स्वरूपं तथा साक्ष्यस्य महत्त्वं विशेषरूपेण प्रतिपादितम् ।

**तृतीयोऽध्यायः-**

नारदस्मृतौ तृतीयाध्याये अष्टादशश्लोकाः सन्ति। अयं अध्यायः "सभालक्षणम्" इति नाम्ना निर्दिष्टः । अस्मिनध्याये विचारसभायाः संरचना तथा नियमानां विषये विस्तृतं वर्णनमस्ति । सभ्यानां नियुक्तिः, मिथ्यावादिनः लक्षणानि, धर्मविचारप्रक्रिया च अत्र निरूपिताः । न्यायसभायाः सम्यक् आयोजनं तदनुरूपं आचरणं च स्पष्टनिर्देशरूपेण प्रतिपादितम् ।

**चतुर्थोऽध्यायः-**

नारदस्मृतौ चतुर्थाध्याये षट् प्रमुखव्यवहारपदानां विस्तरतः निरूपणं कृतम्। एतेषां पदानां पुङ्खानुपुङ्खवर्णनं कृतं यत्र न्यायप्रक्रियायाः विविधाः विधयः प्रतिपादिताः-

**१. ऋणादानम् (ऋणस्य प्रतिपादनम्)-**

अस्मिन्पदे ऋणस्य आदानप्रदानं, ऋणनियमाः, ऋणादानस्य विधयश्च विस्तरेण निरूपिताः। यः ऋणं ददाति स उत्तमः, यश्च ऋणं गृह्णाति स अधम इति स्मृतिषु वर्णितम् । अत्र ऋणस्य दानं, ग्रहणं, तद्विषयकाः विधिनियमाश्च स्पष्टतया निरूपिताः । अस्मिन्प्रकरणे ३४८ श्लोकाः सन्ति ।

**२. निक्षेपः (निधिनिक्षेपः)-**

यदा कश्चिद् विश्वासपूर्वकं किञ्चित्पदार्थं शङ्कारहितं अन्यं निक्षिपति, तदा सः निक्षेपः इति कथ्यते। अस्मिन् प्रकरणे उपनिधेः विषयः तथा तस्य विधिपद्धतयः विस्तरेण निरूपिताः । अत्र पञ्चदश (१५) श्लोकाः सन्ति।

**३. संभूयसमुत्थानम् (सहकार्यम्)-**

यदा वणिग्भिः संयुक्तरूपेण कार्यं क्रियते तथा गणना निर्धार्यते, तदा तत् संभूयसमुत्थानम् इति कथ्यते। अस्मिन्पदे अष्टादश (१८) श्लोकाः अन्तर्भूताः, यत्र सहकार्यम्, भागित्वं च विशेषतः वर्णितम्।

**४. दत्ताप्रदानिकम् (उपहारस्य पुनर्ग्रहणम्)-**

यदा कश्चिद् अविधिपूर्वकं दत्तं दानं पुनरपि गृहीतुमिच्छति, तदा तत् दत्ताप्रदानिकम् इति कथ्यते । अस्मिन् प्रकरणे द्वादश (१२) श्लोकाः सन्ति।

**५. अभ्युपेत्य-अशुश्रूषा (सेवायाः सङ्घटनभङ्गः)**

यदा कश्चिद् पुरुषः सेवायाः संविदं भङ्गं कृत्वा कर्तव्यं न करोति, तदा तत् अभ्युपेत्य-अशुश्रूषा इति कथ्यते। अस्मिन्पदे त्रिचत्वारिंशत् (४३) श्लोकाः अन्तर्भूताः ।

**६. वेतनस्य-अनपाकर्म (वेतनस्य अप्रदानम्)**

यदा भृतकाः वा सेवकाः स्वीयं वेतनं न प्राप्नुवन्ति, तदा तत् वेतनस्य-अनपाकर्म इति कथ्यते । अस्मिन्प्रकरणे द्वाविंशति (२२) श्लोकाः सन्ति।

**७. अस्वामिविक्रयः (अनधिकारिणा विक्रयः)**

यदा कश्चिद् पुरुषः स्वामिनं अजानन्तं धनं वा सामग्रीं वा अन्यस्मै विक्रीणाति अथवा अपहर्तुमिच्छति, तदा तत् अस्वामिविक्रयः इति कथ्यते। अस्य प्रकरणस्य अन्तर्भावे अष्टौ (८) श्लोकाः सन्ति।

**८. विक्रीय-असंप्रदानम् (विक्रयकृतस्य वस्तुनः अप्रदानम्)-**

यदा कश्चिद् जनः वस्तुं विक्रीय मूल्यम् गृहीत्वा अपि तत्संबद्धं वस्तुं ग्राहकेभ्यः न प्रददाति, तदा सः विवादः "विक्रीय-असंप्रदानम्" इति कथ्यते। अस्य प्रकरणे द्वादश (१२) श्लोकाः सन्ति।

**९. क्रीत्वानुशयः (क्रयविलोपः)-**

यदा कश्चिद् जनः मूल्यम् अवस्य गत्वा किञ्चित् वस्तुं क्रीणाति, परं ततः परं तत्सम्बद्धे वस्तुनि सन्तुष्टः न भवति, ततः तत् पुनः प्रतिदातुं प्रयतते। तस्यां स्थितौ अयं विवादः "क्रीत्वानुशयः" इति कथ्यते। अस्य प्रकरणे षोडश (१६) श्लोकाः सन्ति।

**१०. समयस्यानपकर्म (निगमश्रेणिपरम्पराविरोधः)-**

अयं विधिः निगम, श्रेणि अथवा पुगस्य अधीने स्थितानां परम्परागतनियमानां उल्लङ्घनं सम्मिलयति। यदा कश्चिद् जनः परम्परागतनियमानां विपरीते कर्म करोति, तदा तत् "समयस्य अनपकर्म" इति कथ्यते। अस्मिन् प्रकरणे सप्त (७) श्लोकाः सन्ति।

**११. सीमाबन्ध (सीमानिर्णयः)-**

यदा कस्यचित् भूमेः वा क्षेत्रस्य सीमा निश्चितुं विवादः भवति, विशेषतः सेतुशस्यक्षेत्रयोः यथार्थसीमानिर्णयनं विषये चर्चा क्रियते। अस्य विषयस्य सम्बन्धे त्रिचत्वारिंशत् (४३) श्लोकाः सन्ति।

**१२. स्त्रीपुंसयोग (वैवाहिकसम्बन्धः)-**

स्त्रीपुरुषयोः विवाहस्य च वैवाहिकसम्बन्धस्य विधीनां विषये चर्चा क्रियते । अयं विधिः वैवाहिकसम्बन्धेषु उत्पन्नसमस्याः विवरणं करोति, यस्य अन्तर्गतं ११३ श्लोकाः सन्ति।

**१३. दायभागः (पितृसम्पत्तिविभाजनं च उत्तराधिकारः)-**

यदा पुत्रसन्तानयोः मध्ये पैतृकसंपत्तेः विभाजनं क्रियते, तदा सः 'दायभागः' इति कथ्यते। अस्य नियमस्य अन्तर्गतं द्विपञ्चाशत् (५२) श्लोकाः चर्च्यन्ते।

**१४. साहसम् (बलप्रयोगजनितं अपराधम्)-**

यदा कश्चन जनः बलात् वा संघर्षात् अपराधं करोति, यथा—हत्या, दस्युता, बलात्कारः वा, तर्हि तादृशं अपराधं 'साहस' इति कथ्यते। अस्य पदस्य अन्तर्गतं सप्तविंशति (२७) श्लोकाः सन्ति।

**१५. वाक्पारुष्यम् (वचनद्वारा अपमानः)-**

यदा कश्चन अन्यस्य जातिं, देशं वा कुलं प्रति अपमानजनकं भाषां प्रयुङ्क्ते, तदा तादृशं वचनं 'वाक्पारुष्यम्' इति कथ्यते।

**१६. दण्डपारुष्यम् (शारीरिक अपदस्तता)-**

अस्मिन पदे शारीरिकप्रहारस्य तथा शारीरिकदण्डस्य अपदस्तस्य च विषयः चर्च्यते। अत्र हस्तेन वा शस्त्रेण प्रहारस्य विवरणं प्राप्यते। वाक्पारुष्यं च दण्डपारुष्यं च मिलित्वा द्वात्रिंशत् (३२) श्लोकाः अन्तर्भवन्ति।

**१७. द्यूतसमाह्वय (जुआ तथा पक्षियुद्धम्)-**

अस्य विधेः अनुसारं, यदा कश्चन जूतेन वा पक्षिणां वा अन्यजन्तूनां वस्तुभिः पणं स्थापित्य कपटेन कृते कार्यक्रमे संलग्नः भवति, तदा तस्य कर्म 'द्यूतसमाह्वय' इति कथ्यते। अत्र अष्टौ (८) श्लोकाः अन्तर्भवन्ति।

**१८. प्रकीर्णकम् (अन्यान्यदोषाः)-**

अस्मिन खण्डे विशेषतः राज्ञः समीपे विचाराधीनानां अन्यविवादानां विषयाः वर्ण्यन्ते। अत्र विविधदण्डाः नियमाश्च विस्तरेण वर्णिताः। अत्र पञ्चपञ्चाशत् (५५) श्लोकाः अन्तर्भवन्ति।
परिशिष्टभागे विशेषविवादपदद्वयं वर्णितम्:।

**१. तस्करप्रकारः (चोरप्रकारविभागः)-**

अयं विशेषविधिः यस्मिन् चौर्येन कृतं चौर्यकर्म विस्तरेण वर्ण्यते। अत्र प्रकाशतस्करः अप्रकाशतस्करश्च पृथग्भूतौ निरूपितौ। अस्मिन् ६१ श्लोकाः अन्तर्भवन्ति।

### २. दिव्यानि (दैविकपरिक्षा)-

यदा वादी-विवादीयोः कोऽपि साक्षी न भवति, तदा राजा दैविकपरिक्षायाः आयोजनं करोति । अस्याः अन्तर्गतं अग्निपरिक्षा, जलपरिक्षादयः निरूपिताः । अस्मिन् अष्टचत्वारिंशत् (४८) श्लोकाः अन्तर्भवन्ति ।

नारदस्मृतेः श्लोकानां परिसीमारूपेण परिगणितं स्तेयप्रकरणं सहितं १०२८ श्लोकाः अन्तर्भूताः सन्ति । एते श्लोकाः प्रचलितमतानां च पौराणिकमतानां च उद्धरणरूपेण स्थिताः, यतः वर्तमानकाले स्मृतिग्रन्थेषु प्रायः सप्तशतश्लोकाः उद्धृताः दृश्यन्ते ।

अभ्युपेत्याशुश्रूषाप्रकरणस्य एकविंशतितमश्लोकपर्यन्तं 'असहाय' नाम्नः भाष्यस्य उल्लेखः प्राप्यते । पौराणिकस्मृतिग्रन्थेषु नारदस्मृतेः व्यापकं प्रभावं दृश्यते, यद्विशेषतः नवमशतिकायाः भाष्यकारः विश्वरूपः, मेधातिथेः भाष्ये, विज्ञानेश्वरस्य 'मिताक्षरा' भाष्ये च उद्धरणरूपेण प्रकटितम् । तथा च स्मृतिचन्द्रिका, पराशरमाधवीयं इत्यादिषु परवर्तीषु निबन्धभाष्येषु अपि नारदस्मृतेः उद्धरणं प्राप्यते ।

नारदस्मृतौ प्रारम्भिकं गद्यांशे, यत्र नारदः, मार्कण्डेयः, सुमतिर्भार्गवश्च मनोः मूलग्रन्थस्य सङ्क्षेपणं वर्णयन्ति, सम्पूर्णा नारदस्मृतिः अनुष्टुप्छन्दसा रचिता । (केवलं 'व्यवहारमातृका' नाम्नः द्वितीयाध्यायस्य अष्टात्रिंशत्तमे श्लोके तथा 'सभा' नाम्नः अध्यायस्य अन्त्यश्लोके विहाय ।) नारदस्मृतौ चतुर्थाध्यायस्य ऋणदानप्रकरणे नारदः स्वनामोल्लेखं कृत्वा, संशयास्पदविषये दोषितस्य दुष्टस्य शुद्धये सत्यासत्ययोः प्रमाणविषयं कथयति –

सन्दिग्धेऽर्थेऽभियुक्तानां विशुद्ध्यर्थं दुरात्मनाम् ।
प्रोक्तानि नारदेनैह सत्यानृतविशुद्धये ॥

## ७.९.३ नारदस्मृतिसंकलनम् –

नारदस्मृत्याः पञ्च संकलनानि प्रकाशितानि । जर्मनदेशीयपण्डितेन जुलियस जॉलीमहाभागेन द्वे१८७६ संस्करणे प्रकाशिते। तत्र प्रथमं संक्षिप्तसंस्करणम् (१८७६, Trubner & Co., लन्दन) यत्र मूलश्लोकाः सानुवादाः प्रकाशिताः । द्वितीयं विस्तीर्णसंस्करणम् (१८८५, Bibliotheca Indica, SBE Vol. 33) यस्मिन् 'अभ्युपेत्याशुश्रूषा' प्रकरणस्य २१ श्लोकपर्यन्तम् असहायविरचितं भाष्यम् अन्तर्भूतम् ।

१४०७ तमे ख्रीष्टाब्दे नेपालदेशे प्राप्ते हस्तलिखिते ग्रन्थे 'स्तेय' तथा 'दिव्य', द्वे अतिरिक्ताध्याये दृष्टे, यानि दीर्घसंस्करणे समाहितानि।

१९२९ तमे वर्षे त्रिवेन्द्रमसंस्कृतमालायां के. साम्बशिवशास्त्रिणा सम्पादिता नारदीया मनुसंहिता प्रकाशितम्, यत्र भवस्वामिभाष्यम् अन्तर्भूतम्।

१९८८ तमे वर्षे शिकागोनगरे Richard W. Lariviere इत्यनेकेन समालोचनात्मकसंपादनेन सह अनुवादः प्रकाशितः, यत्र असहायभाष्यम्, स्तेय तथा दिव्य प्रकरणे च समाहितानि जातानि।

१९९२ तमे वर्षे श्रीजगन्नाथसंस्कृतविश्वविद्यालये ब्रजकिशोरस्वामिना 'तिलोत्तमा' नाम्नी संस्कृतटीकया सह नारदस्मृतिसंग्रहः हिन्द्यानुवादसहित प्रकाशितः।

एतेन नारदस्मृत्याः अध्ययनस्य महत्त्वं, भाष्यपरम्परा च प्रकाश्यते।

## ७.९.४ नारदस्मृतिव्याख्याकारः

नारदस्मृतिभाष्यकारौ – असहायः भवस्वामी च-

**१. असहायभाष्यम्** –

नारदस्मृतेः चतुर्थाध्यायस्य 'अभ्युपेत्याशुश्रूषा' प्रकरणस्य २१ श्लोकपर्यन्तं असहायविरचितं भाष्यम् उपलब्धम्। अस्य भाष्यस्य संशोधनं केशवभट्टस्य प्रेरणया कल्याणभट्टेन कृतमिति ज्ञायते—
याज्ञवल्क्यस्मृतौ वेद-वेदाङ्ग- आरण्यक-उपनिषद-पुराण-इतिहासेत्यादीनामुपरि याज्ञवल्क्यप्रणीतस्य बृहदारण्यकस्य तथैव योगशास्त्रस्य अपि उल्लेखम अस्ति । याज्ञवल्क्यस्मृतौ धर्मस्य विशालक्षेत्रस्य युक्तियुक्तं विश्लेषणं कृतम् । इयं ग्रन्थः धर्मः तथा व्यवहारः इति विषयेन सह सम्बन्धितः अतः के.पी.जयछवालमहोदयेन ग्रन्थोऽयं धर्मव्यवहारसंहिता इत्यनेन अभिधीयते । उल्लिखितानां त्रयाणामध्यायानां उद्देश्यं शान्तिपूर्णसामाजिकसङ्गठनं, देशस्य समुचितप्रशासनं, विधि इत्यादीनि सन्ति ।

## १०.४.१: याज्ञवल्क्यस्मृतेः रचनाकालः

प्राचीनसंस्कृते लेखकस्य तथा रचनाकालविषये सूचनां दातुं प्रथा नासीत् । अतः एतेषां ग्रन्थानां ग्रन्थकारस्य जन्मतिथिः स्थानं च ज्ञातुं अतीव कठिनम् अस्ति । एतस्य एकमात्रं मार्गं अन्यस्थितेषु सन्दर्भेषु प्राप्यं कालनिर्धारणम् । केचन् पण्डिताः याज्ञवल्क्यस्मृतेः कालनिर्धारयितुं प्रयासम् अकुर्वन् । एतस्य चर्चा निम्नोक्तवर्णनायं प्रदीयते -

याज्ञवल्क्यस्मृतेः कालनिर्णयप्रसङ्गे पण्डित वेवरः उक्तवान् यत् – अस्मिन् स्मृतिशास्त्रे मुद्रायां कृते नानकशब्दस्य व्यवहारो दृश्यते अतः अस्य स्मृतिशास्त्रस्य रचनाकालः द्वितीयशताब्दिः स्वीकर्तुं शक्यते। किसानस्य इसात् मुद्रासु नानकशब्दः प्रयुक्तः आसीत् । पण्डित विल्सनः उक्तवान् यत् अस्य स्मृतिशास्त्रस्य केचन अंशाः भारतस्य विभिन्नेषु भागेषु अवस्थितशिलालेखेषु उद्धृताः सन्ति। तासां शिलालिपिनां समयः ख्रीष्टपूर्व १० तथा ११ शतिका भवन्ति। अतः अस्य स्मृतिशास्त्रस्य रचनासमयः ख्रीष्टपूर्व १० शतिकायाः पूर्वभागः मन्यते। जुलियाछ जॉलि अपि अस्य स्मृतिशास्त्रस्य समयसीमा ख्रीष्टपूर्व चतुर्थं शतिका इति स्वीकरॊति । जेकोबी महोदयः ग्रहसङ्ख्यायाम् उपरि आधारं कृत्वा चतुर्थशताब्दो अस्य ग्रन्थस्य रचनाकालः स्वीकरोति। यद्यपि समीक्षकाः वैदिकयाज्ञवल्क्यः, योगशास्त्रकार याज्ञवल्क्यः तथा स्मृतिशास्त्रकार याज्ञवल्क्यः च अभिन्नः व्यक्तिः इति मन्तव्यं कुर्वन्ति तथापि एतेषां विषये किमपि स्पष्ट प्रमाणं नास्ति। याज्ञवल्क्यस्मृतिग्रन्थे मुनि याज्ञवल्क्यः भिन्नेषु अंशेषु मनुना प्रोक्तं वचनम् उल्लेखितवान्। अस्मात् एतत् प्रमाणं भवति यत् याज्ञवल्क्यस्मृतिः मनुस्मृतेः परवर्ती रचना अस्ति । मनुस्मृतेः रचनासमयः २०० ईपू, १०० ईपू यावत् इति समीक्षकाः सूचयन्ति । याज्ञवल्क्यस्मृतेः रचनासमयः ख्रीष्टपूर्व प्रथमशतिकातः ख्रीष्टपूर्व तृतीयशतिकायाः मध्य एव इति मन्यते । अर्थात्

याज्ञवल्क्यस्मृतिः नारदस्मृतिः, बृहस्पतिस्मृतिः, मनुस्मृति तथा कौटिल्यस्य अर्थशास्त्रात् परं कालं प्रतिनिधित्वं कुर्वन्ति।

## १०.४.२: याज्ञवल्क्यस्मृतेः विषयवस्तु

याज्ञवल्क्यस्मृतिग्रन्थः त्रिषु अध्यायेषु विभक्ता अस्ति। ते यथा – आचाराध्यायः, व्यवहाराध्यायः प्रायश्चित्ताध्यायः च। प्रथमोऽध्यायः आचाराध्यायः इति कथ्यते। अस्मिन् अध्याये १३ प्रकरणानि सन्ति तथा कुलश्लोकसंख्या च अस्ति ३६८ संख्यकाः। अध्यायस्य विषयवस्तु एवं प्रकारकोऽस्ति यथा-

१) **उपोद्घातप्रकरणम् (Introductory Verses)**: अस्मिन् प्रकरणे ९ श्लोकाः दृश्यन्ते। एतेन श्लोकेन मुनि याज्ञवल्क्यः धर्मस्य चतुर्दशस्थानविषये वर्णनं करोति। ते यथा – पुराणम्, न्यायो तथा तर्कविद्या, मीमांसा, धर्मशास्त्रम्, षट् वेदाङ्गानि) शिक्षा-कल्पः-निरुक्त-व्याकरण-छन्दः- ज्योतिषः च (तथा प्रमुखः वेदाः) ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः च(। एतदतिरिक्तं २० धर्मशास्त्रकारानां नाम उल्लिखति। तस्योपरि धर्मस्य लक्षणं तथा श्रेष्ठधर्मविषये अपि अस्मिन् प्रकरणे वर्णना अस्ति।

२) **ब्रह्मचारिप्रकरणम् (Life of Celibacy):** अस्मिन् प्रकरणे ४१ श्लोकाः दृश्यन्ते। अत्र ब्राह्मण-क्षत्रिय-वैश्य-शूद्र इत्यादि चतुर्वर्णानाम कर्तव्यविषये वर्णनमस्ति। अत्र षोडशसंस्कारस्य प्रथमसंस्कारः गर्भाधानात् आरभ्य अन्त्येष्टिक्रिया पर्यन्त समस्तकर्म मन्त्रेण सम्पादिता अस्ति। स्त्रीसंस्कारः, उपनयनकालः, गुरुभ्यो प्रति शिष्यानां धर्मः, प्राणायामस्य नियमः शौचादीनां नियमः, दण्डव्यवस्था, भोजनस्य भिन्नानि प्रकारानि, ब्रह्मचारिनां वर्जनीयं कर्मः, ब्राह्मणानां भिक्षायाः नियमः, आचमनविधिः, संस्कारहीनकर्मणः फलम् इत्यादि विषये विस्तृतवर्णनम् अस्ति।

३) **विवाहविधिः (Marriage Ceremony):** अस्मिन् प्रकरणे ३९ श्लोकाः सन्ति । अत्र ब्रह्मचर्यसंस्कारसमाप्तेः अनन्तरं गार्हस्थ्यधर्मस्य मूलं विवाहस्य वर्णनम् अस्ति । अस्मिन् प्रकरणे वर्णितानि विषयानि सन्ति – कन्यायाः लक्षणानि, कन्यावरणे नियमः, सापिण्ड्यविचारः, विवाहस्य अष्टप्रकाराः, कन्यापहरणे दण्डः, पतिव्रतास्त्रीप्रशंसा, स्त्रीधर्माः, पत्नीसन्निधौ पुनर्विवाहस्य कारणानि इत्यादि।

४) **वर्णजातिविवेकप्रकरणम् (Class, Caste, and Conciousness):** अस्मिन् प्रकरणे ७ श्लोकाः सन्ति। मुख्य तथा गौणजातीनां विषये वर्णनम् एव अस्य प्रकरणस्य मुख्यम् उद्देश्यम् अस्ति। अस्मिन्

प्रकरणे सजातिपुत्र-अनुलोम तथा प्रतिलोम पुत्रस्य वर्णनम् अस्ति। एतदुपरि संकीर्णजात्यन्तरं, वर्णप्राप्तौ कारणान्तरं तथा हीनवृत्या जीवनम् अपि अत्र सम्यकरूपेण वर्णितोऽस्ति।

५) **गृहस्थधर्मप्रकरणम् (Duties of Married Person) :** अस्मिन् प्रकरणे ३२ श्लोकाः सन्ति। अस्य प्रकरणस्य विषयवस्तु एवं प्रकारकम् अस्ति – गृहस्थधर्मः, गृहस्थस्य कर्तव्यः ,पञ्च महायज्ञाः, गृहग्निरक्षणः ,अतिथिसत्कारः ,भिक्षादानम्, अतिथिनां भोजनम्, सायं-संध्यावन्दना, चातुर्वर्णानां कर्तव्यानि, श्रौतकर्माणि, दन्तधावनादि, भिन्नाः वैदिकयज्ञाः यथा – अग्निहोत्रः, दर्शपौर्णमासः, आग्रयन, इत्यादि।

६) **स्नातकधर्मप्रकरणम् (Duties of an Initiated Householder):** अस्मिन् प्रकरणे ३७ श्लोकाः सन्ति। अत्र स्नातककर्तव्यम् ,स्नातकव्रतानि, अभोज्याननि, उत्सर्जनकालः, अनध्यायः कालः इत्यादि विषये वर्णनम् अस्ति।

७) **भक्ष्याभक्ष्यप्रकरणम् (Eatable and Non eatable) :** अस्मिन् प्रकरणे १६ श्लोकाः सन्ति। अत्र द्वि जातीनां धर्माः, पर्युषितस्य प्रतिप्रसवनियमः, भक्षणे वर्जनविधिः, मांसभक्षने विधिः, वृथामांस भक्षने निन्दा, मांसवर्जनविधिः इत्यादयः वर्णिताः सन्ति।

८) **द्रव्याशुद्धिप्रकरणम् (Purification of Vessels):** अस्मिन् प्रकरणे १६ श्लोकाः सन्ति । अत्र सौवर्णारजतादिपात्राणां, यज्ञपात्रादीनां शुद्धिः, अग्न्यादिशुद्धिः, भूमिशुद्धिः, उदकशुद्धिः, इत्यादि विषये वर्णनं प्राप्यते।

९) **दानप्रकरणम् (Gifts of Pitris and Gods):** अत्र १९ श्लोकाः सन्ति । अस्मिन् प्रकरणे दानस्य भिन्नाः प्रकाराः, दानस्य नियमः, भूम्यादि दानस्य फलम्, गोदानस्य माहात्म्यम् तथा फलम्, वेददानफलम्, गृहादिदानस्य फलम्, सत्पात्रे गोदानस्य फलम्, अपात्रे गोदानस्य फलम्, इत्यादि विषयम् वर्णितम् अस्ति।

**१०) श्राद्धप्रकरणम् (Oblation to the Manes ):** अस्मिन् प्रकरणे ५८ श्लोकाः सन्ति। अत्र श्राद्ध शब्दस्य अर्थः, पार्वणश्राद्धस्वरूपम्, पार्वणश्राद्धप्रयोगः, एकोदिष्टश्राद्धस्वरूपम्, श्राद्धस्य कालः, श्राद्धे वर्जनीय ब्राह्मणाः, ब्राह्मणविसर्जनम्, पिण्डप्रदानम्, अक्षदानम्, उदकदानम्, सपिण्डीकरणं, भोज्यविशेषेण फलविशेषः, तिथिविशेषात फलविशेषः, नक्षत्रविशेषात फलविशेषः इत्यादि विषये वर्णनम् अस्ति।

**११) गणपतिकल्पप्रकरणम्) Ordinance of Lord Ganapati):** अस्मिन् प्रकरणे २४ श्लोकाः सन्ति। अस्मिन प्रकरणे कर्मे विघ्नोपशमहेतवेः सफलमहादानादिरूपविनायकस्य प्रार्थना परिदृश्यते। एतदुपरि विघ्नकारकहेतवेः, विघ्नोपशान्त्यर्थं भिन्नानि कर्माणि, स्नपनविधिः, उपस्थानमन्त्राः, ग्रहपुजा इत्यादि विषये अपि वर्णनम् अस्ति।

**१२) ग्रहशान्तिप्रकरणम् (Peace for Planets):** अस्मिन् प्रकरणे १४ श्लोकाः सन्ति। अत्र ग्रहपूजायाः विविधाः संस्काराः, ग्रहपूजायाः प्रयोजनं तस्य फलप्राप्तिविषये च चर्चा कृता अस्ति। एतदुपरि अत्र नवग्रहाणां (सूर्य-चन्द्र-मङ्गल-बुध-बृहस्पति-शुक्र-शनि-राहुः तथा केतुः) इत्येतेषां कृते नवग्रहनामानि, नवग्रहसमिधः, नवग्रहाणां भोजनानि, नवग्रहमन्त्राः, नवग्रहदक्षिणा, नवग्रहध्यानानि, दुष्टग्रहपूजा इत्यादि विषये च वर्णनम् अस्ति ।

**१३) राजधर्मप्रकरणम् (Duties of King):** अस्मिन् प्रकरणे ६० श्लोकाः सन्ति। अत्र अभिषिक्तस्य राज्ञो धर्माः, तस्य अष्टादश व्यसनानि, राजमन्त्रिणः तथा राजपुरोहितस्य लक्षणम्, ब्राह्मणेभ्यो धनदाने फलविशेषः, धनरक्षणप्रकारः, लेख्यकरणप्रकारः, राज्ञो निवासस्थानम्, शरणागतरक्षणम्, राज्ञो निद्रादिप्रकारः, प्रजापालनं तथा प्रजानाम् रक्षणस्य फलम्, संधिविग्रहादिगुणाः, सामदानादि उपायचतुष्टयाः, षाड्गुण्यनीतिः, सप्ताङ्गनीतिः, मङ्गलनीतिः, दण्डभेदाः तथा दण्डव्यवस्थानिमित्तानि इति एतेषां विषये वर्णितानि भवन्ति।

याज्ञवल्क्यस्मृतेः द्वितीयाध्यायस्य नाम व्यवहाराध्याय कथ्यते । अस्मिन् अध्याये २५ प्रकरणानि २०७ श्लोकाः च सन्ति । अस्य अध्यायस्य विषयवस्तु यथा-

**१) साधारणव्यवहारमातृकाप्रकरणम् (Laws and Regulations in General):** अस्मिन् प्रकरणे ८ श्लोकाः सन्ति। अत्र व्यवहारपदेन अन्यविरोधिना स्वात्मसम्बन्ध कथनं कथ्यते । मातृकाशब्दस्य अर्थं भवति मूलं स्रोतः वा। अतः व्यवहारमातृका शब्दस्य अर्थः भवति विवादस्य मूलं स्रोतः। अतः सर्वेषु विवादेषु यः नियमः अनुसरति स एव साधारणव्यवहारमातृका। अस्मिन् प्रकरणे सभासदलक्षणं, सभासदसंख्या, ब्राह्मणानां दोषः, सभासदादण्डः, व्यवहारस्य अष्टादश भेदाः, अनादेयव्यवहाराः, व्यवहारस्य चत्वारः पादाः उत्तरदानप्रकारः इत्यादयः विषयाः वर्णिताः सन्ति ।

**२) असाधारणव्यवहारमातृकाप्रकरणम् (Exceptional Regulations):** अस्मिन् प्रकरणे २८ श्लोकाः सन्ति । साधारणव्यवहारमातृकाम् उपरि विशेषविवादे प्रयोज्या नियमाः अत्र सन्निविष्टा सन्ति। अस्मिन् प्रकरणे प्रत्यभियोगः, मिथ्याभियोगे दण्डः, दुष्टलक्षणम्, सपणविवादस्थले निर्णयप्रकारः, छलनिरसनप्रकारः, अनेकार्थाभियोगे निर्णयः, प्रमाणचतुष्टयम्, प्रमाणभेदाः, लेख्यादीननां क्वचित् नियमः, उत्तमसाहसदण्डस्वरूपं, गुरुशिष्यपितृपुत्रादीनां व्यवहारः इत्यादयः विषयाः वर्णिता अस्ति।

३) **ऋणादानप्रकरणम् (Laws Relating to Loans):** अस्मिन् प्रकरणे २८ श्लोकाः सन्ति। अस्य प्रकरणस्य प्रारम्भे एव सप्तविधः ऋणादानविषये उल्लेखितोऽस्ति । तदतिरिक्तं चक्रवृद्धिकायिकादि वृद्धिप्रकाराः, अकृतवृद्धिः, याचितकविषये निर्णयः, याचितकाऽदाने निर्णयः, प्रयुक्तस्य धनस्य ग्रहणप्रकाराः, न्यायार्थं व्ययदानं, पुत्रविषये पौत्रविषये ऋणादाने अधिकारः, ऋणधर्मः, पैतृकऋणः, इत्यादयः उल्लिखिताः सन्ति।

४) **उपनिधिप्रकरणम् (Laws Relating to Deposits):** अस्मिन् प्रकरणे ३ श्लोकाः सन्ति। अत्र उपनिधिद्रव्यलक्षणम्, उपनिधिदानेऽपवादः, उपनिध्युपभोक्तुर्दण्डः तथा च उपनिधिधर्माणां उल्लेखः अस्ति।

५) **साक्षिप्रकरणम् (The laws of Evidence):** अस्मिन् प्रकरणे १६ श्लोकाः सन्ति । साक्षीशब्दस्य अर्थः भवति यः सर्वं पश्यति शृणोति च। अस्मिन् प्रकरणे शपथः, साक्षिस्वरूपनिरूपणम्, साक्षिभेदाः, कृतसाक्षिणः तथा अकृतसाक्षिणः लक्षणम्, लिखितादिसाक्षिणां भेदाः, असाक्षिणः स्वरूपम्, साक्षिश्रवणप्रकारः, कूटसाक्षिणां दण्डः, अनृतवचने प्रायश्चित्तम् इत्यादि विषयाः वर्णिताः सन्ति।

६) **लेख्यप्रकरणम् (Laws Relating to Written Document):** अस्मिन् प्रकरणे ११ श्लोकाः सन्ति। लेख्यद्वैविध्यम्- अन्यकृतलेख्यम् स्वहस्तकृतलेख्यञ्च। एतदुपरि अस्मिन् प्रकरणे लेखकसम्मतिः, लेख्यसन्देहे निर्णयोपयाः, लेखनस्य पृष्ठे लेखनप्रकारः, कृत्स्ने ऋणे दत्ते कर्तव्यता- इत्यादयः विषयाः अपि वर्णिताः सन्ति।

७) **दिव्यप्रकरणम् (Divine Tests): अस्मिन् प्रकरणे १९ श्लोकाः** सन्ति। अत्र लिखितसाक्षिभुक्तिः श्चेति त्रिविधं मानुषं प्रमाणम् उक्तम्। एतदुपरि तुला, अग्निः, अपः, विषः, कोश इत्यादि पञ्चविधाः दिव्यप्रमाणानि अपि उक्तानि। एतानि प्रमाणानि महाअभियोगेषु उपयुज्यन्ते। एतदुपरि महाभियोगेषु शंकितेषु अपवादः, दिव्ये साधरणविधिः, दिव्येषु पूर्वह्नादिकालाः, घट-अग्नि-उदक-विष-कोश-तण्डुला इत्यादीनां दिव्यविधिः, तप्तमाषविधिः, धर्माधर्माख्यविधिः इत्यादयः विषयाः अपि वर्णिता अस्ति।

८) **दायविभागप्रकरणम् (Divisions of Property among heirs):** अस्मिन् प्रकरणे ३६ श्लोकाः सन्ति । 'दायः' इति शब्देन पैत्रिकसम्पत्तिः तथैव भाग इत्यनेन उत्तराधिकारिषु विभाजनमिति बोध्यते । स च द्विविधः-अप्रतिबन्धः सप्रतिबन्धः च । तत्र पुत्राणां पौत्राणां च पुत्रत्वेन पौत्रत्वेन च पितृधनं पितामहधनं च स्वं भवति अप्रतिबन्धो दायः । पुनः च पितृव्यभ्रात्रादीनां तु पुत्राभावे स्वाम्यभावे च स्वं भवति इति सप्रतिबन्धो दायः । विभागो नाम द्रव्यसमुदायविषयाणामनेकस्वाम्यानां तदेकदेशेषु व्यवस्थापनम् । अस्मिन् प्रकरणे दायशब्दार्थः, दायलक्षणं, विभागलक्षणं, विभागनियमः, विषमविभागनिषेधः, पितृमरणान्तरं समविभागः, मातृधनम् भगिनीनां धनविभागः, भिन्नजातीयानां

पुत्राणां विभागः, मुख्यगौणपुत्राणां दायग्रहणव्यवस्था तथा तेषां स्वरूपम्, स्त्रीधनस्वरूपनिरूपणम्, स्त्रीधनभेदाः इत्यादि विषये वर्णिताः सन्ति।

९) **सीमाविवादप्रकरणम् (Laws relating to Disputes about Boundaries):** अस्मिन् प्रकरणे ९ श्लोकाः सन्ति । अस्मिन् अध्याये सीमाविवादानाम् चर्चा कृता अस्ति । सीमा क्षेत्रादिमर्यादा। सा चतुर्विधाः – जनपदसीमा, ग्रामसीमा, क्षेत्रसीमा, गृहसीमा च इति। अस्मिन् प्रकरणे सीमाविवादे निर्णयः, सीमावृक्षाः, सीमानिर्णयोपायः, सीमानिर्णये साक्षिणः निर्णीतसीमापत्रकरणप्रकारः, साक्षिणाम् अनृतवचने दण्डः, उत्तमसाहसदण्डलक्षणं इत्यादयः विषयाः चर्चिताः सन्ति।

१०) **स्वामीपालविवादप्रकरणम् (Laws Relating to Disputes amongst the Keepers):** अस्मिन् प्रकरणे ९ श्लोकाः सन्ति । अत्र क्षेत्रस्वामी तथा पशुपालिकायाः विवादविषये चर्चा कृता अस्ति। अत्र गवादिभिः परसस्यादिभक्षणे दण्डः, क्षेत्रस्वामिने फलदापनविषये निर्णयः, क्षेत्रविशेषे अपवादः, वृत्तिकरणप्रकारः इत्यादयः विषयाः वर्णिताः सन्ति।

११) **अस्वामिविक्रयप्रकरणम् (Laws Relating to Sale of Articles):** अस्मिन् प्रकरणे ७ श्लोकाः सन्ति। विक्रीयते असमक्षं यत् स अस्वामिविक्रयः इति ज्ञेयम्। अस्मिन् प्रकरणे अस्वामिविक्रयलक्षणं, स्वाम्यभियुक्तक्रेतुः कर्तव्यता, साक्ष्यादिभिः क्रयस्य अशोधने दण्डः इत्यादि विषये वर्णनाऽस्ति।

१२) **दत्ताप्रदानिकप्रकरणम् (Laws Relating to gift and its Acceptance):** अस्मिन् प्रकरणे २ श्लोकाः सन्ति। अत्र दत्ताप्रदानिक इति पदेन व्यवहारपदमभिधीयते। दत्तस्याप्रदानं पुनर्हरणं यस्मिन् दानाख्ये तत् दत्ताप्रदानिकं नाम व्यवहारः। अस्मिन् प्रकरणे दत्तानपाकर्मस्वरूपं, देय-अदेय भेदः, अदत्तप्रकारः, दत्तादत्तस्वरूपम् इत्यादि विषये चर्चा कृता अस्ति।

१३) **क्रीतानुशयप्रकरणम् (Laws Relating to Returning a Thing Purchased to the Seller):** अस्मिन् प्रकरणे ५ श्लोकाः सन्ति । क्रीत्वा मूल्येन यः पण्यं क्रेता न बहुमन्यते सः विवादः क्रीतानुशय इति कथ्यते। अत्र क्रीतानुशयस्वरूपं, प्रत्यर्पणीयनिर्णयः, बीजादिक्रये परीक्षाकालः, स्वर्णादिपरीक्षा ह्रासवृद्धिज्ञानोपायः इति एतत् वर्णितम् अस्ति।

११) **अभ्युपेत्याशुश्रूषाप्रकरणम् (Laws Relating to Breach of Contract):** अस्मिन् प्रकरणे ३ श्लोकाः सन्ति। अभ्युपेत्या तु अशुश्रुषात् विवाद एव उच्यते। आज्ञाकरणं शुश्रूषा, तमङ्गीकृत्य पश्चात यो न सम्पादयति तत् विवादपदम् अभ्युपेत्याशुश्रूषा इति कथ्यते। अस्मिन् प्रकरणे शुश्रूषाप्रकारः, कर्मकरप्रकारः, दासभेदाः, प्रव्रज्यावसितस्य मोक्षविषयाः, अन्तेवासिधर्माः इत्यादि विषये चर्चा कृता अस्ति।

१५) **संविद्यतिक्रमप्रकरणम् (Laws Relating to the Breach of Established Usage):** अस्मिन् प्राकरणे ८ श्लोकाः सन्ति । अस्मिन् प्रकरणे धर्मरक्षणाय ब्राह्मणस्थापना, नियुक्तकर्तव्यकर्म, तदतिक्रमादौ दण्डः, कार्यचिन्तकलक्षणम् इत्यादि विषयाः वर्णिताः भवन्ति।

१६) **वेतनादानप्रकरणम् (Laws Relating to Non payment of Wages):** अस्मिन् प्रकरणे ६ श्लोकाः सन्ति । अस्मिन् प्रकरणे वेतनादानस्वरूपं, गृहीतवेतनविषयः, अनाज्ञप्तकारिविषये भृतिदानप्रकारः इत्यादि विषयाः वर्णिताः अस्ति।

१७) **द्यूतसमाह्वयप्रकरणम् (Laws Relating to Gambling and Betting):** अस्मिन् प्रकरणे ५ श्लोकाः सन्ति। पणक्रीडाम् एव द्यूतसमाह्वय कथ्यते। अप्राणिभिः यत् क्रियते तत् लोके द्यूतम् उच्यते। प्राणिभिः क्रियमाणस्तु स विज्ञेयः समाह्वयः भवति (मनुस्मृति,९/२२३)। अत्र द्यूतसभाधिकारिणो वृत्तिः, सभिकस्य कर्तव्यम्, जयपराजयविप्रतिपत्तौ निर्णयोपायः, समाह्वये द्यूतधर्मातिदेशः इत्यादि विषयाः वर्णिताः अस्ति।

१८) **वाक्पारुष्यप्रकरणम् (Laws Relating to the use of Abusive Words and Defamation):** अस्मिन् प्रकरणे ८ श्लोकाः सन्ति। देशजातिकुलादीनां प्रतिकुलार्थं यत् वाक्यं तत् वाक्पारुष्यम् उच्यते। अत्र उल्लिखिताः विषयाः सन्ति – निष्ठुराक्रोशे सवर्णविषये दण्डः, अश्लीलाक्षेपे दण्डः, विषमगुणदण्डः, परस्पराक्षेपे दण्डः, प्रतिलोम-अनुलोमाक्षेपे दण्डःइत्यादिः।

१९) **दण्डपारुष्यप्रकरणम् (Laws Relating to Assault and Violence):** अस्मिन् प्रकरणे १८ श्लोकाः सन्ति। परगात्रेषु अभिद्रोहे हस्तपादायुधादिभिः भस्मादिभिः च उपघातो दण्डपारुष्यम् उच्यते। दण्ड्यते अनेन इति दण्डो देयः, तेन यत् पारुष्यं विरुद्धाचरणं जङ्गमादेः द्रव्यस्य तत् दण्डपारुष्यम्। अस्मिन् प्रकरणे दण्ड प्रणयनार्थं तत्स्वरूपसंदेहे निर्णयहेतुः, साधनविशेषेण दण्डविशेषः, प्रातिलोम्यापराधे दण्डः, केशादिलुञ्चने दण्डः, काष्ठादिभिः ताडने दण्डः, लोहितदर्शने दण्डः, बहिरङ्गार्थनाशे दण्डः, दुःखोत्पादादिद्रव्यप्रक्षेपे दण्डः, पञ्चभिद्रोहे दण्डः, वृक्षविशेषछेदने तथा गुल्मादीनां छेदने दण्डः, महापशुविषये दण्डः इत्यादि विषयाः वर्णिताः भवन्ति ।

२०) **साहसप्रकरणम् (Laws Relating to Robbery):** अस्मिन् प्रकरणे २४ श्लोकाः सन्ति। परकीयस्य द्रव्यस्य अपहरणम् एव साहसम्। राजदण्डं, जनाक्रोशं,च उलङ्घ्य राजपुरुषेतरजन समक्षं यत् किञ्चित् मारणहरणपरदारप्रधर्षणादिकं क्रियते तत् सर्वं साहसमिति साहसलक्षणम्। अस्मिन् प्रकरणे साहसलक्षणम्, प्रथमसाहस-मध्यमसाहस-उत्तमसाहसलक्षणं, परद्रव्यापहरणरूपे साहसे दण्डः, भ्रातृभार्याताडने दण्डः, अयुक्तशपथकरणे दण्डः, पितापुत्रविरोधे साक्षिणाम् दण्डः, जातिकरणे दण्डः इत्यादि विषयाः वर्णिताः भवति।

२१) **विक्रीयासंप्रदानाप्रकरणम्(Laws Relating to Non Delivery of Articles Sold):** अस्मिन् प्रकरणे ८ श्लोकाः सन्ति। विक्रीय पण्यं मूल्येन क्रेतुः यत न प्रदीयते तत् विवादं विक्रियासंप्रदानम् उच्यते। विक्रेयद्रव्यस्य चराचरभेदेन द्वैविध्यं, यथा - जङ्गमं स्थावरं च। अस्मिन् प्रकरणे विक्रीयासंप्रयच्छतो दण्डः, अर्घहानिविषये निर्णयः, निर्दोष सदोषदाने साधारणधर्माः इत्यादि विषयाः वर्णिताः भवति।

२२) **सम्भूयसमुत्थानप्रकरणम् (Laws Relating to Joint Stock Companies):** अस्मिन् प्रकरणे ७ श्लोकाः सन्ति। सर्वे मिलित्वा यत् एकं लाभदायकं व्यापारं करोति सः कर्मः सम्भूयसमुत्थानम् उच्यते। अस्मिन् प्रकरणे सम्भूयसमुत्थानविषये लाभालाभौ, प्रतिषिद्धादिविषये निर्णयः, राजनिरूपितार्धे राजभागः, शुक्लवञ्चनार्थं पण्यपरिमाणनिह्नवे दण्डः इत्यादि विषयाः वर्णिताः सन्ति।

२३) **स्तेयप्रकरणम् (Laws Relating to Theft):** अस्मिन् प्रकरणे १७ श्लोकाः सन्ति। स्तेय शब्दस्य अर्थम् अस्ति चौर्यम्। यत् स्वाम्याद्यसमक्षं परधनहरणादिकं कार्यं क्रियते तत् साहसं स्तेयम् उच्यते। अस्मिन् प्रकरणे स्तेयलक्षणम्, स्तेयग्रहणस्य ज्ञानोपायाः, चौरे दण्डः, चौरविशेषे अपवादः, क्षुद्रादिद्रव्यस्वरूपम्, तद्विषये दण्डनियमः, धान्यापहारे दण्डः, विप्रदुष्टादिस्त्रीणां दण्डः, सुवर्णाद्यपहारे दण्डः इत्यादि विषयाः वर्णिताः भवति।

२४) **स्त्रीसंग्रहणप्रकरणम् (Laws Relating to Adultery and Seduction) :**अस्मिन् प्रकरणे १२ श्लोकाः सन्ति। अस्य प्रकरणस्य प्रारम्भे प्रथमः, मध्यमः, उत्तम इति त्रयः प्रकाराः स्त्रीग्रहणविवादाः उल्लिखिताः सन्ति । एतदुपरि प्रतिषिद्धस्त्रीपुंसयोः पुनः संल्लापादिकरणे दण्डः, मात्रादिगमने दण्डः, प्रातिलोम्येन स्त्रीगमने क्षत्रियादिनां दण्डः, कन्यादूषणे दण्डः, वेश्याख्यानादिजातिनिरूपणम्, उत्तमवर्णकन्यासेवने दण्डः इत्यादि विषयाः वर्णिताः भवति।

२५) **प्रकीर्णकप्रकरणम् (Miscellaneous Rules) :**अस्मिन् प्रकरणे १३ श्लोकाः सन्ति। प्रकीर्णशब्देन व्यवहारपदम् उच्यते। तल्लक्षणं यथा- प्रकीर्णकेषु विज्ञेया व्यवहारा नृपाश्रयाः। ये विवादाः राजाज्ञोल्लङ्घनतदाज्ञाकरणादिविषयाः ते नृपसमवायिनः प्रकीर्णक विवादम् उच्यते। तत्र नृप एव स्मृत्याचारव्यपेतमार्गे वर्तमानानां प्रतिकुलताम् आस्थाय व्यवहारनिर्णयं कुर्यात्। अस्मिन् प्रकरणे स्त्रीपुंयोगाख्यव्यवहारः तथा तल्लक्षणं, स्त्रीपुंसयोः स्वमार्गे स्थापनं, अपराधवेशेषेदण्डः इत्यादि विषयाः वर्णिताः भवति।

तृतीयोऽध्यायस्य नाम प्रायश्चित्ताध्यायः। अस्मिन् अध्याये ५ प्रकरणाः तथा ३३४ श्लोकाः सन्ति। अस्य अध्यायस्य विषयवस्तु यथा-

१) **आशौचप्रकरणम् (Regulations about Asauce or Smrurity):** अस्मिन् प्रकरणे ३४ श्लोकाः सन्ति। अत्र गृहस्थाश्रमिणां नित्यनैमित्तिका धर्माः उक्ताः। अभिषेकादिगुणयुक्तस्य गृहस्थविशेषस्य गुणधर्माः च अत्र प्रदर्शिताः। 'आशौच' शब्देन कालस्नानाद्यपनोद्यः पिण्डोदकदानादिविधेः अध्यायनादिपर्युदासस्य च निमित्तभूतः पुरुषगतः कश्चनातिशयः कथ्यते, न पुनः कर्मानधिकारमात्रम्। अस्मिन् प्रकरणे शुद्धि अशुद्धिविषये अनेक विषयाः वर्णिताः सन्ति। तानि यथा- मृतविषये खननदाहादिनिर्णयः, उदकादाने निर्णयः, चाण्डलादि अग्नि निषेधः, प्रेतस्नानम्, प्रेतनयने द्वारनिर्णयः, अग्निसंस्कारोत्तरम् कर्तव्यता, उदकदाने

गुणविधिः, पाखण्ड्यादीनां मरणे आशौचादिनिर्णयः, ब्रह्मचारिविषये निर्णयः, प्रेतपिण्डदाने निर्णयः, स्मार्तकर्मविषये निर्णयः, जननमरणशौचसंस्कारे निर्णयः, जातमृते मृतजाते वा आशौचनियमः, ज्वरादिपीडितरजस्वलाविषयेशुद्धिनिर्णयः, मृत्युविशेषेणाशौचापवादः इत्यादिः।

२) **आपद्धर्मप्रकरणम् (Procedure Alloweble in Times of Exigency or Calamity):** अस्मिन् प्रकरणे १० श्लोकाः सन्ति। आपदकाले कष्टकाले च करणीय जीविकावृत्तीनां विषये अत्र वर्णनम् अस्ति। अर्थात्, आपदि वृत्त्यन्तरजीवननिर्णयः, ब्राह्मण-क्षत्रिय-वैश्य सम्बन्धयुक्तानि कर्माणि, निषिद्धातिक्रमे दोषः, आपद्यसत्प्रणिग्रहेऽदोषः, आपत्काले जीवनानि, राज्ञो वृत्तिविषये कर्तव्यता इत्यादि विषयाः अत्र वर्णिताः सन्ति।

३) **वानप्रस्थधर्मप्रकरणम् (Regulations Relating to Vanaprastha or the Third Stage of Life):** अस्मिन् प्रकरणे ११ श्लोकाः सन्ति। चतुर्णामाश्रमणां मध्ये तृतीयाश्रमः वानप्रस्थाश्रमस्य धर्मविषये अत्र उल्लिखिताः अस्ति। वने प्रकर्षेण नियमेन च तिष्ठति चरति इति वानप्रस्थः। वानप्रस्थो जटिलश्चीरजिनवासा न फालकृष्टमधितिष्ठेत् , वने मूलफलम् च खादयेत्, चीरं वस्त्रखण्डो वल्कलं वा परिधारयेत्। अस्मिन् प्रकरणे वानप्रस्थधर्माः, अग्निपरिचर्याक्षमविषये निर्णयः, चान्द्रायनादिविधानम्, भैक्षाचरणं इत्यादि विषयाः अत्र वर्णिताः सन्ति।

४) **यतिधर्मप्रकरणम् (Duties of a Yati or one who has renounced the World):** अस्मिन् प्रकरणे १०५ श्लोकाः सन्ति। अस्य प्रकरणस्य अन्य नाम अध्यात्मप्रकरणम्। अस्य प्रकरणस्य विषयवस्तु यथा – भिक्षाटने कर्तव्यता, जीवपरमात्मनोरभेदनिरूपणं, शरीरग्रहणप्रकारः, गर्भस्थैर्यादिकथनम्, कार्यस्वरूपकथनम्, अस्थिसंख्या, ज्ञानेन्द्रियानि, कर्मेन्द्रियाणि, प्राणायतनानि, नाडीसंख्या ,शिरासंख्या, सकलशरीरच्छिद्रसंख्या, आत्मध्यानप्रकारः, शब्दब्रह्मोपासनप्रकारः, सत्त्वादिगुणपरिपाकः, संसारस्वरूपं, मोक्ष,स्वर्ग तथा संसरणमार्गनिरूपणं, क्षेत्रज्ञस्वरूपं, वेदादीनामनादित्वनिरूपणं, देवयानमार्ग, पितृयानमार्ग, उपासनाप्रकारनिरूपणं, इत्यादि।

५) **प्रायश्चित्तप्रकरणम् (Regulations about Penance, Especially that for Brahmanicide):** अस्मिन् प्रकरणे १२९ श्लोकाः सन्ति। अत्र भिन्नप्रकारकानि महापातकानि उपपातकानि तथा तस्यैव परित्राणार्थं उपासना तथा प्रायश्चित्तविषये वर्णनम् अस्ति। एतदुपरि कर्मविपाकनिरूपणं, प्रायश्चित्ताधिकारिनिरूपणं, प्रायश्चित्ताऽकरणे दोषः, प्रायश्चित्तफलम्, ब्रह्महत्याप्रायश्चित्तस्यातिदेशः, सुरापानप्रायश्चित्तम्, सुवर्णस्तेयप्रायश्चित्तम्, निषिद्धसंसर्गोत्पन्नप्रतिलोमवधे प्रायश्चित्तम्, गोवधप्रायश्चित्तम्, वृक्षगुल्मलतादिच्छेदने

प्रायश्चित्तम्, सान्तपनाख्यव्रतम्, तप्तकृच्छ्रव्रतम्, प्राजापत्यकृच्छ्रव्रतम्, यमनियमाः इत्यादि विषयाः अत्र वर्णिताः सन्ति।

## १०.४.३: याज्ञवल्क्यस्मृतेः संकलनम् :

याज्ञवल्क्यस्मृतेः त्रीणि संस्करानि अतीव प्रसिद्धानि। तानि यथा -

- मुंबईनिर्णयसागरप्रेसे १९४९ प्रकाशिता विज्ञानेश्वरेण कृता‘ मिताक्षरा’ भाष्यसहिताः १००९ श्लोकयुक्ताः संस्करणाः। अस्मिन् मध्ये आचाराध्याये ३६४ श्लोकाः ,व्यवहाराध्याये ३०७ श्लोकाः, तथा प्रायश्चित्ताध्याये ३३४ श्लोकाः प्राप्यते।
- तिरुवन्तापुरात् (त्रीवान्द्रम्) प्रकाशिता तथा विश्वरूपाचार्यद्वारा विरचिता‘ बालक्रीडा ’टीकासहित १००३ श्लोकयुक्ताः संकलनम्। अत्र आचाराध्याये ३६३ श्लोकाः ,व्यवहाराध्याये ३१० श्लोकाः ,तथा प्रायश्चित्ताध्याये ३३३ श्लोकाः प्राप्यते।
- पूनेनगरीस्थित आनन्दाश्रमात् प्रकाशिता अपरादित्य विरचिता‘ अपरार्क ’टीकासहित १००६ श्लोकयुक्ताः संकलनम्। अत्र आचाराध्याये ३६६, व्यवहाराध्याये ३०६, प्रायश्चित्ताध्याये ३३४ श्लोकाः प्राप्यते।

## १०.४.४: याज्ञवल्क्यस्मृतेः भाष्यम्:

याज्ञवल्क्यस्मृतेः उपरि अनेकानि भाष्याणि लिखितानि सन्ति। एतेषु विश्वरूप-विज्ञानेश्वर-अपरार्क-शूलपाणि-मित्रमिश्ररचिता टीकाः प्रमुखाः तथा विशिष्टाः। एतेषां टीकाकारानां विषये अधः उल्लिखिताः सन्ति-

❖ **विश्वरूप (७५०-१००० शकाब्दा):** याज्ञवल्क्यस्मृतेः भाष्यकारेषु सर्वप्रथम तथा सर्वप्रसिद्धः भाष्यकारः अस्ति विश्वरुपाचार्यः। तेन विरचितटीकायाः नाम ‘बालक्रीडा’। महामहोपाध्याय गणपति शास्त्री महोदयेन इयं टीका ‘त्रिवान्द्रम् संस्कृत ग्रन्थमाला’ प्रेसे प्रकाशनं करोति। ‘बालक्रीडा’ टीकाया उपरि बहवः टीकाः सन्ति, परन्तु सा टीका सम्पूर्ण ग्रन्थरूपेण उपलब्धा न भवति। बालक्रीडाया प्रस्तावनायाम् उपरि ५५०० ग्रन्थाः उपलब्धाः सन्ति तथा च द्वितीयप्रस्तावना वचनमालामुपरि ६००० ग्रन्थाः प्राप्यन्ते, परन्तु ग्रन्थ तथा ग्रन्थकारानां नाम कुत्रापि न उल्लिखितम् अस्ति। अन्य तिस्रः टीकाः सन्ति – विभावना, टीका, अमृतस्यन्दिनी च। एते ग्रन्थाः विश्वरूपस्य कर्तृत्वम् सूचयति।

मुनि याज्ञवल्क्यस्य आचाराध्याये तथा प्रायश्चित्ताध्याये योऽभिप्रायः आसीत स याज्ञवल्क्योतीव सुन्दररूपेण उपस्थापनम् अकरोत्। अतः विश्वरूपाचार्यः याज्ञवल्क्यस्मृतेः प्रारम्भे एव एकेन श्लोकेन ससम्मानं प्रदर्शनं करोति –

"याज्ञवल्क्यमुनिभाषितम्मुहुः विश्वरूपभिकटोक्तिविस्तृतम्"

टीकाकार विश्वरूपाचार्यः वेद, स्मृति तथा गृह्यसूत्रेषु अनेकान् उद्धृतिः प्रस्तुतं करोति। मीमांसायां प्रति तस्य अधिक प्रवृत्तिः आसीत। सः बहवः जैमिनीयसूत्राः उद्धारम् अपि अकरोत्।

❖ **विज्ञानेश्वर (१०७०-१११५ शकाब्दा):** याज्ञवल्क्यस्मृतेः उपरि विज्ञानेश्वरकृता सर्वप्रसिद्धा टीका अस्ति ऋजुमिताक्षराटीका। इयं टीका संक्षेपेन मिताक्षरा इति कथ्यते। याज्ञवल्क्यस्मृतेः मिताक्षरा टीका सर्वेषु भाष्येषु प्रसिद्धा महत्त्वपूर्णा च अस्ति। समस्तधर्मसाहित्ये इयं टीका अद्वितीयरूपेण स्वीकृता आसीत। इयं टीका अतीव सुस्पष्टा, सरला तथा सारगर्भिनी। भारतवर्षे प्रायः सर्वेषु देशेषु तत्तदेशवासिप्रधानपण्डितप्रणीतेषु विज्ञानेश्वरस्य कृतेः मिताक्षरायाः महत्वं सर्वैः अनुभूयते अङ्गीक्रियते च। मिताक्षराटीकायाम् उपरि वालभट्टरचित 'वालम्भटी' टीका एका जनप्रिय टीका अस्ति, यत्र १०००० श्लोकाः प्राप्यते।

विज्ञानेश्वरपण्डितः कदा कुत्र समुत्पन्न इति जिज्ञासायामित्थं विचार्यते यत् विज्ञानेश्वराचार्यस्य जन्म भरद्वाजगोत्रे अभवत तथा तस्य पितुः नाम पद्मनाभ भट्टोपाध्याय आसीत इति मिताक्षरान्तपुष्पिकायां 'इति श्रीभारद्वाजपद्मनाभभट्टोपाध्यायात्मजस्य' इति उक्तवान्। तस्य गुरोः नाम उत्तमात्मा अथवा आत्मोत्तम इति एकः श्लोकेन प्रतीतं भवति- "उत्तमोपपदस्येयं शिष्यस्य कृतिरात्मनः"। एतदुपरि मिताक्षराया अवसाने विज्ञानेश्वरेण स्वाश्रयभूतो नृपतिविक्रमादित्यः इति श्लोकत्रयेण कीर्तितः। काश्मीरकविबिल्हनविरचित 'विक्रमाङ्कदेवचरित' नामक महाकाव्ये विक्रमादित्यस्य वर्णनम् अस्ति। विक्रमाङ्कदेवचरितनिर्माणसमयः ख्रीष्टिय एकादशशतकस्य चरमभागः। विक्रमादित्यराजधानीत्वेन विज्ञानेश्वरोल्लिखितं कल्याणपुरं तावत्सम्प्रत्यपि हैदराबादराज्ये 'कल्याणकीर्ति' रिति नाम्ना प्रथितमस्ति। तथा विक्रमादित्यसमय एव विज्ञानेश्वरस्यापि समय इति सिद्ध्यति।

❖ **अपरार्क (११२५ शकाब्दा):** याज्ञवल्क्यस्मृतेः उपरि अपरादित्यचार्याकृता टीका अस्ति अपरार्क। इयं टीका पुनेस्थित आनन्दाश्रम संस्कृत ग्रन्थावल्यां प्रकाशिता भवति। आचार्य अपरादित्यस्य जन्मसमयः १११५-११३० शकाब्दायाः मध्यभागाः इति वक्तुं शक्यते। तस्य पितुः नाम अनन्तदेव तथा पितामह नागार्जुनः आसीत।

❖ **शूलपाणि (१३७५-१४६० शकाब्दा):** शूलपाणिः पश्चिमवंगस्य धर्मशास्त्रीयनिबंधकारेषु प्रमुखः आसीत। याज्ञवल्क्यस्मृतेः उपरि तस्य कृता टीकायाः नाम दीपकलिका। अयं टीका अतीव संक्षिप्त तथा प्रामाणिक इति मन्यते।

❖ **मित्रमिश्र (१८०० शकाब्दा):** याज्ञवल्क्यस्मृतेरुपरि मित्रमिश्रकृता' वीरमित्रोदय' टीका अतीव विशाल तथा प्रमेयोऽस्ति ।

## १०.५: अध्यायस्य असमीयासारांशः

স্মৃতিসাহিত্যই উত্তৰ বৈদিক গ্ৰন্থসমূহৰ ইংগিত দিয়ে। এই স্মৃতিসমূহৰ ভিতৰত বেদাঙ্গ, মহাভাৰত, ৰামায়ণ, ধৰ্মশাস্ত্ৰ, পুৰাণ, অৰ্থশাস্ত্ৰ আদি অন্তৰ্ভুক্ত হৈছে। স্মৃতিসমূহ ধৰ্মৰ সৈতে জড়িত সেয়েহে স্মৃতিক ধৰ্মশাস্ত্ৰ বুলিও কোৱা হয় – ' ধৰ্মশাস্ত্ৰস্তু বৈ স্মৃতিঃ' । স্মৃতি সাহিত্য হৈছে প্ৰাচীন ভাৰতীয় বেদাদি সাহিত্যসমূহৰ ভিতৰত এক অনুপম গ্ৰন্থ। ব্যুৎপত্তিগতভাৱে সংস্কৃত মুল শব্দ ' স্মৃ' ৰ সৈতে ক্তিন্ প্ৰত্যয় যোগ হৈ স্মৃতি শব্দৰ উৎপত্তি হৈছে । যিবোৰ গ্ৰন্থত বৈদিক আচাৰ ব্যৱহাৰৰ বিষয়ে বৰ্ণনা পোৱা যায় সেইবোৰেই স্মৃতিগ্ৰন্থ। স্মৃতিৰ পৰম্পৰাগত আলোচনাৰ বিষয় হৈছে – আচাৰ, ব্যবহাৰ আৰু প্ৰায়শ্চিত্ত ।

ধৰ্মশাস্ত্ৰকাৰসকলৰ ভিতৰত মুনি যাজ্ঞবল্ক্যৰ স্থান অতি মহত্বপূৰ্ণ। তেওঁৰ দ্বাৰা ৰচিত গ্ৰন্থখন 'যাজ্ঞবল্ক্যস্মৃতি' নামেৰে প্ৰসিদ্ধ । শতপথব্ৰাহ্মণত যাজ্ঞবল্ক্যৰ বিষয়ে অনেক আখ্যান পোৱা যায় । সেই অনুসৰি মুনি যাজ্ঞবল্ক্যই জনকক অগ্নিহোত্ৰ যজ্ঞৰ বিষয়ে অৱগত কৰোৱাৰ লগতে তেওঁ ৰজা জনকৰ পৰা যজ্ঞীয় ক্ৰিয়াকৰ্মৰ জ্ঞান প্ৰাপ্ত কৰাৰ আখ্যান পোৱা যায় । মহাভাৰতৰ শান্তিপৰ্ব, শতপথব্ৰাহ্মণ তথা ভাগৱতত পোৱা অনুসৰি যাজ্ঞবল্ক্য বৈশম্পায়নৰ শিষ্য আছিল। বৈশম্পায়নৰ ওচৰতেই তেওঁ যজুৰ্বেদৰ শিক্ষা গ্ৰহণ কৰিছিল । যাজ্ঞবল্ক্যস্মৃতি গ্ৰন্থৰ ৰচনাকাৰৰ প্ৰসংগত কিছু মতানৈক্যও দেখিবলৈ পোৱা যায় । বিজ্ঞানেশ্বৰৰ কথন অনুসৰি এই স্মৃতিগ্ৰন্থৰ ৰচক যাজ্ঞবল্ক্যৰ কোনো শিষ্য আছিল। কিন্তু পিছলৈ এই কথা খণ্ডন হয়  কিয়নো গ্ৰন্থখনৰ ৪-৫ নং শ্লোকৰ ব্যাখ্যাত দুবাৰকৈ 'যাজ্ঞবল্ক্যপ্ৰণীতস্য' তথা 'যাজ্ঞবল্ক্যপ্ৰণীতম্' বুলি উল্লেখ আছে। ইয়াৰ উপৰিও আচাৰাধ্যায়ৰ দ্বিতীয় শ্লোকত 'মিথিলাস্থ: স যোগীন্দ্ৰ' বুলি কোৱা হৈছে, যাৰ দ্বাৰা প্ৰাচীন পৰম্পৰাৰ সমৰ্থন হৈছে লগতে ইয়াৰ দ্বাৰা অনুমান কৰিব পাৰি যে – যোগীবৰ মুনি যাজ্ঞবল্ক্য মিথিলা নিবাসী আছিল। মিথিলা নগৰতেই তেওঁ শিক্ষাৰ প্ৰচাৰ চলাইছিল । তাত থকা লোকসকলক উপদেশ দিয়াৰ লগতে পুৰাণশাস্ত্ৰৰ মহত্বৰ কথা বৰ্ণনা কৰিছিল । মুনি যাজ্ঞবল্ক্য বিৰচিত যাজ্ঞবল্ক্যস্মৃতি গ্ৰন্থখন ঠাইভেদে বিভিন্ন নামেৰে জনা যায়। সেই অনুসৰি – বৃদ্ধযাজ্ঞবল্ক্য, যোগযাজ্ঞবল্ক্য, তথা বৃহদ্‌যাজ্ঞবল্ক্য ইত্যাদি নামবোৰ প্ৰসিদ্ধ ।

স্মৃতিসাহিত্যত মনুস্মৃতিৰ পিছতেই দ্বিতীয়খন মহত্বপূৰ্ণ গ্ৰন্থ হৈছে যাজ্ঞবল্ক্যস্মৃতি । মনুস্মৃতিৰ তুলনাত যাজ্ঞবল্ক্যস্মৃতি অধিক ব্যৱহাৰিক । স্মৃতিসাহিত্যৰ ভিতৰত যাজ্ঞবল্ক্যস্মৃতিয়ে এক উচ্চ স্থান দখল কৰিছে । শৈলী আৰু বিষয়বস্তুৰ সন্দৰ্ভত ৰবাট লিংগাটে মন্তব্য আগবঢ়াইছে যে – যদিও যাজ্ঞবল্ক্যস্মৃতি বিভিন্ন উৎসৰ পৰা লোৱা উপাদানেৰে গঠিত তথাপিও কিন্তু ই আটাইতকৈ সমজাতীয় তথা সৰ্বোত্তম ৰচনা । মনুস্মৃতিত পোৱা প্ৰায়বোৰ বিষয়বস্তু যাজ্ঞবল্ক্যই এই স্মৃতিশাস্ত্ৰত উল্লেখ কৰিছে যদিও এই গ্ৰন্থখন অধিক সূক্ষ্ম তথা স্পষ্ট বুলি পণ্ডিত ৰেৱৰে উল্লেখ কৰিছে । সমগ্ৰ যাজ্ঞবল্ক্যস্মৃতি গ্ৰন্থখন পদ্যত ৰচিত তথা ইয়াত অনুষ্টুপ ছন্দৰ প্ৰয়োগ দেখিবলৈ পোৱা যায় ৱিণ্টাৰনিটজৰ দৃষ্টিত মনুস্মৃতিৰ দৰে যাজ্ঞবল্ক্যস্মৃতিয়েও ভাষা, শৈলী আৰু বিষয়বস্তুৰ ক্ষেত্ৰত গুঢ় কবিতাৰ দৰে সাদৃশ্য অৱলম্বন কৰিছে ।

মুনি যাজ্ঞবল্ক্য হৈছে প্ৰথম স্মৃতিলেখক, যিয়ে স্মৃতিশাস্ত্ৰৰ বিষয়সমূহক তিনিটা অধ্যায়ত বিভক্ত কৰিছিল। সেয়া হৈছে – আচাৰাধ্যায়, ব্যৱহাৰাধ্যায় আৰু প্ৰায়শ্চিত্তাধ্যায় । ইয়াৰে আচাৰাধ্যায় নামৰ প্ৰথম অধ্যায়ত ১৩টা প্ৰকৰণ

আছে আৰু প্ৰায় ৩৬৮ টা শ্লোক আছে। ব্যৱহাৰাধ্যায় নামৰ দ্বিতীয় অধ্যায়ত ২৫ টা প্ৰকৰণ আছে আৰু ২০৭ টা শ্লোক আছে । প্ৰায়শ্চিত্তাধ্যায় নামৰ তৃতীয় অধ্যায়ত ৫ টা প্ৰকৰণ আছে আৰু প্ৰায় ৩৩৪ টা শ্লোক আছে । সম্পূৰ্ণ যাজ্ঞবল্ক্যস্মৃতি গ্ৰন্থখনত মুঠ ১০০০ টা শ্লোক পোৱা যায় । শৈলীৰ ফালৰ পৰা চাবলৈ গলে এইখন এখন প্ৰবাহময় গ্ৰন্থ। যাজ্ঞবল্ক্যস্মৃতিত বেদ, বেদাঙ্গ, আৰণ্যক, উপনিষদ, পুৰাণ, ইতিহাস আদিৰ উপৰিও যাজ্ঞবল্ক্যপ্ৰণীত বৃহদাৰণ্যক আৰু যোগশাস্ত্ৰৰ উল্লেখ আছে । যাজ্ঞবল্ক্যস্মৃতিৰ বিষয়বস্তুৱে ধৰ্মৰ বিশাল ক্ষেত্ৰখনৰ ভিতৰত এক যুক্তিসংগত শ্ৰেণবিভাজন কৰে ।

বিষয়বস্তুৰ ফালৰ পৰা যাজ্ঞবল্ক্যস্মৃতি গ্ৰন্থখন অধিক বিশাল । ইয়াৰে আচাৰাধ্যায় নামৰ প্ৰথম অধ্যায়ত ১৩টা প্ৰকৰণ আছে। সেইবোৰ হ'ল – উপোদ্ঘাত প্ৰকৰণ, ব্ৰহ্মচাৰি প্ৰকৰণ, বিবাহ প্ৰকৰণ, বৰ্ণজাতিবিবেক প্ৰকৰণ, গৃহস্থধৰ্ম প্ৰকৰণ, স্নাতকধৰ্ম প্ৰকৰণ, ভক্ষ্যাভক্ষ্য প্ৰকৰণ, দ্ৰব্যশুদ্ধি প্ৰকৰণ, দান প্ৰকৰণ, শ্ৰাদ্ধ প্ৰকৰণ, গণপতিকল্প প্ৰকৰণ, গ্ৰহশান্তি প্ৰকৰণ আৰু ৰাজধৰ্ম প্ৰকৰণ। তেনেদৰে ব্যৱহাৰাধ্যায় নামৰ দ্বিতীয় অধ্যায়ত ২৫ টা প্ৰকৰণ আছে । সেইবোৰ হ'ল – সাধাৰণব্যৱহাৰমাতৃকা প্ৰকৰণ, অসাধাৰণব্যৱহাৰমাতৃকা প্ৰকৰণ, ঋণাদান প্ৰকৰণ, উপনিধি প্ৰকৰণ, সাক্ষি প্ৰকৰণ, লেখ্য প্ৰকৰণ, দিব্য প্ৰকৰণ, দায়ভাগ প্ৰকৰণ, সীমাবিবাদ প্ৰকৰণ, স্বামীপালবিবাদ প্ৰকৰণ, অস্বামিবিক্ৰয় প্ৰকৰণ, দত্তাপ্ৰদানিক প্ৰকৰণ, ক্ৰীতানুশয় প্ৰকৰণ, অভ্যুপেত্যাশুশ্ৰূষা প্ৰকৰণ, সংবিদ্ব্যতিক্ৰম প্ৰকৰণ, বেতনাদান প্ৰকৰণ, দ্যুতসমাহ্বয় প্ৰকৰণ, বাকপাৰুষ্য প্ৰকৰণ, দণ্ডপাৰুষ্য প্ৰকৰণ, সাহস প্ৰকৰণ, বিক্ৰীয়াসংপ্ৰদান প্ৰকৰণ, সম্ভূয়সমুত্থান প্ৰকৰণ, স্তেয় প্ৰকৰণ, স্ত্ৰীসংগ্ৰহ প্ৰকৰণ আৰু প্ৰকীৰ্ণক প্ৰকৰণ । শেষৰটো অধ্যায় হৈছে প্ৰায়শ্চিত্তাধ্যায়, য'ত ৫ টা প্ৰকৰণ আছে। সেইবোৰ হ'ল – অশৌচ প্ৰকৰণ, অপদ্ধৰ্ম প্ৰকৰণ, বানপ্ৰস্থধৰ্ম প্ৰকৰণ, যতিধৰ্ম প্ৰকৰণ আৰু প্ৰায়শ্চিত্ত প্ৰকৰণ ।

যাজ্ঞবল্ক্যস্মৃতিৰ ওপৰত কেইবাটাও টীকা ৰচিত হৈছে। যাজ্ঞবল্ক্যস্মৃতিত যিবোৰ গ্ৰহণযোগ্য ৰীতি-নীতি আৰু ব্যৱহাৰ লিপিবদ্ধ কৰা হৈছে সেই সকলোবোৰ এই টীকাসমূহৰ দ্বাৰা সংশোধন তথা ব্যাখ্যা কৰা হৈছে । এই সকলোবোৰ টীকাৰ ভিতৰত বিশ্বৰূপ, বিজ্ঞানেশ্বৰ, অপৰাৰ্ক, শূলপাণি আৰু মিত্ৰমিশ্ৰই ৰচনা কৰা টীকাবোৰ অতি প্ৰসিদ্ধ ।

## १०.६: अध्यायात् किमवगतम्

अस्मिन अध्याये वयं निम्नलिखितविषयाणां चर्चां कृतवन्तः

- प्राचीन भारतीय स्मृतिशास्त्रस्य विषये ज्ञानं प्राप्तवान्।

**अग्रगत्याः निरीक्षणम्**

**प्रश्न १ :**याज्ञवल्क्यस्मृतेः रचनाकारः कः ?

**प्रश्न २**: याज्ञवल्क्यः कस्य नगरस्य निवासी आसीत् ?

**प्रश्न ३:** याज्ञवल्क्यः स्वकीयग्रन्थे कतिपयानां ग्रन्थकारानां नाम उल्लेखयति ?

**प्रश्न ४:** याज्ञवल्क्यस्मृतिग्रन्थे कतिः अध्यायाः सन्ति ? ते के ?

**प्रश्न ५:** याज्ञवल्क्यस्मृतिग्रन्थे कति श्लोकाः सन्ति ?

**प्रश्न ६:** याज्ञवल्क्यस्मृतिग्रन्थस्य प्रथमाध्यायस्य नाम किम् ?अत्र कतिपयानि प्रकरणानि सन्ति ?

**प्रश्न ७:** याज्ञवल्क्यस्मृतेः मुख्यटीकाकारेण विज्ञानेश्वरेन कृताटीकायाः नाम किम् ?

**प्रश्न ८ :**व्यवहाराध्याये कति प्रकरणानि सन्ति ?

**प्रश्न ९:** 'व्यवहारमातृका 'शब्दस्य अर्थः किम् ?

**प्रश्न १०:** 'दाय' शब्दस्य अर्थः किम् ?

**प्रश्न ११:** लेख्य कति प्रकाराः ?

**प्रश्न १२:** व्यवहाराध्यायस्य अन्तिमप्रकरणस्य नाम किम ?

**प्रश्न १३:** प्रायश्चित्ताध्याये कति प्रकरणाः सन्ति?

**प्रश्न १४:** आचार्यविज्ञानेश्वरकृता टीकायाः नाम किम ?

**प्रश्न १५:** 'वीरमित्रोदय' टीकायाः रचयिता कः अस्ति ?

- प्राचीन स्मृतिशास्त्रकारः महर्षि याज्ञवल्क्यस्य विषये ज्ञानं प्राप्तवान्।
- याज्ञवल्क्यस्मृतिग्रन्थस्य विषयवस्तु विषये ज्ञानं प्राप्तवान्।
- याज्ञवल्क्यस्मृतेः टीकाकाराणां विषये ज्ञानं प्राप्तवान्।
- याज्ञवल्क्यस्मृतेः रचनाकालविषये ज्ञानं प्राप्तवान्।

## १०.७: ज्ञानाधिक्यम्


- खिस्ते, प° नारायण शास्त्री, "याज्ञवल्क्यस्मृति", वाराणसी: चौखम्बा संस्कृत सीरीज अफिच, १९९७
- झा, (ड (°शशिनाथ, "याज्ञवल्क्यसंहिता", व्यवहार-अध्याय", दिल्ली: भारतीय विद्या प्रकाशन, २००२
- पाण्डे, (ड°) उमेशचन्द्र, "याज्ञवल्क्यस्मृति", वाराणसी: चौखम्बा संस्कृत संस्थान, १९९४
- पाण्डे, (ड°) आर. के, "याज्ञवल्क्यसंहिता" दिल्ली: भारतीय कला प्रकाशन, २०११


## १०.८: अग्रगत्याः निरूपणम्

**प्रश्नः १। उत्तरम्** - महर्षिः याज्ञवल्क्यः ।

**प्रश्नः २। उत्तरम्** - मिथिलानगरी ।

**प्रश्नः ३। उत्तरम्** - २० जनाः ।

**प्रश्नः ४। उत्तरम्** - त्रयः अध्यायाः सन्ति। ते यथा – आचारः, व्यवहारः प्रायश्चित्तः च ।

**प्रश्नः ५। उत्तरम्** - १००९ श्लोकाः सन्ति ।

**प्रश्नः ६। उत्तरम्** - आचाराध्यायः । अत्र १३ प्रकरणाः सन्ति ।

**प्रश्नः ७। उत्तरम्** - मिताक्षरा टीका ।

**प्रश्नः ८। उत्तरम्** - २५ प्रकरणानि सन्ति ।

**प्रश्नः ९। उत्तरम्** - विवाद अथवा मोकर्दमा ।

**प्रश्नः १०। उत्तरम्** - पैत्रिकसम्पत्तिः ।

**प्रश्नः ११। उत्तरम्** - द्विप्रकाराः ।

**प्रश्नः १२। उत्तरम्** - प्रकीर्णकप्रकरणौ ।

**प्रश्नः १३। उत्तरम्** - ५ प्रकरणानि सन्ति ।

**प्रश्नः १४। उत्तरम्** - मिताक्षरा टीका ।

**प्रश्नः १५। उत्तरम्** - मित्रमिश्र ।

## ⑦१०.९: अभ्यासप्रश्नाः

क) **वस्तुधर्मी प्रश्नाः**

**प्रश्न १:** याज्ञवल्क्यस्मृति ग्रन्थः कति अध्यायेषु विभक्ताः ?

**प्रश्न २:** आचाराध्याये कति प्रकरणाः सन्ति ?

**प्रश्न ३:** व्यवहाराध्याये कति श्लोकाः सन्ति ?

**प्रश्न ४:** याज्ञवल्क्यस्मृति ग्रन्थस्य श्लोकाः कस्मिन छन्दे विरचिताः अस्ति ?

**प्रश्न ५:** याज्ञवल्क्यस्मृतेः रचना कदा भवति ?

**प्रश्न ६:** गृहस्थधर्मप्रकरणस्य विषयवस्तु किम् अस्ति?

**प्रश्न ७:** शूलपाणिकृता टीकायाः नाम किम?

**ख) लघु प्रश्नाः**

**प्रश्न १:** मनुयाज्ञवल्क्ययोः मध्ये सादृश्यं किम् अस्ति ?

**प्रश्न २:** आचाराध्यायस्य अंतर्गते ब्रह्मचारिप्रकरणे उल्लिखिताः विषयाः के सन्ति ?

**प्रश्न ३:** व्यवहाराध्यायस्य दायभागप्रकरणस्य विषयवस्तु किम् अस्ति ?

**प्रश्न ४:** याज्ञवल्क्यस्मृतेः प्रयोजनं किम् अस्ति?

**ग) वर्णनात्मिका प्रश्नाः**

**प्रश्न १:** याज्ञवल्क्यस्मृतेः टीकाकारस्य तथा टीकायाः विषये संक्षेपेन व्याख्यां करोतु।

**प्रश्न २:** याज्ञवल्क्यस्मृतेः आचाराध्यायस्य विषयवस्तूनां विषये अलोचनां करोतु।

**प्रश्न ३:** याज्ञवल्क्यस्मृतेः व्यवहाराध्यायस्य विषयवस्तूनां विषये अलोचनां करोतु।

*****

# अध्यायः ११ याज्ञवल्क्यस्मृतिः (व्यवहाराध्यायः, व्यवहारस्य धारणा)

## अध्यायसंरचना:

११.१: उद्देश्यम्

११.२: परिचयः

११.३: व्यवहार शब्दस्य अर्थः व्युत्पत्तिः च

११.४: स्मृतिशास्त्रे व्यवहारस्य अर्थः

११.५: व्यवहारस्य लक्षणम्

११.६: व्यवहारस्य प्रयोजनम्

११.७: व्यवहारस्य प्रकारभेदः

११.८: चतुष्पादानां प्रयोगः

११.९: व्यवहारपदम् (विवादस्थानम्)

११.१०: अध्यायस्य असमीयासारांशः

११. ११: अध्यायात् किमवगतम्

११.१२: ज्ञानाधिक्यम्

११.१३: अग्रगत्याः निरूपणम्

११.१४: अभ्यासप्रश्नाः

## ११. १: उद्देश्यम्

अयम् अध्यायम् अधीत्य भवान् –

- प्राचीन भारते प्रयुक्ताः विचारव्यवस्थानां विषये परिचयं प्राप्स्यसि।
- व्यवहारस्य अर्थात विचारस्य अर्थं लक्षणं च ज्ञातुं शक्नुवन्ति।
- व्यवहारस्य प्रकारभेदानां ज्ञानं प्राप्तुं शक्यते।
- प्राचीन भारते प्रयुक्ता न्यायव्यवस्थानां विषये परिचयं प्राप्स्यसि।
- व्यवहारस्य प्रयोजनविषये ज्ञानं प्राप्तुं शक्यते।
- व्यवहारस्य पदानां विषये अवगन्तुं शक्नोति।
- विवदस्थानानां विषये ज्ञानं प्राप्तुं शक्यते।

## ११. २: परिचयः

स्मृतिशास्त्रेषु याज्ञवलक्यस्मृतिः अन्यतमः। सम्पूर्णः याज्ञवलक्यस्मृतिग्रन्थः त्रिषु अध्यायेषु विभक्तः । ते यथा – आचाराध्यायः, व्यवहाराध्यायः, प्रायश्चित्ताध्यायश्च। एतेषु द्वितीयाध्याये आचार्यः याज्ञवलक्यः व्यवहाराणां विषये विस्तृतरूपेण व्याख्यां कृतवान् । मनुष्यजीवने करणीयाः कर्तव्याः स्मृतिशास्त्रेषु लिपिवद्धाः भवन्ति । एतेषां स्मृतिशास्त्राणां विषये ज्ञानरहितः कोऽपि व्यक्तिः यदि हिताहितज्ञानशून्यं भूत्वा अन्यं जनमाक्रमति तथा च यदि सः पीडितः तस्मिन् विषये राज्ञः साम्मुख्ये गोचरति, तदा सः व्यवहारपदवाच्यो भवति। अस्याः विचारपद्धतेः राजा एव दण्डविधानकर्ता । राजा दण्डविधानसमये धर्मशास्त्रम् अनुसृत्य क्रोधः लोभः च वर्जयित्वा प्रतिदिनं व्यवहारविषये ज्ञातुं शक्नोति । व्यवहारः स्मृतिशास्त्रस्य पारिभाषिकः शब्दः । अस्य अर्थः अस्ति – विचारप्रक्रिया विचारपद्धतिः वा । अस्मिन् अध्याये मुनिः याज्ञवलक्यः व्यवहारस्य प्रयोजनम्, व्यवहारस्य लक्षणम्, विवादस्थानम्, विवादप्रक्रिया, साक्षी, प्रमाणम् इत्यादिविषयेषु सूक्ष्मरूपेण उपस्थापनं करोति।

## ११.०३: व्यवहार शब्दस्य अर्थः व्युत्पत्तिः च :

महाभारतानुसारं धर्मनिरपेक्षः नगरनयश्च व्यवहारः इत्युच्यते। धर्मनियमदिशा व्यवहारस्य नियमाः अपि पवित्राः महान्तश्च । राजनैतिक शासनात् एव व्यवहारस्य उत्पत्तिः जायते इति अत्र स्वीक्रियते । 'व्यवहार' शब्दः मनुष्याणां मध्ये भिन्नप्रकारेषु प्रचारिताः भवन्ति। अर्थात् अस्य शब्दस्य लोकेषु प्रचलिताः भिन्नाः भिन्नाः अर्थाः सन्ति। ते यथा: विवादः न्यायः च (Legal dispute, suit, complain, law suit, litigation), न्यायिक प्रक्रिया (Judicial procedure), आचरणं (Conduct behaviour), नियमः, आचारः, सामाजिकव्यवस्था, (Custom, an established rule or practice), कर्मक्रिया (Action, affair, work), पारस्परिकः आचरणः (Dealing, Transaction), व्यापारः (Commerce, trade, traffic), कुशीदः (Dealing in money usury), सम्बन्धः (Relation, Connection) इत्यादि।

व्यवहारशब्दस्य व्युत्पत्तिः यथा – " व्यवह्रियते अनेन इति" । वि- अव – उपसर्गपूर्वकं ह्रि- धातुना सह करणवाच्ये घञ् प्रत्यये कृते सति 'व्यवहार'- शब्दः निष्पद्यते । अत्र वि- शब्दस्य विभिन्नप्रकारकेषु अर्थेषु (विषयेषु), अव- शब्दस्य संदेहार्थे तथा ह्रि- शब्दस्य हरणार्थे (दूरीकरणार्थे) व्यवहारो भवति।

## ११.०४: स्मृतिशास्त्रेषु 'व्यवहार' शब्दस्यार्थः

व्यवहारशब्दस्य साधरणार्थः विभिन्नेषु अर्थेषु प्राप्यते। परन्तु प्राचीनभारतीयधर्मशास्त्रेषु अयं शब्दः पारिभाषिकार्थे (Technical meaning) व्यवहारो भवति । स्मृतिशास्त्रेषु न्यायप्रयोगपद्धतिरूपेण (Judicial procedure) 'व्यवहार' इति शब्दस्यार्थः परिलक्ष्यते ।

धर्मशास्त्रेषु स्मृतिशास्त्रेषु च 'व्यवहार' शब्दस्य विभिन्नार्थेषु प्रयोगः दृश्यते । तेषु यथा –

१) गौतमधर्मसूत्रे व्यवहारशब्दस्य "कस्यापि विषयनिर्णयस्य उपायः" इति रूपेण अर्थः परिदृश्यते – "तस्य व्यवहारो वेदो धर्मशास्त्राण्यङ्गानि" ।

२) वसिष्ठधर्मसूत्रे तथा शङ्खस्मृतौ "विवादे अंशग्रहणयोग्यता" इत्यर्थे व्यवहारशब्दास्यार्थः प्रयोगः परिलक्ष्यते ।

३) आपस्तम्बधर्मसूत्रे (२/७/१६-१७; १/६/२०; ११,१६) "परस्पराचरणार्थे" व्यवहारः शब्दस्यार्थस्य प्रयोगो भवति ।

४) महाभारतस्य उद्योगपर्वे पारस्परिकार्थे तथा च शान्तिपर्वे (६९/२८) विवादविषये विवादार्थे च व्यवहारशब्दस्य प्रयोगः परिलक्ष्यते ।

५) चण्डेश्वरठाकुररचिते 'विवादरत्नाकर'नामके ग्रन्थे "विवादे अंशग्रहणयोग्यता" इत्यस्मिन् अर्थे व्यवहारशब्दस्य प्रयोगः क्रियते – 'रक्षेद् राजा वालानां धनानि अप्राप्तव्यवहाराणां'।

६) विष्णुधर्मसूत्रे (३/७२), मनुसंहितायां (८/१), याज्ञवलक्यसंहितायां (२/१), नारदस्मृतौ (१/१), शुक्रनीतिसारे (४/५५), तथा वसिष्ठधर्मशास्त्रे विवादार्थे तथा विवादविषये व्यवहारशब्दस्य प्रयोगः परिलक्ष्यते ।

स्मृतिशास्त्रकारेषु वरदराजः, चण्डेश्वरः इत्यादिभिः विवादविषये तथा विचारपद्धतौ व्यवहारशब्दस्यार्थः प्रयोगः क्रियते । बहुसंख्यकैः पण्डितैः उक्तार्थद्वये एव व्यवहारशब्दः प्रयुज्यते। आचार्य याज्ञवलक्येन विवादः व्यवहारश्च शब्दौ भिन्नार्थौ व्यवह्रियेते। तेन मतेन विवादस्य विषयाः विवादशब्देन (Fitles of the suit) तथा च विचारपद्धतिः व्यवहारशब्देन (Judicial procedure) अवगम्यते ।

## ११.०५: व्यवहारस्य लक्षणम्

व्यवहारस्य संज्ञा अल्पसंख्यकैः स्मृतिकारैः उल्लिख्यते । तेषु कात्यायनः, याज्ञवल्क्यः तथा हारीतः अन्यतमाः । कात्यायनमुनीनां व्यवहारस्य लक्षणम् एवं निरूपितम् –

"प्रयत्नसाध्ये विच्छिन्ने धर्माख्ये न्यायविस्तरे ।
साध्यमूलस्त यो वादो व्यवहारः स उच्यते ।।"

अर्थात्, धर्मः एव प्रयत्नसाध्यः । सम्यग्भाषणम्, अहिंसाचरणम्, सत्यवचनम् इत्यादीनि धर्मस्य मूलकारणानि। यदि धर्मः लोभ- मोह- द्वेष इत्यादिभिः विनष्टं भूयते, तर्हि ऋणादानादिषु विषयेषु साध्यमूलकः यः विवादः, सः व्यवहारः उच्यते ।

कात्यायनमुनिना 'व्यवहार' पदस्य लक्षणस्योपरि व्युत्पत्तिमुलकः अर्थः अपि वर्णितोऽस्ति। वि- अव- उपसर्गपूर्वकं हार धातुना सह 'व्यवहार'शब्दः निष्पद्यते । वि- शब्दस्य बहवार्थे, अव- शब्दस्य सन्देहार्थे तथा हार- शब्दस्य हरणार्थे व्यवहारो भवति। अर्थात् यस्मिन् पद्धतिना नानाप्रकारकानां सन्देहः दूरं भवति स एव व्यवहार इति कथ्यते –

"विनानार्थेवसन्देहे हरणं हार उच्यते ।
नानासन्देहहरणाद् व्यवहार इति स्मृतः ॥"

यदि कोऽपि व्यक्तिः अन्येन सह न्यायविरुद्धाचरणं करोति तदा पीडिता व्यक्तिः यदि न्यायार्थं न्यायाधिकारीं प्रार्थयति, तर्हि तत् 'व्यवहार' पदवाच्यं भवति । एतत् व्यवहार पदं द्वयोः भागयोः विभक्तम् अस्ति । तत्र प्रथमः भागः व्यवहारः इत्युच्यते। अत्र स्वत्वाधिकारः निरूप्यते । द्वितीयः भागः विवादः इत्युच्यते। अत्र दण्डविधानस्य विधिः निरूपितम् अस्ति । एते सर्वे विषयाः याज्ञवल्क्यस्मृतेः व्यवहाराध्याये सन्निविष्टाः सन्ति ।

## ११.०६: व्यवहारस्य प्रयोजनम्

राज्ञां कृते 'व्यवहार'स्य विषये सम्यक् ज्ञानं अतीव प्रयोजनम्। प्रजापालनम् एव राजानां मूलकर्तव्यम् अस्ति। प्रजानां मध्ये दुष्ट जनाः सत् जनाः द्वेप्रकरकानां मनुष्याः सन्ति । साधुकर्मणां कृते प्रशंसा तथा दुष्कर्मनां कृते दण्डप्रदानं राजानं मुलकर्तव्यम् अस्ति। याज्ञवलक्यस्मृतिग्रन्थे द्वितीयाध्याये आचार्य याज्ञवलक्यः उक्तम् आसीत् यत् –

"व्यवहारान् नृपः पश्येद् विद्वद्भिः ब्राह्मणैः सह ।
धर्मशास्त्रानुसारेन क्रोधलोभविवर्जितः ॥" (या.स्मृ. २/१)

अर्थात्, राजा क्रोधलोभविवर्जितः धर्मशास्त्रानुसारेन विद्वद्भिः ब्राह्मणैः सह व्यवहारं कुर्यात् ।

आचार्य याज्ञवलक्यः विवादस्य न्यायपद्धतिः सम्बन्धे याज्ञवलक्यस्मृतिग्रन्थे द्वितीयाध्याये उक्तम् आसीत् यत्-

"स्मृत्याचारव्यपेतेन मार्गेणाऽधर्षितः परैः ।
आवेदयति चेद्राज्ञे व्यवहारपदं हि तत् ॥" (या.स्मृ. २/५)

अर्थात्, धर्मशास्त्रसमाचारविरुद्धेन मार्गेण परैः आधर्षितो अभिभूतः सन् यदि पीडितः व्यक्तिः राज्ञेः प्राडविवाके वा आवेदयति विज्ञापयति ,तत् व्यवहारपदं भवति ।

आचार्य नारदः व्यवहारस्य उत्पत्तिविषये उक्तम् आसीत् यत् – प्रजापतिः मनुः राजत्वकाले मानवाः धर्मपरायणाः, जितेन्द्रियः, सत्यवादी च आसीत्। परवर्तीसमये मनुष्याणां मध्ये धर्मभावः विनष्टं भवति, तदा दुष्टजनानां दण्डविधानस्य कृते राजा 'व्यवहार'स्य प्रारम्भम् अकरोत् –

"नष्टे धर्मे मनुष्याणां व्यवहारःप्रवर्तते ।
द्रष्ट्वा च व्यवहाराणां राजा दण्डधर स्मृतः ।।"

याज्ञवलक्यसंहितायाम् उपरि विज्ञानेश्वरकृता 'मिताक्षरा' टीकायाम् उल्लिखितम् अस्ति यत्, अन्येन उक्त्वा वचनस्य विरोधं कृत्वा यदि कोऽपि व्यक्तिः स्वस्य वचनं शुद्धम् इति उक्तम् अस्ति तदा येन विचारपद्धतीना तत् विरोधं निष्पन्नं भवति तत् 'व्यवहार' पदवाच्यं भवति। उदाहरणं यथा: द्वयोः लोकयोः मध्ये यदि भूमिनां कृते विवादं भवति अर्थात्, कोऽपि व्यक्तिः यदि वदति 'इदं मम क्षेत्रम् अस्ति' तदा येन उपायेन उभयो मध्ये विवादनिष्पत्तिः भवति तत् एव 'व्यवहार'म् इति कथयति -

' अन्य विरोधेन स्वात्मसम्बन्धितया कथनं व्यवहारः। यथा कश्चित् इदं क्षेत्रं मदीयमिति कथयति, अन्योऽपि तद् विरोधेन मदीयमिति ।'

आचार्य विज्ञानेश्वरः 'मिताक्षरा' टीकायाम् व्यवहारस्य सप्तप्रकारानि नामानि उल्लिखितानि सन्ति। तत् यथा- प्रतिज्ञा, हेतु, उत्तर, संशय, प्रमाण, निर्णय, प्रयोजनञ्च । अतएव 'व्यवहार'पदं सप्तात्मकम् इति रूपेण नामकरणं करोति। एतत् विषये उक्तम् अस्ति –

' प्रतिज्ञोत्तरसंशयहेतु परामर्शप्रमाणनिर्णयप्रयोजनात्मकः व्यवहारः तस्य पदं विषयः।'

## ११.७: व्यवहारस्य प्रकारभेदः

आचार्य याज्ञवलक्यः 'व्यवहार'पदस्य भिन्नप्रकाराः अर्थाः उल्लेखिताः सन्ति । " व्यवहारान् नृपः पश्येद् "- अस्मिन् वाक्ये उल्लेखितेन 'व्यवहारान्' शब्देन एतत् प्रमाणितं भवति ।

नारदस्मृतिग्रन्थस्य प्रथमाध्याये आचार्य नारदः उल्लेखयति यत् –

"अभियोगस्तु विज्ञेयः शंकातत्त्वाभियोगतः ।
शंकाऽसतां तु संसर्गात्तत्त्वं होढाऽभिदर्शनात् ।। (नारदस्मृति, १/२७)

अस्मिन् श्लोके द्वयोः अभियोगयोः वर्णनम् अस्ति। एकं शंकाभियोगः अन्यं च तत्त्वाभियोगः।

**शंकाभियोग :** दुष्टव्यक्तिना सह सम्बन्धस्थापने यत् शंकामुत्पद्यते तत् अभियोग एव शंकाभियोगः। अविद्यमानविषयस्य संसर्गेन एतत् अभियोग उत्पद्यते।

**तत्त्वाभियोग :** यदि कोऽपि स्तेयवस्तुः स्वामिना पश्चात् दृश्यते, तदा स्वामिनः य अभियोगम् स एव तत्त्वाभियोगः। साक्षात् दर्शनस्य कृते एतत् अभियोगस्य उत्पत्तिर्भवति। तत्त्वाभियोगः पुनः द्विविधाः – प्रतिषेधः विधिः च।

**प्रतिषेधः तत्त्वाभियोगः** = यदि कश्चन व्यक्तिः किमपि गृहीत्वा न प्रयच्छति, तर्हि राज्ञां समीपे स्वामी यत् अभियोगं करोति तत् एव प्रतिषेधः तत्त्वाभियोगः।

**विधि तत्त्वाभियोगः** = यदि कश्चन व्यक्तिः भूमिं सुवर्णं च इत्यादीनि वस्तुः हरणं करोति, तर्हि स्वामिना राज्ञां समीपे यत् अभियोगं करोति तत् एव विधिरूप तत्त्वाभियोगः। अस्मिन् अभियोगः नकारात्मक नास्ति।

मनुस्मृतिग्रन्थे आचार्य मनुः व्यवहारस्य अष्टादश प्रकारानि भेदानि उल्लेखयति। तनि यथा – ऋणादानम्, निक्षेपः, अस्वामिविक्रयः, सम्भूयसमुत्थानम्, दत्तानपकर्म, वेतनादानम्, संविद्व्यतिक्रम, क्रयविक्रयानुशयः, स्वामिपालविवादः, सीमाविवादः, वाक्पारुष्यम्, दण्डपारुष्यम्, स्तेयम्, साहसः, स्त्रीसंग्रहणम्, स्त्रीपुंधर्म, विभागः, द्युतआह्वय च। एतत् पुनरपि साध्यस्य भेदानुसारं भिन्नप्रकारानि भवन्ति। आचार्य नारदमते विवादस्थानः १०८ प्रकाराः। अतएव नारदः व्यवहारं 'शतशाख'मिति स्वीकरोति – "शतशाखस्तथैव च" – (नारदस्मृति, १/९)

## ११.८ चतुष्पादानां प्रयोगः

याज्ञवल्क्यस्मृतेः व्यवहाराध्यायस्य प्रारम्भे एव ऋषिः याज्ञवल्क्यः विचारप्रक्रियायाः विषये अलोचनां करोति । अस्याः प्रक्रियायाः प्रधानोऽस्ति राजा। राजा धर्मशास्त्रानुसारं क्रोधलोभौ वर्जयित्वा विद्वद्भिः ब्राह्मणैः सह विचारपद्धतिं पर्यवेक्षयेत् इति याज्ञवल्क्यमतम् –

"व्यवहारान् नृपः पश्येद् विद्वद्भिर्ब्राह्मणैः सह।
धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः।।" (या. स्मृ., २/१)

ततः राजा कं व्यक्तिं सभासदरूपेण नियोजयिष्यति, तस्मिन् विषये उक्तमस्ति यत्- यः वेद-वेदाङ्ग-व्याकरण-धर्मशास्त्रज्ञः, सत्यवादी, शत्रुमित्रे प्रति समभावयुक्तः अर्थात् रागद्वेषरहितः, सः एव सभासदरूपेण नियोजयेत्, यतो हि विचारकाले सः राजानं समुचितं परामर्शं दातुं समर्थो भवति -

"श्रुताध्ययनसम्पन्ना धर्मज्ञाः सत्यादिनः।
राज्ञा सभासदः कार्या रिपौ मित्रे च ये समाः।।"। (या. स्मृ., २/२)

राजा यदि अन्यस्मिन् कार्ये व्यापृतो भूत्वा विचारकार्यं समुचिततया परिचालयितुं न शक्नोति, तदा राज्ञः करणीयानां विषये याज्ञवल्क्यः उल्लेखयति यत् – तस्यामवस्थायां राजा सभासद्भिः सह आलोचयित्वा कमपि कोविदं प्रतिनिधि-विचारकरूपेण नियोजयेत्-

"अपश्यता कार्यवशाद् व्यवहारान् नृपेण तु।
सभ्यैः सह नियोक्तव्य ब्राह्मणः सर्वधर्मवित्।।" (या. स्मृ., २/३)

राज्ञः प्रतिनिधि-कोविदं 'प्राडविवाक' इति नाम्नाऽपि ज्ञायते, यतो हि सः अन्यसभ्यैः सह विवादपूर्णेषु विषयेषु अर्थिप्रत्यर्थिनौ प्रश्नं पृष्ट्वा विचारं करोति। प्रश्नकर्म 'प्राट' इति नाम्ना तथा तस्मिन्नुपरि विवेचनाकर्म 'विवाक' इति नाम्ना ज्ञायते - "विवादनुगतं पृष्ट्वा समभ्यस्तत्प्रयत्नतः। विचारयति येनासौ प्राडविवाकस्ततः स्मृतः॥"

नारदस्मृतौ अपि नारदः उल्लिखति यत् राज्ञा सर्वदा प्राडविवाकानुसारं कार्यं कुर्वीत –

"धर्मशास्त्रं पुरस्कृत्य प्राडविवाकमते स्थितः।
समाहितमतिः पश्येद् व्यवहारान् अनुक्रमात्॥"

आचार्यः विज्ञानेश्वरः वदति यत् – राजा यथा शत्रूणां स्थितिं ज्ञातुं गुप्तचरं नियोजयति, अर्थात् गुप्तचरमतानुसारमेव परिवर्तिनि विचारे अग्रचरो भवति, तथैव सः प्राडविवाकमतानुसारमेव विचारकार्ये प्रवृत्तो भवेत् – "प्राडविवाकमते स्थितो न स्वमते स्थितः राजा चारचक्षुषा परसैन्यं पश्यतीतिवत्।"

पुनः आचार्यः याज्ञवल्क्यः उल्लिखति यत् – प्राडविवाकस्तथा अन्यान्यैः सभ्यैः यदि धर्मशास्त्रस्य विरुद्धमाचर्यते, तदा तद्हेतुः दण्डस्य विधानमपि अस्ति। याज्ञवल्क्यमतेन प्राडविवाकादिभिः सभ्यैः राग-लोभ-भयवशात् यदि स्मृतिविरुद्धा व्यवस्था प्रदत्ता, तदा प्रकृतापराधिनिर्णीतदण्डात् द्विगुणदण्डैः दण्डिताः भवन्ति –

"रागाल्लोभाद् भयाद् वापि स्मृत्यपेतादिकारिणः।
सभ्याः पृथक् पृथक् दण्ड्या विवादात् द्विगुणं दमम्॥"। (या. स्मृ., २/४)

अस्यां विचारपद्धतौ व्यवहारे वा अंगचतुष्टयं परिलक्ष्यते। तानि 'चतुष्पादः' इति नाम्नाऽपि ज्ञायन्ते। नामानि यथा – भाषापादः, उत्तरपादः, क्रियापादः, साध्यसिद्धिपादश्च। एतेषां विषये अत्र आलोचयिष्यन्ति –

**भाषापादः**= चतुष्पादेषु प्रथमः भाषापादः। अत्र प्रत्यर्थिनः सामुख्यमेव तदावेदनं लिपिवद्धं करोति। याज्ञवल्क्येनोच्याते – 'प्रत्यर्थिनोऽग्रतो लेख्यं' इति भाषापादः प्रथमः।

व्यवहारस्य प्रसङ्गे याज्ञवल्क्यः उल्लेखयति यत् यदि कोऽपि व्यक्तिः लोकाचारविरुद्धपथि अग्रे चरति, तर्हि आक्रान्तजनः राज्ञः साम्मुख्ये प्रतिवेदनं करोति, सः व्यवहारपदवाच्यं भवति-

"स्मृत्याचारव्यपेतेन मार्गेणाऽधर्षितः परैः।
आवेदयति चेद्राज्ञे व्यवहारपदं हि तत्॥"। (या. स्मृ., २/५)

आक्रान्तः जनः स्वयमेव आगम्य राजानम् आवेदनं कुर्यात्, न तु अन्यजनमाध्यमेन। यः आवेदयति सः अर्थीः (plaintiff)। युक्तियुक्ततां विवेच्य मुद्रादिना (राजपत्रविशेषेण) प्रत्यर्थिनं राजपक्षतः आदेशः दीयते (न्यायार्थम्)। यदि प्रत्यर्थी रोगादिवशतः अथवा अन्यविशेषकारणवशतः आगन्तुं न शक्नोति, तर्हि कतिपयादिवसानां समयं प्राप्नोति। तत्पश्चात् प्रत्यर्थिनमानीय तस्य पुरतः अर्थिनः अभियोगाः लिपिवद्धाः भवन्ति। अर्थिनः अभियोगाः यथायथं लिपिवद्धं करोति। यदि कोऽपि व्यतिक्रमं कर्तुं प्रचेष्टति, तदा व्यवहारभङ्गं स्वीकृत्य विचारो न भवति। आवेदनेऽस्मिन् समय-वर्ष-मास-पक्ष-दिवस अर्थीप्रत्यर्थिनौ नाम-जाति-निवासादिनां सुस्पष्टोल्लेखः आवश्यकः। यथा याज्ञवल्क्यस्मृतौ –

"प्रत्यर्थिनोऽग्रतो लेख्यं यथावेदितमर्थिना।

समामासतदर्धाहर्नामजात्यादिचिह्नितम्॥"। (या. स्मृ., २/६)

**उत्तरपादः**= 'श्रुतार्थस्योत्तरं लेख्यम्' इति उत्तरपादो द्वितीयः अर्थात् चतुष्पादेषु द्वितीयः पादः उत्तरपादः। अत्र अर्थिनः वक्तव्यं श्रुत्वा प्रत्यर्थी प्रत्युत्तरं लिखति। पुनरपि याज्ञवल्क्यस्मृतौ – ' श्रुतार्थस्योत्तरं लेख्यं पूर्वावेदकसंनिधौ'।

अर्थिनः प्रश्नानाम् उत्तराणि प्रत्यर्थिना तस्य साम्मुख्ये एव लिखितव्यानि। अभियोगखण्डनकाले प्रत्यार्थिनः उत्तरं सारगर्भं, सुस्पष्टं (अभियोगः दूरीकरणाय), सन्देहरहित च भवेत्। उत्तराणि सरलभाषायां भवेयुः। उत्तरस्य लक्षणप्रसंगे उच्यते यथा –

" पक्षस्य व्यापकं सार असंदिग्धं अनाकुलम्।
अव्याख्यागम्यमित्युरं तद्विदो विदुः॥"

कात्यायनमतेन चतुर्विधानि उत्तराणि यथा – सत्प्रतिपत्तिः, मिथ्या, प्रत्यवस्कनः, पूर्वन्यायः च ।

क) **सत्प्रतिपत्तिः** = सत्प्रतिपत्तिः अर्थात् सत्यम् उत्तरम्। यदा अर्थिनः अभियोगः प्रत्यर्थिना सत्यरूपेण स्वीकृतः तदा सः एव सत्प्रतिपत्तिरूपेण गण्यते। उदाहरणरूपेण यदि अर्थी अभियोगं करोति यत् एषः मदेकशतम् ऋणं गृहीतवान् तथा च प्रत्यर्थी यदि स्वीकारं करोति यत् अहं तस्मात् एकशतं रूप्यकाणि ऋणं गृह्णामि, तर्ही तदुत्तरमेव सत्प्रतिपत्तिः सत्यमुत्तरं वा।

ख) **मिथ्या** = यदि अर्थिनः अभियोगः असत्यमिति प्रत्यर्थी दृढरूपेण वदति, तर्हि सा मिथ्या उत्तरं भवति । उदाहरणरूपेण अर्थी अभियोजयति यत् सः मत् पक्षे एकशतरूप्यकानि ऋणं एव गृहीतवान्, परन्तु प्रत्यर्थी तदभियोगं खण्डयति, तदेव मिथ्य- उत्तरम्। अत्र प्रत्यर्थिनः उत्तरं सत्यम् असत्यं वा, विचारं विना ज्ञातुं न शक्यते, अतः 'मिथ्या'-शब्दं परिभाषिकमात्रम्।

कात्यायनमतेण, आर्थिनः अभियोगः यदि प्रत्यर्थी अस्वीकरोति, तर्हि व्यवहारेन विचारेन वा तदुत्तरं 'मिथ्या' इति स्वीकुर्यात्। मिथ्यायाः प्रकारचतुष्टयम् –

१) एषा मिथ्या।
२) अहं न जानामि।
३) तस्मिन् समये (व्यापारकाले) अहं तत्र नासम्।
४) तस्मिन् समये मम जन्म एव नाभवत्।

ग) **प्रत्यवस्कन्दनः** = अर्थिनः अभियोगस्य प्रत्युत्तररूपेण यदा प्रत्यर्थी कारणं वर्णयति, तदा तमेव प्रत्यवस्कन्दनोच्यते। उदाहरणरूपेण, अर्थी अभियोजयति यत् 'एषः मदेकशतरूप्यकानि ऋणरूपेण गृहीतवान्' , परन्तु प्रत्यर्थी एवं प्रत्युत्तरं ददाति यत्, 'अहं ऋणं गृह्णामि परन्तु तद्धनमहं प्रतिगृह्णामि'

अथवा प्रत्यर्थी यदि वदति यत् 'तद्धनं मां दानरूपेण ददाति' तर्हि प्रत्यवस्कन्दनमुत्तरं भवति यतो हि प्रत्यर्थी ऋणं तु स्वीकरोति, तदुपरि धनप्रत्यावर्तनस्य वर्णनमपि करोति।

घ) **पूर्वन्यायः** = यदा कस्मिन्नपि न्याये अर्थी पराजितो भवति, तथापि पुनर्विचाराय विचारस्य पुनरुत्थापनं करोति तदा प्रत्यर्थिनः उत्तरमेव पूर्वन्यायशब्देन ज्ञायते। अत्र प्रत्यर्थी अभियोगं स्थापयति। अर्थिनः 'एषः मदेकशतरूप्यकानि ऋणं गृहीतवान्', इति वक्तव्यस्य प्रत्युत्तरं प्रत्यर्थी एवं ददति यत् 'अभियुक्तोSहं, परन्तु अस्मिन् विवादे पूर्वन्याये अर्थिनः पराजयं पूर्वमेवाभवत्'।

**क्रियापादः** = चतुष्पादेषु तृतीयः क्रियापादः। एतदुपरि याज्ञवल्क्येन उच्यते यथा – 'अर्थी लेखयेत् सद्यः' इति क्रियापादस्तृतीयः। प्रत्यर्थी यदा अर्थिसाम्मुख्ये स्वोत्तरं लिखति, तदा अर्थिना सपक्षे प्रमाणानि दातव्यानि, यतो हि प्रमाणैः एव विवादसिद्धिर्भूयते। प्रत्यर्थिना अपि उत्तरलिखनकाले प्रमाणानि प्रस्तुतव्यानि। याज्ञवल्क्येनोच्यते- 'ततोSर्थी लेखयेत् सद्यः प्रतिज्ञातार्थसाधनम्'। प्रत्यर्थी यदि अभियोगं स्वीकरोति, तदा प्रमाणप्रदर्शनस्य प्रयोजनं नास्ति। मिथ्या उत्तरस्य कृते प्रत्यर्थिना प्रमाणं प्रदर्शितव्यम्। यतो हि भाषापादस्य तथा उत्तरपादस्य पश्चादेव व्यवहारः समाप्तो भवति।

पितृमात्रो: मृत्योरनन्तरं पुत्राः पितुः धनम् ऋणं च समानरूपेण विभजन्ति। तस्य कन्याः मातृऋणं परिशोधयित्वा मातुः सम्पत्तिं (पत्न्या: धनम्) भागं करिष्यन्ति। नास्ति कन्याः चेत् पुत्रादयः, वंशजाः एतत् धनं प्राप्नुयुः।

मूलपाठः —

पितृद्रव्याविरोधेन यदन्यतः स्वयमार्जितम्।
मैत्रमौद्रवहिकं चैव दायादानां न तद् भवेत् ॥५॥
क्रमादभ्यागतं द्रव्यं हृतमप्युद्धरेत्तु यः।
दायादेभ्यो न तद् दद्यात विद्यय लब्धमेव च ॥६॥

संस्कृतानुवादः —

किं किं सम्पत्तिः भागं न भविष्यन्ति इति अत्र उक्तमस्ति। मातृपितृधनव्ययम् विना पुत्रः यत् सम्पत्तिं स्वयम् अर्जयति, मित्रात् प्रेमदानरूपेण यत् धनं प्राप्नोति, विवाहसमये यत् धनं प्राप्नोति तत् भ्रातृषु न विभजयेत्।

अपरं तु यदि वंशानुगतं सम्पत्तिम् अन्येन अपहृतं भवति, पिता च समर्थाभावात् तत् पुनः प्राप्तुं असमर्थः भवति चेत् यदि पुत्रेषु कश्चन् सर्वानुमत्या धनं पुनः आकर्षयति तर्हि उत्तराधिकारिणां मध्ये तत् धनं विभक्तुं न शक्यते। अपि च शिक्षामाध्यमेन अर्जितं धनं न विभज्यते।

मूलपाठ:

सामान्यार्थ समुत्थाने विभागस्तु समः स्मृतः।
अनेकपितृकानां तु पितृतो भागं कल्पना ॥ ७॥

संस्कृतानुवादः —

अविभक्तभ्रातर: कृषिव्यापारियो: माध्यमेन संयुक्तरूपेण प्राप्तं धनं सामान्यरूपेण समांश: भागं करिष्यन्ति। (एवं कथं पितुः धनं पुत्रेषु विभज्यते इति चर्चा कृतास्ति)। इदानीं पितामहस्य धनं पौत्रेषु मध्ये कथं विभज्यते एतत् विषयेऽपि उल्लिखितास्ति।) तथापि पितामहस्य धनस्य विभागः पौत्राणां अधिकारानुसार परिकल्पितः। अर्थात् पितामहस्य धनं पितृमाध्यमेन विभक्तं भविष्यति, म तु स्वकीयमाध्यमेन।

मूलपाठः

भूर्या पितामहोपात्ता निबन्धो द्रव्यमेव वा।

तत्र स्थात् सदृशं स्वाम्यं पितुः पुत्रस्य चैव हि॥

संस्कृतानुवादः —

यदा पिता स्वर्जिताधनं स्वजीवने (यथा पूर्वोक्तम्) इच्छानुयायी विभजितुं शक्नोति तथा पिता पितामहस्य धनं सर्वपुत्रेषु स्वेच्छया विभागं कर्तुं न शक्नोति। पितामहेन प्राप्तं भुमिषु, लेखेषु अर्थात् पनस-ताम्बुलेषु सुवर्णे च पितुः पुत्रस्य च समानभागः इति मान्यता प्राप्नोति।

मूलपाठः

पितृभ्यां यस्य यद्दत्तं तत तस्यैव धनं भवेत्।

पितुरुद्धं विभजतां माताप्यंशं समं हरेत्॥3॥

संस्कृतानुवाद: —

माता पितृभिः पुत्राय यत् धनं पूर्वमेव दत्तं तत् तस्यैव स्यात्। पितो: मृत्यसमयात् अनन्तरं यदा पुत्राः सम्पत्तिं विभजति तदा मातुः समानभागं भविष्यति।

मूलपाठः

असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः।

भगिन्यश्च निजाद् अंशाद् दत्तांशं तु तुरीयकम्॥

संस्कृतानुवादः —

पितुः मृत्योः अनन्तरं यदि भ्राता असंस्कृत एव तिष्ठति तर्हि अन्ये संस्कृतभ्रातराः उपनयनादि-संस्कारेणसंस्कृतकर्माणि कर्तुं सम्पूर्णं धनं व्यवस्यन्ति। एतदुपरि भगिनीनां विवाहेषु च चतुर्थांशेन धनेन करिष्यन्ति।

**पुत्रस्य विभागः —**

मूलपाठः

औरसो धर्मपत्नीजस्तंसमः पुत्रिकासुतः।

क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा॥११॥

गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः।

कानीनः कन्याकाजातो मातामहसुतो मतः॥१२॥

अक्षतायां क्षतायां वा जातः पौनर्भवः सूतः।

दद्यान् माता पिता वा यं स पुत्रो दत्तको भवेत् ॥१३॥
त्रीतश्च ताभ्यां विकृतः कृत्रिमः स्यात् स्वयं कृतः।
दत्तात्मा तु स्वयं तु स्वयंदत्तो गर्ने भिन्नः सहोढजः ॥१४॥
उत्सृष्टो गृह्यते यस्तु सोपबिद्धो भवेत् सुतः।
पिण्डदोहशहरश्चैषां पूर्वाभावे परः परः ॥१५॥

संस्कृतानुवादः – समानजातीयपत्न्यानां (ब्राह्मणानां समानजातीयपत्न्यानां) उत्पन्नः पुत्रः असमानजातीयपत्न्यानां च (विभिन्नवर्णपत्न्यानां) पुत्रजातानां (एते सर्वे 'औरस'पुत्राः) एतेषु पितुः धनविभागः उल्लिखितः। इदानीं मुख्यपुत्रस्य गौणपुत्रस्य च कथं पितुः धनं विभक्तं भविष्यति इति अवलोकनं दत्वा आचार्ययाज्ञावल्क्यः पुत्रस्वरूपप्रकारयोः उल्लेखं करोति। अत्र द्वादशप्रकारस्य पुत्रस्य स्वरूपं वर्णयति।

भार्याः गर्भजातः पुत्रः 'औरसपुत्रः' मुख्यपुत्रः इति स्मृतः । औरसपुत्रवत् अन्य पुत्रप्रकार अस्ति, तत्तु 'पुत्रिकापुत्रः' (२)। अस्याः कन्यायाः गर्भे जातः पुत्रः अस्माकं श्रद्धाधिकारी भविष्यति इति यदि अपुत्राय कन्यादानसमये चुक्तिः क्रियते। तस्मिन् सति कन्यायाः पुत्रः 'पुत्रिकापुत्रः' इति उच्यते। पुत्राभावे वा कन्या एव पुत्रः इति मतम् । अतः पुत्रसदृशाकन्याऽपि पुत्रिकापुत्रः इति उच्यते। (पुत्रिकैव सुतः सोऽपि औरससम एव) उच्यते। अपुत्रस्य श्वशुरेण वा अन्येन वा सवर्णापत्न्याः अनपुत्रानुमत्या जातः पुत्रः 'क्षेत्रजपुत्रः' (३)। पतिगृहे जातिपुरुषेण गुप्तरूपेण जातः पुत्रः 'गुढजपुत्रः' (४)। पितृगृहे बालिकावस्थायां गुप्तरूपेण जातिजनेन जातः पुत्रः 'कानीनपुत्रः' (५) इति उच्यते। अयं पुत्रः पितामहस्य पुत्रः स्मृतः। यदि स्त्री भर्तारं परित्यज्य मृता वा परपुरुषभार्यायां अङ्गीकुर्वति तर्हि सा 'पुनर्भूस्त्री' इति उच्यते। अस्याः पुनर्भूस्त्रीः गर्भे जातः पुत्रः 'पौनर्भव' (६)। यदि माता भर्तुः अभावे वा मृत्योः अनन्तरं वा तस्य अनुमत्या जातापुरुषाय पुत्रं ददाति, अथवा मातृपितृद्वयं संयुक्तरूपेण जातापुरुषाय पुत्रं ददाति तर्हि पुत्रः 'दत्तकपुत्रः' (७) इति उच्यते। दत्रिमपुत्रः इति अपि कथ्यते। मातुः पितुः च मिलित्वा अथवा पितुः जातिं प्रति पुत्रः विक्रियते तर्हि 'त्रीतपुत्रः' (८) इति कथ्यतेकेवलं पुत्राणां ज्येष्ठपुत्राणां च विक्रयनं निषिद्धम्। पुत्रविक्रयणं च निषिद्धं यावत् तेषां धनं भूमि आदिकं दर्शयित्वा स्वपुत्रं स्वीकुर्वति, तादृशः पुत्रः 'कृत्रिमपुत्रः' (९) इति उच्यते। अनाथः मातापितृभिः परित्यक्तः वा पुत्रः अन्यस्य पुत्रत्वं स्वीकुर्वन्ति चेत् स उच्यते 'दत्तात्मापुत्रः' (१०) इति उच्यते ।

यदि कोऽपि पुरुषः स्त्रीगर्भिणीं ज्ञात्वा अज्ञात्वा वा विवाहं करोति तर्हि विवाहानन्तरं जातः पुत्रः सहोढजपुत्रः इति उच्यते (११) । तद् पुत्रः विवाहितजनस्य पुत्ररूपेण गण्यते । मातृपितृभ्यो परित्यक्तपुत्रः अन्यजातीयेन दत्तक: पुत्रः अपविद्धपुत्रः (२२) इति कथ्यते । सः पुत्रः ग्रहीतस्य पुत्ररूपेणापि स्वीक्रियते ।

एतेषां द्वादशप्रकारेषु पुत्रेषु पूर्वस्याभावे उत्तरपितृधनं प्राप्नुयात् । तथा पितुः पिण्डदानस्य च अधिकारी भविष्यति ।

**मुख्यपाठः —**

पत्नी दुहितरचैव पितरौ भ्रातरस्तथा ।

तत्सुता गोत्रजा बैन्धुशिष्यसब्रह्मचारिणः ॥ (१६)

एषामभावे गोत्रजा पूर्वस्थ घनभागुत्तरोत्तरः ।

स्वर्यातस्य यपुत्रस्य सर्ववर्णेषु अयं विधिः ॥(२३)

संस्कृतानुवादः —

पुत्रस्य अभावे केनप्रकारेण दायभागः भविष्यति तत् विषये विधानं अत्र उपलभ्यते । यदि पुत्रहीनः मृतः तर्हि तस्य सम्पत्तिः क्रमशः तस्य पत्नी, तस्याभावे कन्या, तस्याभावे म पितरौ, तदाभावे भ्रातृगणः, तदभावे भ्रातृपुत्रगणः, तदभावे मित्रैः, तदभावे शिष्यैः, तदाभावे सहाध्यायी (सब्रह्मचारी) इत्यस्य अर्थः अस्ति यः एकस्मिन् गुरुवे एकत्र अध्ययनं कृतवान् । एतेषु उत्तर पूर्वस्याभावे धनं प्राप्नोति । एषः नियमः सर्वेषु वर्णेषु प्रवर्तते ।

**संसृष्टि-**

मुख्य पाठः —

संसृष्टिनस्तु संसृष्टि सोदरस्य तु सोदरः |

दद्यादपहरेच्चांशं भागं जातस्य च मृतस्य च ॥ १८ ॥

संस्कृतानुवाद: —

धनविभागानन्तरं यदि कश्चित् स्वधनं पित्रा भ्रात्रा वा पितृमातुलेन सह मिश्रयित्वा अविभक्तं प्रयोजयति तर्हि तत् संसृष्टी धनं कथ्यते । अस्य संसृष्टस्य मिश्रितस्य वा धनस्य अधिकारी संसृष्टी उच्यते ।

संसृष्टसम्पत्तिधारकस्य मृत्योः सति अन्यससृष्टीः सम्पत्तिभागं (तस्य पुत्राय दास्यति। यदि विभागसमये पुत्रः नास्ति) विभागानन्तरजाताय पुत्राय दास्यति। (एतादृशस्य पुत्रस्याभावे स्वयं धनं प्राप्नुयात्) । भ्रातुः उत्तराधिकारं कनिष्ठपुत्राय दास्यति। एतत् धनं भिन्न-उदर-व्यक्तिभ्यः संसृष्टित्वेऽपि न दास्यति ।

दायभागस्य अयोग्यः व्यक्तिः :

मुख्य पाठः

क्लीबोऽथ पतितस्तञ्जः पङ्गुरुन्मत्तको जडः ।

अन्धोऽचिकित्स्यरोगाद्या मँर्तव्याः स्युर्निरंशकाः ॥१९॥

औरसाः क्षेत्रजास्त्वेषां निर्दोषा भागहारिणः ।

सुताथैषां प्रभर्तव्या यावद्वै भर्तृसात्कृताः ॥ २०॥

अपुत्रा योपितश्चैषां भर्तव्याः साधुवृत्तयः ।

निर्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव च ॥२१ ॥

संस्कृतानुवादः —

नपुंसकः ब्रह्महत्यापापी तस्य पापस्य पुत्रः अपाङ्गः उन्मत्तः जडः अन्धः व्याधिः- एते जनाः सम्पत्तिभागं न प्राप्नुयुः, किन्तु तेषां पालनं कर्तव्यम् संबंधीजनाः। तेषां वंशजाः पुत्राश्च यदि निर्दोषाः स्युः सम्पत्तिभागं प्राप्नुयुः । तेषां कन्यानां अपि विवाहपर्यन्तं पोषणं करणीयम् । तेषां पुत्रहीनपत्न्यःयो सत्चरित्रवती,तेषां पोषणं करणीयम् । किन्तु यदि ते (पत्न्यः) व्यभिचारिणः दुष्टाः च सन्ति तर्हि ते निर्वासिताः भविष्यन्ति।

**स्त्रीधन विभागः —**

मुख्य पाठः —

पितृमातृपतिभ्रातृदत्तमध्यभ्युपागतम् ।
आधिवेदैनिकाद्यं च स्त्रीधनं परिकीर्तितम् ॥ २२॥
बन्धुदत्तं तथा शुल्कमन्वाधेयकमेव च ।
अंतीतायामप्रजसि बान्धवास्तदवाप्नुयुः॥२३॥

संस्कृतानुवादः —

'स्त्रियाः धनम्' स्त्रीधनम् अस्याः व्युत्पत्त्यानुसारं 'स्त्रीधन' इति नारीसम्बद्धं धनं निर्दिश्यते । स्मृतिशास्त्रानुसारं स्त्रियाः स्वकीयं धनं भवति । याज्ञवल्क्यस्मृत्यनुसारं स्त्रीधनं नवविधम् अस्ति । ते यथा यत् धनं स्त्रीयः पितृमातृभर्तृभ्रातृभ्यां स्नेहात् (पितृमातृभर्तृभ्रातृभ्यां दत्तं) (१) प्राप्नुवन्ति । विवाहसमये गार्हपत्याग्निसाक्षिणः मातुलादिभिः वधूबान्धवैः दत्तं धनं (अध्दुयग्नपागत्) (२) । द्वितीयविवाहकाले पूर्वपत्न्याः तृप्त्यर्थं भर्त्रा दत्तं धनं (आधिवेदनिक) (३) । मातापितृबन्धुभिः पुत्रीं दत्तं धनं (बन्धुदत्तम्) (४) । विवाहस्य पूर्वसंध्यायां वरेण वधूं शुल्करूपेण दत्तं धनराशिः (५) । (नवविवाहिता कन्या यत् धनं पितुः गृहात् यात्रायां प्राप्नोति (अद्धावहनिक)(६) विवाहानन्तरं पतिकुटुम्बे प्राप्तं धनं (अन्वाधेयक)७।(यत् धनंश्वश्रूः श्वश्रूः वा प्रेम्णा वधूं ददाति।( पादकन्दनिकः) ।(८) । विवाहिता वा अविवाहिता वा कन्या भ्रातुः पितुः गृहात् भर्तुः पितुः वा गृहे यत् धनं प्राप्नोति ( सौदायिका) (९) । यदि स्त्रियाः न सन्तानाः, न कन्याः, स्नुषः, पौत्राः वा न सन्ति, तर्हि तस्याः पतिः अन्ये बन्धुजनाः अस्याः भार्यायाः धनं प्राप्नुयुः।

मुख्य पाठः —

अप्रजस्त्रीधनं भर्तुर्ब्राह्मादिषु चतुर्षु अपि।
दुहितृणां प्रसूता चेच्छेषेषु पितृगामि तत् ॥२४ ॥

संस्कृतानुवादः —

स्मृतिविज्ञातविवाहाष्टप्रकारेषु ब्रह्मदैवार्यप्रजापतीनाम् एतेषु चतुर्विधविवाहिता निःसन्ततिः स्वपत्न्याः धनं भर्तुः समीपस्थं वा मृत्योः अनन्तरं लभते । अपरं तु चतुर्विधविवाहेन विवाहिता स्त्री – आसुरः, गन्धर्वः, बक्षसः, पैशाचः च – एतां भार्यां (मृत्युपश्चात्) मातुः पितुः च प्राप्स्यति। मातापितृणां अभावे निकटबन्धुजनाः तत् प्राप्नुयुः। स्त्रीयाः कन्या निःसन्ततिः अस्ति तथापि सर्वेषु विवाहेषु भार्यायाः धनं कन्यायां दास्यति ।

मुख्य पाठः —

विभागनिह्नवे ज्ञातिबन्धुसाक्ष्यभिलेखितैः ।

विभागभावना ज्ञेया गृहक्षेत्रैश्च यौतकैः ॥ २५॥

संस्कृतानुवादः —

धनविभागस्य विषये यदि किमपि 'निनार' अस्ति तर्हि तस्य निर्णयः बन्धुजनैः, ज्ञातिभिः, साक्षिभिः, लिखितदस्तावेजैः च भविष्यति। एवं सति 'यौतई' अर्थात् पृथग्गृहाणि, क्षेत्राणि, पृथक् कृषिकार्याणि पृथक् पृथक् पञ्चमहायज्ञानि च प्रयोक्तव्यानि ।

## १३.४ दायविभाजनम् : संक्षिप्तचर्चा

'दाय' इति सामान्यार्थे कर्तव्य इत्यर्थः । तथापि स्मृतिषु पदं पदार्थे प्रयुक्तम् । 'दायित्व' इति स्वामिनः सम्बन्धे अन्यस्य व्यक्तिस्य सम्पत्तिः । आचार्यनारदस्य मते दायशब्दस्य पितृधनम् इत्यर्थः, तत् धनं यदा पुत्रेषु विभक्तं भवति तदा दायभागः इति उच्यते । संक्षेपेण दायभागं तदा भवति यदा पूर्वस्वामिनः मृत्योः अनन्तरं तत्सम्बद्धे अन्यस्मिन् व्यक्तिषु धनस्य स्वामित्वं उत्पद्यते ।

एतत् दायं द्विविधं भवति- अप्रतिबन्धितं प्रतिबन्धितं च । पुत्रपौत्राः पुत्रत्वेन पौत्रत्वेन च पितुः धनं पितामहस्य च धनं प्राप्नुवन्ति । यतो हि अस्य दायस्य प्राप्तौ प्रतिबन्धः नास्ति, अतः एतत् दायम् अप्रतिबन्धितदायित्वम् इति उच्यते । तथापि पितृमातुलस्य (मातुलः, भ्राता इत्यादयः) भ्रातृणां च पुत्राः न सन्ति चेत् तेषां मृत्योः अनन्तरं भ्रातृभ्रातृणां आयः प्रतिबन्धितदायित्वं भवति। एषः द्वितीयः प्रकारः दायत्वं प्रत्यक्षतया उत्तरदायी नास्ति ।

आचार्य याज्ञवल्क्य: दायभागप्रकरणे दायस्य स्वरूपम्, तथा तस्य विभागसम्पर्के च विस्तृतविमर्शं करोति । यदि पिता स्वसम्पत्तिं विभजतुमिच्छति तथा कुर्याद् यथेष्टम् । ज्येष्ठपुत्राय श्रेष्ठं भागं दद्यात् सर्वेभ्यः समभागं वा । यदि पुत्राणां समभागः दीयते तर्हि भार्यायाः अपि तुल्यभागः दातव्यः यदि तस्याः भार्यायाः सम्पत्तिः नास्ति । यदि भार्यायाः सम्पत्तिः पूर्वमेव प्राप्ता अस्ति तर्हि पुत्रभागार्धं प्राप्नुयात् । यदि ज्येष्ठः पुत्रः अर्जयति, सः पितुः धनं दातुं संकोचम् अनुभवति तर्हि पिता तस्मै धनस्य अल्पभागं दत्त्वा तं पृथक् करिष्यति । पितृधनविभागः पुत्रेषु शास्त्रं धर्मं च भवेत्। धनविभागात् पूर्वं पिता म्रियते चेत् पुत्राः पितुः धनं पितुः ऋणं च समानरूपेण विभजन्ति। मातुः मृत्योः अनन्तरं तस्याः कन्याः भार्यायाः सम्पत्तिं समानरूपेण विभज्यन्ते, परन्तु ततः पूर्वं मातृऋणं परिशोधितव्यम् । कन्यायाः अभावे भार्यायाः ऋणस्य शेषं वंशजानां पुत्रपौत्राणां वहनं भवति। पुत्राणां स्वउपार्जित धनस्य उपरी भ्रातृणां अधिकारिण: स्यात्। संयुक्तकृषिव्यापारस्य लाभः सर्वेषां समानरूपेण भागः भविष्यति। पितामहेन प्राप्ते भूमिसुवर्णे पितुः पुत्रस्य च समानाधिकारः स्यात् । पुत्रेषु धनविभागानन्तरं जातिपत्नीजनाः पुत्राः अपि धनभागं प्राप्नुयुः । विभागात् पूर्वं यत् किमपि मातापितृभिः प्रेम्णा दत्तं तत् तस्य एव भविष्यति। यद्यपि

विभागानन्तरं जातः पुत्रः मातापित्रो: सर्वं धनं उत्तराधिकारं प्राप्नोति तथापि अन्येभ्यः पुत्रकन्याभ्यः पूर्वं दत्तं धनं न प्राप्स्यति । यदि पितुः मृत्योः अनन्तरं धनं विभज्यते तर्हि उपनयनादिसंशोधनं विना भ्रातरः भ्रातृसंशोधनस्य व्यवस्थां करिष्यन्ति, अविवाहिताभगिन्याः विवाहः च। सवर्णजा द्वादशप्रकारः पूर्वस्याभावे क्रमेण धनं प्राप्स्यति। अपुत्रस्य मृत्योः अनन्तरं तस्य सम्पत्तिः प्रथमं भार्यायाः कृते गमिष्यति । भार्याभावे कन्याः, कन्याभावे मातापितरौ, तेषां अभावे भ्रातरः, मित्राणि (स्वस्य, पिता, मातुः बन्धुजनाः), तेषां अभावे सत्शिष्याः, तस्य अभावे सहपाठिनः च एतत् धनं प्राप्नुयुः। एषः नियमः सर्वेषु वर्णेषु प्रवर्तते । यदि मातुलपुत्राः मिलित्वा धनस्य विभागानन्तरं धनस्य उपयोगं कुर्वन्ति तर्हि तत् संसृष्टधनम् इति उच्यते । यदि संसृष्टि: म्रियते तर्हि तस्य भागः अन्येन संसृष्ट्या पुत्राय दीयते। पुत्राभावे अन्ये सहकारिणः धनं प्राप्नुयुः । नपुंसकः, ब्रह्महन्तापुत्रः, अपाङ्गः, उन्मत्तः, जडः, अन्धः, असाध्यः, आश्रम-परित्यक्तः, पितृद्वेषी – एते गर्भस्य पुत्राः, किन्तु ते पितृधनस्य भागं न प्राप्नुयुः। तथापि अन्ये भ्रातरः तेषां परिपालनस्य उत्तरदायित्वं गृह्णन्ति । विवाहात् पूर्वं कन्यानां भरणपोषणस्य उत्तरदायित्वं अपि तेषां ग्रहीतव्यम् अस्ति । तेषां भार्या अपि अव्यभिचारिणः उत्तरदायित्वं गृह्णीयुः। याज्ञवल्क्यः अपि स्त्रीधनस्य चर्चां करोति। स्त्रीणां स्वधनं 'स्त्रीधन'। ते एतत् धनं कुलम् नवधा प्राप्नुवन्ति। अस्याः भार्यायाः धनं प्रायः तस्य मृत्योः अनन्तरं तस्य कन्याः पौत्राः च प्राप्नुवन्ति । अप्रजायाः दहेजं भर्त्रा वा बन्धुना वा मृत्योः परं लभते । केषुचित् सन्दर्भेषु स्त्रिय: मातापितरौ, निकटबन्धुः, प्रसवकन्यायाः च अपि तत् प्राप्नुवन्ति । यदि कश्चित् धनविभागं प्रति आक्षेपं करोति वा यदि कश्चित् एतत् विभागं अस्वीकारः कुर्वति तर्हि बन्धुसाक्षिणां लिखितवाक्येन विभागसंशयः निवर्तते। कृषिः आदिक्रियाणां पृथक्प्रवर्तनेन अपि विभागनिर्णयः सम्भवति । कन्यायाः अभावे भार्यायाः धनस्य ऋणस्य शेषं वंशजानां पुत्रपौत्राणां न भविष्यति ।

यदा धनं पुत्रेषु विभज्यते तदा भ्रातृत्वे जाताः पुत्राः अपि तस्य धनस्य भागं प्राप्नुयुः यत् विभाजनपूर्वं मातापितृभिः स्नेहेन यत् किमपि दत्तं तत् तस्यैव भविष्यति पितुः मृत्योः अनन्तरं धनं विभज्यते उपनयनादिसंशोधनं विना भ्रातृसंशोधनस्य व्यवस्थां करिष्यन्ति, अविवाहितभगिन्याः विवाह: अपुत्रस्य मृत्योः अनन्तरं तस्य सम्पत्तिः प्रथमं तस्य भार्यायाः, भार्याभावे कन्यायाः, कन्यायाः अभावे भ्रातृणां, तेषां अभावे मित्राणां (स्वस्य, पितुः, मातुः बन्धुजनानाम्), तेषां अभावे शिष्याणां च तस्य अनुपस्थितिः सहपाठिनः एतत् धनं प्राप्नुवन्ति एषः नियमः सर्वेषु वर्णेषु प्रवर्तते । यदि श्वशुराः मिलित्वा धनविभागानन्तरं धनस्य उपयोगं कुर्वन्ति तर्हि तत्सम्बद्धं धनं कथ्यते यदि सहचरः म्रियते तर्हि तस्य भागः अन्येन सहकारिणा पुत्राय दास्यति । नपुंसकाः ,ब्रह्महन्तपुत्राः, अपंगाः, उन्मत्ताः, जडाः ,अन्धाः, असाध्याः, रोगी, आश्रमः परित्यक्ताः, पितृभ्यः द्वेषिणः, एते पुत्राः अपि पितृधनस्य भागं न प्राप्नुयुः। विवाहात् पूर्वं कन्यानां भरणपोषणस्य उत्तरदायित्वं अपि ग्रहीतव्यं, ये अव्यभिचारिणः सन्ति । याज्ञवल्क्यः स्त्रियाः धनस्य विषये अपि चर्चां करोति । स्त्रियाः स्वकीयं धनं 'स्त्रीधन' इति ते कुलम् नव प्रकारेण एतत् धनं प्राप्नुवन्ति ।

यदि कोऽपि धनविभागं प्रति आक्षेपं करोति वा यदि कोऽपि अस्य विभागस्य अङ्गीकारं करोति ,तदा बन्धुसाक्षिणः किं वदिष्यन्ति,दस्तावेजैः विभागस्य संशयः दूरं भविष्यति।कृषादिकार्यस्य पृथक्प्रवर्तनेन अपि विभागः सम्भवः।

| ज्ञातव्यम् |
| --- |
| स्त्रीधनम् : आचार्यः याज्ञवल्क्यः दायभागानन्तरं स्त्रीधनं व्याख्यातवान् । स्त्रीधनम् इत्यर्थः स्त्रीसम्बद्धं धनम् । स्मृतिशास्त्रे स्त्रीधनम् इत्यर्थः स्त्रीणां स्वधनम् । याज्ञवल्क्यः सर्वमाहत्य नवप्रकारस्य पत्नीधनस्य उल्लेखं चकार- मातृपितृपतिभ्रातृदत्तम्, अध्यन्नुपागतम्, अधिवेदनिकम्, बन्धुदत्तम्, शुल्कः, अध्यवाहनिका, अम्बधेयकः, पदबन्धनिकः, सौदायिकः च। (एतत् पश्चात् विस्तरेण व्याख्यायते ।) |

## १३.५. अध्यायस्य असमीयासारांशः

আচার্য যাজ্ঞৱল্ক্যপ্রণীত 'যাজ্ঞৱল্ক্যসংহিতা' এখন প্রাচীন ন্যায়-বিচাৰ সম্পর্কীয় স্মৃতিশাস্ত্র । সম্পূর্ণ যাজ্ঞৱল্ক্যসংহিতা তিনিটা প্রকাৰত বিভক্ত -আচাৰ-ব্যৱহাৰ-প্রায়শ্চিত্ত প্রকাৰণ ।যাজ্ঞৱল্ক্যসংহিতাৰ দ্বিতীয় প্রকৰণত ব্যৱহাৰ সম্পর্কীয় নিয়মসমূহৰ উল্লেখ আছে, যিটো বর্তমান সময়ত Judicial procedure নামেৰে খ্যাত। যাজ্ঞৱল্ক্যসংহিতাত সর্বমুঠ ২০ টা ব্যৱহাৰ পদৰ আৰু বিবাদৰ বিষয় আলোচিত হৈছে। উক্ত ২০ টা ব্যৱহাৰ পদৰ অন্যতম বিবাদৰ বিষয়টো হৈছে দায়ভাগ। দায়শব্দৰ অর্থ হৈছে সেই সম্পত্তি , যাৰ ধন স্বামীৰ সৈতে সম্বন্ধ যুক্ত আন ব্যক্তিৰ নিজৰ অধীনস্থ হয়। যাজ্ঞৱল্ক্যসংহিতাৰ লেখন অতি স্পষ্ট শৈলীত লিখা হৈছে। ইয়াত প্রায় একহাজাৰ শ্লোক আছে বুলি কোৱা হয়। যাজ্ঞৱল্কসংহিতাত বর্ণ, আশ্রম আদি বিষয়ৰ লগত জড়িত শিক্ষা দিয়া হৈছে । যাজ্ঞৱল্ক্যসংহিতা তিনিটা ভাগত বিভক্ত, য'ত উপযুক্ত স্থানত প্রয়োজনীয় সকলো বিষয় বিকশিত কৰা হৈছে, ক'তো পুনৰাবৃত্তি নাই, প্রথমটো হৈছে আচাৰাধ্যায়, ইয়াত চৈধ্যটা বিদ্যা, ধর্মোৎপাদন, দহটা আচৰণৰ নীতি আদিৰ ওপৰত সম্পূর্ণ তেৰটা অধ্যায় আছে। দ্বিতীয়টো হৈছে ব্যাৱহাৰ অধ্যায়, ইয়াৰ পঁচিশটা অধ্যায় আছে আৰু তৃতীয়টো হৈছে প্রায়শ্চিত্ত, ইয়াত ছটা অধ্যায় আছে। যেনে অপাদধর্ম, যতী ধর্ম আদি। ইয়াত ব্যবহাৰ অধ্যায়টো বিশেষ সর্বাধিক সংখ্যক অধ্যায় আছে। ই গভীৰ আৰু গুৰুতৰ কাৰণ বিষয়বস্তুৰ গভীৰতা আছে, কিন্তু প্রাঞ্জল, বুজিব পৰা আৰু বিশ্বজনীনভাৱে গ্রহণযোগ্য । চমুকৈ ক'বলৈ গ'লে ইয়াৰ বিশদ তালিকা হ'ল – আদালতৰ সদস্য, ন্যায়াধীশ, আচৰণৰ সংজ্ঞা, পদ্ধতি, সাক্ষী, ভুৱা সাক্ষীৰ বিৰুদ্ধে গোচৰ চলোৱা, ধর্মতত্ত্ব আৰু অর্থনীতিৰ পাৰস্পৰিক বিৰোধিতা, লিখিত প্রমাণ, সাক্ষী আৰু উপাদানৰ উপায়, আদালতৰ প্রকাৰ, বল প্রয়োগ, প্রৱঞ্চনা, আনুষংগিক সামগ্রী লাভ কৰা ।

**अग्रगत्याः** निरीक्षणम्

प्रश्नः १ उत्तरदायित्वस्य किम् अर्थः ?

प्रश्नः २ दायित्वस्य के प्रकाराः सन्ति ?

प्रश्नः २ कः पुत्रः सर्वोत्तमः भागः प्राप्यति ?

प्रश्नः ४ विभागस्य प्रकाराः के सन्ति ?

प्रश्न: ५ मातुः सम्पत्तिः कः लाभः करिष्यति ?

प्रश्नः६ -पुत्राः कति प्रकाराः सन्ति ?

प्रश्नः ७ – सर्वेभ्यः श्रेष्ठः पुत्रः कः ?

प्रश्नः ८ – निःसन्तानस्य मृत्युसम्पत्त्याः प्रथमं कः प्राप्नोति ?

प्रश्नः ९ – 'सृजनात्मक' इति किम् ?

प्रश्न: १० : 'स्त्रीधन' इत्यस्य अर्थः किम् ?

## १३.६ अध्यायात् किमवगतम्

अस्मिन् अध्याये वयं निम्नलिखितविषयाणां चर्चां कृतवन्तः।

* प्राचीनभारतीय विचारप्रक्रियायाः विषये ज्ञातवान्।
* विवादस्य विषयत्वेन दायित्वस्य परिचयः।
* 'दाय' तथा 'भाग' सम्बन्धे ज्ञानं लभते।
* पितुः सम्पत्तिः कथं विभज्यते इति ज्ञातवान्।
* पितुः अभावे कस्य किं भागं प्राप्तण्यम् इति ज्ञातम्।
* पुत्रप्रकार, पत्नी धन, संस्कृति इत्यादीनां परिचयः

## १३.७ ज्ञानाधिक्यम्

१)वसु,(न्यायतीर्थ),सुमिता,(१४०७साल), याज्ञवल्क्यसंहिता,व्यवहार अध्यायः, कोलकाता: संस्कृतपुस्तक भाण्डार।

२)झा,(डं),शशीनाथ, (सम्पादित),(२००२), याज्ञवल्क्यसंहिता,व्यवहार-अध्याय,दिल्ली: भारतीय विद्या प्रकाशन्।

३)Panda,(Dr),R.K.,(ed),2011.Yajnavalkya-smriti,Delhi: Bharatiya kala prakashan.

## १३.८ अग्रगत्याः निरूपणम्

**प्रश्नः १। उत्तरम्** – पितुः सम्पत्तिविभागः ।

**प्रश्नः २। उत्तरम्** – दायित्वं द्विविधं भवति -अनलेखितं,प्रतिबन्धैः सह ।

**प्रश्नः ३। उत्तरम्** – ज्येष्ठः पुत्रः ।

**प्रश्नः ४। उत्तरम्** – समानविभाग: विषमविभागश्च ।

**प्रश्नः ५। उत्तरम्**: तस्य पुत्री ।

**प्रश्नः ६। उत्तरम्** – द्वादशप्रकारः ।

**प्रश्नः ७। उत्तरम्** -औरसः पुत्रः अस्ति ।

**प्रश्नः ८। उत्तरम्** – तस्य पत्नी ।

**प्रश्नः ९। उत्तरम्** – मिश्रधनं धारयति ।

**प्रश्नः १०। उत्तरम्** – स्त्रीसम्बन्धीय धनम् ।

## १३.९ अभ्यासप्रश्नाः

क) वस्तुनिष्ठप्रश्नाः

प्रश्न १. 'दायभाग:' इत्यनेन किं बुद्धते ?

प्रश्न २. दायभागे भार्यायाः भागा: कः ?

प्रश्न ३. विभागेन पूर्वं दत्तं धनं केभ्यः प्राप्स्यति ?

प्रश्न ४. 'पुत्रीकापुत्र:' क: उच्यते?

प्रश्न ५. दायभागे एक: अयोग्यस्य व्यक्तिस्य नाम लिखत।

ख) लघुप्रश्नः

प्रश्न १. कः सम्पति: न विभज्यते ?

प्रश्न २. पीतामहस्य धनं कथं विभज्यते ?

प्रश्न ३. असंस्कृतभ्रात्रीणां का व्यवस्था अस्ति ?

ग) दीर्घप्रश्नाः

प्रश्न १. पितृत्वे उत्तरदायित्वविभागस्य सम्यक् प्रतिपादयत् ।

प्रश्न २. पुत्रलक्षणस्य के के प्रकाराः? सम्यक् प्रतिपादयत् ।

प्रश्न ३. स्त्रीधनस्य विषये सम्यक् प्रतिपादयत् ।

प्रश्न ४. कस्य दायभाग: कर्तुं न शक्यते?

प्रश्न ५. अपुत्रस्य पितुः सम्पत्तिः कथं विभज्यते ? सम्यक् प्रतिपादयत् ।

घ) वस्तुनिष्ठप्रश्नाः

प्रश्न: १ दायविभाग इत्यनेन किं बुध्यते ?

प्रश्न: २ दायविभागे पत्न्याः कति भागः ?

प्रश्न: ३ विभागेन पूर्वं दत्तं धनं केभ्यः प्राप्स्यति ?

प्रश्न: ४ स्नुषा किम् ?

प्रश्न: ५ दायविभागस्य एकः अयोग्यव्यक्तेः नाम लिखतु ।

ङ) लघु प्रश्न

प्रश्न: १ काः सम्पत्तिः विभाजिताः न भवन्ति ?

प्रश्न: २ पितामहस्य धनं कथं विभज्यते ?

प्रश्न: ३ असंस्कृतभ्रातृणां का व्यवस्था अस्ति ?

च) निबन्धप्रश्नाः

प्रश्न: १ पितुः उत्तरदायित्वविभागस्य चर्चां कुरुत ।

प्रश्न: २ पुत्राणां चिह्नानि कानि प्रकाराणि च सन्ति ? चर्चां कुर्मः।

प्रश्न: ३ स्त्रीधनविषये चर्चां कुरुत ।

प्रश्न: ४ कः उत्तरदायी न भवितुम् अर्हति, संक्षेपेण लिखतु ।

प्रश्न: ५ अपुत्रस्य पितुः सम्पत्तिः कथं विभज्यते ? चर्चां कुर्मः ।

*****

# अध्याय-१४ याज्ञवल्क्यस्मृतिः (व्यवहाराध्यायः, ऋणादानप्रकरणम्)

## अध्यायसंरचनम् -

१४.१ उद्देश्यम्

१४.२ परिचयः

१४.३ मूलपाठः (विंशतिश्लोकाः)

१४.४ ऋणादानप्रकरणम् - संक्षिप्तालोचनम्

१४. .५ अध्यायस्य असमीयासारांशः

१४. ६ महत्त्वपूर्णश्लोकानां व्याख्या

१४. ७ अग्रगत्याः निरूपणम्

१४.८ अभ्यासप्रश्नाः

## १४.१ उद्देश्यम् –

**अध्यायस्यास्य सम्यगध्ययनानन्तरम् -**

**१.** प्राचीनभारतीयविचारव्यवस्थया सह परिचयो भवितुमर्हति ।

**२.** याज्ञवल्क्यस्मृत्यनुसारं व्यवहारेण सह परिचयो भवितुमर्हति।

**३.** जनाः ऋणादान-ऋणग्रहणादयः प्रक्रियायाः ज्ञानं लब्धुं शक्नुवन्ति।

**४.** ऋणस्य वृद्धिविषये सम्यकतया अवगन्तुं शक्नोति।

**५.** वृद्धरपि भिन्नप्रकाराः ज्ञातुं शक्नोति।

**६.** इतोऽपि प्रतिभू आधिः चेत्यादि विषयोपरि सम्यक् ज्ञानं भविष्यति।

## १४.२ परिचयः -

मनुस्मृतेरनन्तरम् स्मृतिसाहित्ये आचार्ययाज्ञवल्क्यप्रणीतयाज्ञवल्क्यस्मृति एव अन्यतमं वर्तते। ग्रन्थेऽस्मिन् आचार-व्यवहार-प्रायश्चित्तप्रभृतयः त्रयः अध्यायाः सन्ति। त्रिषु अध्यायेषु द्वितीयोऽध्यायः 'व्यवहाराध्यायः' सर्वबृहदस्ति। अध्यायोऽयमस्य ग्रन्थस्य हृदयरूपेण ख्यातोऽस्ति। उल्लेखनीयं यत् व्यवहारशब्दस्य विभिन्नार्थाः तु मिलन्त्येव। परन्तु याज्ञवल्क्यस्मृतौ अस्यार्थः सामान्यतया वाद-विवादरूपेण

गृह्यते। अध्यायेऽस्मिन् पञ्चविंशतिः प्रकरणानि सन्ति। पञ्चविंशतिषु प्रकरणेषु तृतीयप्रकरणमस्ति ऋणादानप्रकरणम्। अस्मिन् ऋणादानप्रकरणे याज्ञवल्क्यः ऋणविषये वदति यत् यदा कश्चित् जनः स्वसमीपे उपलब्धसामग्र्या स्वस्य आवश्यकतां पूरयितुमसमर्थः भवति तथा च तादृक्षु परिस्थितिषु यदा सः अन्यस्मात् व्यक्तेः धन साहाय्यं गृह्णाति, तदा सः साहाय्यं 'ऋणम्' इति उच्यते। ऋणदान-ऋणग्रहणस्य एषा पद्धतिरेव साधारणतया ऋणादानेति वक्तुं शक्यते। उल्लेखनीयं यत् यः ऋणप्रदानं करोति सः उत्तमर्णः पुनः यः ऋणग्रहणं करोति सः अधमर्ण इति उच्यते। उत्तमर्णः अधमर्णोः वा कया पद्धत्या ऋणादानं तथा ऋणग्रहणं करोति एते सर्वे विषयाः प्रकरणेऽस्मिन् विशदरूपेण वर्णिताः सन्ति। अत्र अष्टाविंशतिश्लोकाः सन्ति। एतेषु विंशतिः श्लोकाः अत्र आलोचिताः।

## १४.३ मूलपाठः (विंशतिः श्लोकाः)

**अशीतिभागो वृद्धिः स्यान्मासि मासि सबन्धके।**
**वर्णक्रमाच्छतं द्वित्रिचतुष्पञ्चकमन्यथा।।१।।**

**भावार्थः –**

उल्लिखितश्लोकेऽस्मिन् वर्णक्रमानुसारेण कः कियत् धनं वृद्धिरूपेण दास्यति तस्यैव वर्णनमुपलभ्यते । अत्र वृद्धिशब्दस्यार्थोऽस्ति यत् उत्तमर्णेन अधमर्णाय प्रदत्त धनस्य प्रतिशतं किञ्चिदंशः अधमर्णेन पुनः उत्तमर्णं वर्द्धितधनरूपेण देयं धनं बुध्यते । ऋणं द्विविधं भवति, सबन्धकम्, अबन्धकञ्चेति । अधमर्णः ऋणग्रहणावसरे तस्य काचित् सम्पद् आधिरूपेण बन्धकरूपेण वा स्थापयति चेत् तद् सबन्धकऋणमिति उच्यते । अस्य ऋणस्य वृद्धिः प्रतिमासं अशीतिभागानाम् एकभागं स्यात् । पुनः ऋणग्राहकः ऋणग्रहणसमये यदि कापि सम्पद् बन्धकरूपेण न स्थापयति तर्हि तत् अबन्धकऋणमिति उच्यते । अस्मिन् ऋणे वृद्धिः क्रमशः चतुर्वर्णानां कृते द्विप्रतिशतं त्रिप्रतिशतं चतु:प्रतिशतं पञ्चप्रतिशतं च भविष्यति ।

**অসমীয়া অনুবাদ –**

উল্লেখিত শ্লোকফাকিত বর্ণানুসৰি ক্রমান্বয়ে কোনে কিমান টকা সুদ হিচাপে প্রদান কৰিব তাৰেই আভাষ দিবলৈ বিচৰা হৈছে। ইয়াত, বৃদ্ধি শব্দৰ প্রয়োগৰ দ্বাৰা ইয়াকে বুজাবলৈ বিচৰা হৈছে যে - উত্তমর্ণই অধমর্ণক ধাৰলৈ দিয়া টকাৰ শতকৰা কিছু অংশ ঋণ লওঁতাজনে পুনৰ ঋণদাতাজনক সুদ হিচাপে দিব লাগিব। সবন্ধক আৰু অবন্ধক হিচাপে ঋণ দুই প্রকাৰৰ। অধমর্ণজনে ঋণ গ্রহণৰ অৱসৰত তেওঁৰ কোনো মূল্যবান সম্পদ বন্ধক তথা আধি হিচাপে থ'লে সেই ঋণক সবন্ধক ঋণ বোলে। এই ঋণৰ ক্ষেত্রত বৃদ্ধি

অথবা সুদ প্রতিমাহে আশীভাগৰ এভাগ হ'ব। আকৌ, ঋণ গ্রহণৰ সময়ত গ্রহণকৰোতাজনে যদি কোনো ধৰণৰ সামগ্রী বন্ধক হিচাপে নাৰাখে তেতিয়া তাক অবন্ধক ঋণ বোলে। এই ঋণৰ ক্ষেত্রত চতুর্বর্ণৰ বাবে যথাক্রমে শতকৰা ২।৩।৪।৫ ভাগ সুদ হ'ব।

**कान्तारगास्तु दशकं सामुद्रा विशकं शतम्।**
**दद्युर्वा स्वकृतां वृद्धिं सर्वे सर्वासु जातिषु।।२।।**

**भावार्थः –**

ये वनं समुद्रं वा गच्छन्ति ऋणं गृहीत्वा तेषां कृते वृद्धिधनं निर्धारितमिह। यतो हि तत्र प्राणहानेः सम्पत्तिहानेः च आशंका भवति। यदि कश्चन पुरुषः व्यापारार्थं वनं गच्छति तर्हि तेन प्रतिमासं १० प्रतिशतं पुनः कश्चन समुद्रं गच्छति चेत् २० प्रतिशतं वृद्धिं दातव्यं भवति।

**অসমীয়া অনুবাদ –**

অৰণ্য আৰু সমুদ্রলৈ গ'লে সুদৰ হাৰ বৃদ্ধি হোৱা দেখা যায়। কিয়নো ইয়াত প্রাণ আৰু ধন নাশৰ আশংকা থাকে। কোনো লোকে ব্যৱসায়ৰ অর্থে যদি অৰণ্যলৈ যায় তেতিয়া তেওঁ প্রতিমাহে শতকৰা ১০ ভাগ আৰু সমুদ্রলৈ যোৱা জনে শতকৰা ২০ ভাগ সুদ দিব লাগে।

**संततिस्तु पशुस्त्रीणां रसस्याष्टगुणा परा।**
**वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणा परा।।३।।**

**भावार्थः –**

अधमर्णेन बन्धकरूपेण स्थापितानां स्त्रीणां पशूनां च वृद्धिं न गृह्यते। यतः तेषां सन्तति एव तेषां वृद्धिं भवति। पुनः यदि कश्चित् तैलघृतादिकं रसयुक्तं पदार्थं गृहीत्वा दीर्घकालं यावत् न प्रतियच्छति तर्हि द्रव्याणामेतेषां वृद्धिः अष्टगुणात्मकं तथैव वस्त्रे चतुर्गुणं धान्ये त्रिगुणं सुवर्णे च द्विगुणं वृद्धिः दातव्यम्।

**অসমীয়া অনুবাদ –**

অধমর্ণৰ দ্বাৰা বন্ধকত থোৱা স্ত্রী আৰু পশুৰ সুদ লোৱা নহয় কাৰণ তেওঁলোকৰ সন্তানেই তেওঁলোকৰ সুদ। আকৌ কোনোবাই ৰসদ্রব্য যেনে তৈল, ঘৃত আদি গ্রহণ কৰি বহু সময় পর্যন্ত ঘূৰাই নিদিলে সেইসমূহ দ্রব্যৰ সুদ হ'ব দ্রব্যসমূহৰ আঠগুণ। ঠিক একেদৰেই বস্ত্রৰ ক্ষেত্রত চাৰি গুণ, ধান্যৰ ক্ষেত্রত তিনিগুণ আৰু হিৰণ্য তথা সোণৰ ক্ষেত্রত দুই গুণ সুদ দিব লাগে।

**प्रपन्नं साधयन्नर्थं न वाच्यो नृपतेर्भवेत्।**

**साध्यमानो नृपं गच्छन्दण्ड्यो दाप्यश्च तद्धनम्।।४।।**

**भावार्थः-**

धनविनिमयं शान्तिपूर्वकं प्रसन्नतापूर्वकं वा भवति चेत् तत्र राज्ञः हस्तक्षेपो न भवेत, परन्तु यदि अधमर्णः समयसमाप्तेरनन्तरमपि उत्तरमर्णात् गृहीतं धनं अदत्वा न्यायार्थं राज्ञः समीपं गच्छति तर्हि राज्ञा अधमर्णं दण्डं दत्त्वा उत्तमर्णाय धन प्रदानस्य व्यवस्था कर्तव्या ।

**অসমীয়া অনুবাদ –**

ধনৰ লেন দেন প্ৰসন্নতাপূৰ্বক তথা শান্তিপূৰ্ণভাৱে হ'লে তাত ৰজাৰ হস্তক্ষেপ নাথাকে কিন্তু যদি অধমৰ্ণই উত্তমৰ্ণৰ পৰা লোৱা ধন সময় উকলি যোৱাৰ পাচতো ঘূৰাই নিদি বিচাৰৰ বাবে ৰজাৰ কাষ চাপে, তেতিয়া কিন্তু ৰজাই অধমৰ্ণক দণ্ড দিয়ে লগতে উত্তমৰ্ণক দিব লগা ধন পুনৰ অধমৰ্ণৰ দ্বাৰা ঘূৰাই দিয়াৰ ব্যৱস্থা কৰে।

**गृहीतानुक्रमाद्दाप्यो धनिनामधमर्णिकः।।**
**दत्त्वा तु ब्राह्मणायैव नृपतेस्तदनन्तरम्।।५।।**

**भावार्थः –**

अत्र सजातीय-विजातीयेभ्यः उत्तमर्णेभ्यः ऋणग्रहणस्य प्रसङ्गं निर्दिशति। ऋणग्राहकः अधमर्णः यदि समजातिभ्य एकाधिकेभ्य उत्तमर्णेभ्य ऋणं गृह्णाति तर्हि राज्ञा अधमर्णात् तस्य ऋणस्य परिशोधं देयक्रमेण एव कारयेत्। यदि समानमेव स्थितिः ब्राह्मणादिचतुर्षु वर्णेषु भवति तर्हि उत्तमर्णं वर्णक्रमेणैव ऋणं परिशोधितव्यम्।

**অসমীয়া অনুবাদ –**

ইয়াত সজাতীয় আৰু বিজাতীয় উত্তমৰ্ণৰ পৰা ঋণ গ্ৰহণ কৰাৰ প্ৰসংগ উল্লেখ কৰা হৈছে। ঋণ লওঁতাজনে যদি একেজাতীয় একাধিক উত্তমৰ্ণৰ পৰা ঋণ গ্ৰহণ কৰে তেন্তে ধন দিয়াৰ ক্ৰম অনুসৰিয়েই অৰ্থাৎ প্ৰথমে লোৱাজনৰ পৰা প্ৰথমে আৰু শেষত লোৱাজনৰ পৰা শেষত ৰজাই সেই ঋণ পৰিশোধ কৰাব। কিন্তু একে পৰিস্থিতি যদি ব্ৰাহ্মণ আদি চতুৰ্বৰ্ণৰ ক্ষেত্ৰত সৃষ্টি হয়, তেন্তে বৰ্ণক্ৰমানুসৰি অৰ্থাৎ প্ৰথমে ব্ৰাহ্মণ, দ্বিতীয়তে, ক্ষত্ৰিয়, তৃতীয়তে বৈশ্য আৰু চতুৰ্থতে শূদ্ৰ উত্তমৰ্ণৰ ধন পৰিশোধ কৰিব লাগিব।

**राज्ञाऽधमर्णिको दाप्यः साधितादृशकं शतम्।**
**पञ्चकं च शतं दाप्यः प्राप्तार्थो ह्युत्तमर्णिकः।।६।।**

**भावार्थः –**

प्रदत्तं ऋणं यदि अधमर्णेन समयानुसारं न परिशोधितं तर्हि राज्ञा स्वयमधमर्णात् धनं सङ्गृह्य उत्तमर्णाय दातव्यम्। एवं सति राजा अधमर्णात् उद्धारकृतधनस्य १० प्रतिशतं अधिकं संमृह्य उत्तमर्णं तस्य प्रापृण्यं धनं दत्त्वा तस्मादपि पञ्च प्रतिशतं च धनं स्वस्य कृते ग्रहितुं शक्नोति।

**অসমীয়া অনুবাদ –**

প্রদত্ত ঋণ যদি অধমর্ণই যথাসময়ত পৰিশোধ নকৰে, তেন্তে সেই ধন ৰজাই অধমর্ণৰ পৰা সংগ্রহ কৰি উত্তমর্ণক পৰিশোধ কৰিব লাগিব। এনেস্থলত, পলমকৈ ধন ঘূৰাই দিয়াৰ বাবদ অধমর্ণৰ পৰা শতকৰা ১০ শতাংশ আৰু ধনখিনিৰ পুনৰুদ্ধাৰ কৰি দিয়াৰ বাবে উত্তমর্ণৰ পৰা শতকৰা ৫ শতাংশ ধন ৰজাই লাভ কৰিব।

**हीनजातिं परिक्षीणमृणार्थं कर्म कारयेत्।**
**ब्राह्मणस्तु परिक्षीणः शनैर्दाप्यो यथोदयम्।।७।।**

**भावार्थः –**

यदि उत्तमर्णः निम्नजातिं निर्धनव्यक्त्यै ऋणप्रदानं करोति, तदा ऋणपरिशोधे असमर्थमधमर्णं उत्तमर्णः स्वस्य क्रियायां नियोगं कर्तुमर्हति। पुनः ऋणदाता उच्चजातेः ब्राह्मणादिं ऋणं ददाति चेत् अधमर्णः निर्धनः सन् अपि स्वसाध्यानुसारं शनैः शनैः ऋणप्रदानं कर्तुं शक्नोति। अत्र सः (ब्राह्मणः) उत्तमर्णस्य कर्मकर्त्तुं प्रतिबद्धो न भवति।

**অসমীয়া অনুবাদ –**

ঋণ দিওঁতাজনে যদি নিজতকৈ হীনজাতিৰ ধনহীন ব্যক্তিক ঋণ প্রদান কৰে, তেনেস্থলত যথাসময়ত ঋণ পৰিশোধ কৰিবলৈ অসমর্থ হোৱা অধমর্ণজনক উত্তমর্ণজনে তেওঁৰ কাম-কাজত নিয়োগ কৰায়। পুনৰ ঋণ প্রদাতাজনে যদি উচ্চ জাতি অর্থাৎ ব্রাহ্মণ আদিক ঋণ প্রদান কৰে তেন্তে অধমর্ণজন ধনহীন হ'লেও তেওঁ নিজৰ সাধ্যানুসৰি লাহে লাহে ঋণ পৰিশোধ কৰিব পাৰে। এইক্ষেত্রত তেওঁ উত্তমর্ণজনৰ কাম কৰি দিয়াৰ বাবে দায়বদ্ধ নহয়।

**दीयमानं न गृह्णाति प्रयुक्तं यः स्वकं धनम्।**
**मध्यस्थस्थापितं तत्स्याद्वर्धते न ततः परम्।।८।।**

**भावार्थः -**

यदि उत्तमर्णः अधिकवृद्धिप्राप्त्यर्थं: अधमर्णेन देयमानं ऋणस्य धनं न गृह्णाति तर्हि अधमर्णः कमपि अन्यव्यक्तिं मध्यस्थरूपेण नियोज्य तस्यैव हस्ते उत्तमर्णाय देयमानं धनं समर्पयितुं शक्नोति। एवं करोति चेत् ऋणी वृद्धिप्रदानात् मुक्तो भविष्यति।

**অসমীয়া অনুবাদ –**

উত্তমর্ণজনে অধিক সুদ লাভৰ আশাত যদি অধমর্ণই পৰিশোধ কৰিব বিচৰা ঋণ গ্ৰহণৰ বাবে অনিচ্ছা প্ৰকাশ কৰে, তেনে পৰিপ্ৰেক্ষিতত অধমর্ণজনে আন এজন ব্যক্তিক মধ্যস্থ ব্যক্তি হিচাপে ৰাখি তেওঁৰ হাততে উত্তমর্ণক পৰিশোধ কৰিবলগীয়া ধনখিনি অর্পণ কৰিব পাৰে। তেনে কৰিলে সেই দিনৰ পৰাই অধমর্ণজন ঋণৰ বৰ্দ্ধিত সুদৰ পৰা মুক্ত হ'ব।

**अविभक्तैः कुटुम्बार्थे यदृणं तु कृतं भवेत्।**
**दद्युस्तद्रिक्थिनः प्रेते प्रोषिते वा कुटुम्बिनि।।९।।**

**भावार्थः –**

संयुक्तपरिवारेषु जनानां संख्या अधिकत्वात् परिवारस्य पोषणार्थं ऋणग्रहणमावश्यकमापद्यते। तस्मिन् स्थितौ परिवारस्य मिलितचेष्टायां अथवा एकैकेन गृहीतं ऋणं परिशोधस्य दायित्वभारं परिवारस्य मुख्यजनोपरि एव आयाति। तत्रापि काश्चित् कारणवशात् यदि सः विदेशं प्रति गच्छति तस्य मृत्युर्वा वा भवति तदा तस्य उत्तराधिकारिणा ऋणपरिशोधं कर्तव्यम्।

**অসমীয়া অনুবাদ –**

সংযুক্ত পৰিয়ালত সদস্যৰ সংখ্যা বেছি হোৱাৰ বাবে পৰিয়ালটোৰ ভৰণ-পোষণার্থে ঋণ ল'বলগা হ'ব পাৰে। তেনেস্থলত পৰিয়ালৰ বহুকেইজনৰ মিলিত প্ৰচেষ্টাত গ্ৰহণ কৰা সেই ঋণ পৰিশোধৰ দায়িত্বভাৰ মূৰব্বীজনৰ ওপৰত পৰে। কিন্তু কোনো কাৰণবশত তেওঁ যদি বিদেশগমন কৰে অথবা মৃত্যুবৰণ কৰে তেতিয়া মূৰব্বীজনৰ অনুপস্থিতিত পৰিয়ালৰ আন সদস্যসকলে সেই ঋণ পৰিশোধ কৰিব লাগিব।

**न योषित्पतिपुत्राभ्यां न पुत्रेण कृतं पिता।**
**दद्यादृते कुटुम्बार्थान्न पतिः स्त्रीकृतं तथा।।१०।।**

**भावार्थः –**

পৰিবাৰস্য পালনাতিৰিক্তং যদি পতি: পুত্ৰ: বা স্বস্বার্থসিদ্ধ্যর্থম্ ঋণং গৃহ্লাতি তর্হি তস্য ঋণস্য পৰিশোধনে পত্নী মাতা বা উত্তৰদায়ী ন ভৱতি। অপি চ পুত্ৰগৃহীতঋণস্য পৰিশোধনার্থং পিতা উত্তৰদায়ী ন ভৱতি। এৱমেৱ স্বস্বার্থে স্ত্ৰিয়া ঋণং গৃহ্যতে চেদপি পত্যা তদ্ ঋণং পৰিশোধং ন কর্তব্যম্ ।

**অসমীয়া অনুবাদ –**

পৰিয়ালৰ ভৰণ-পোষণৰ বাহিৰে স্বস্বার্থ সিদ্ধিৰ বাবে যদি স্বামী অথবা পুত্ৰই ঋণ গ্ৰহণ কৰে তেন্তে সেই ঋণ পৰিশোধৰ বাবে স্ত্ৰীগৰাকী (স্বামীৰ ক্ষেত্ৰত পত্নী,পুত্ৰৰ ক্ষেত্ৰত মাতৃ) দায়বদ্ধ নহয়। আকৌ, পুত্ৰই গ্ৰহণ কৰা ঋণ পৰিশোধৰ বাবে পিতৃ দায়বদ্ধ নহয়। ঠিক একেদৰেই যদি এগৰাকী স্ত্ৰীয়ে ঋণ গ্ৰহণ কৰে, সেই ঋণ তেওঁৰ স্বামীৰ দ্বাৰা পৰিশোধ কৰিব নালাগে।

**अग्रगत्याः निरीक्षणम्**

**प्रश्नः** १. प्रतिमासं सबन्धकऋणस्य कियत् वृद्धिः भवति?

**प्रश्नः** २. उत्तमर्णः कः?

**प्रश्नः** ३. अधमर्णः कः?

**प्रश्नः** ४. यः व्यवसायार्थं वनं गच्छति सः कियत् ऋणं दास्यति?

**प्रश्नः** ५ .रिक्थी इति किमस्ति?

**सुराकामद्यूतकृतं दण्डशुल्कावशिष्टकम्।**
**वृथादानं तथैवेह पुत्रो दद्यान्न पैतृकम्।।११।।**

**भावार्थः –**

যথা স্বহিতায় গৃহীতং ঋণং অন্যৈ: ন পৰিশোধিতব্যম্, তথৈৱ মদ্যপান-কাম-দ্যূত-ৰাজদণ্ড-বৃথাদানসম্বন্ধিনঃ পিত্ৰা কৃতং ঋণং প্ৰতিদাতুং পুত্ৰ উত্তৰদায়ী ন ভৱতি ।

**অসমীয়া অনুবাদ –**

যিদৰে নিজৰ স্বার্থ সিদ্ধিৰ বাবে গ্ৰহণ কৰা ঋণ আনে পৰিশোধ কৰিব নালাগে ঠিক একেদৰেই মদ্যপান, স্ত্ৰীকামনা, দ্যুতক্ৰীড়াৰ লগত জড়িত পিতৃৰ দ্বাৰা গৃহীত ঋণ, ৰাজদণ্ড স্বৰূপে পিতৃৰ পৰিশোধ কৰিবলগীয়া ঋণ তথা বৃথাদান আদিৰ দৰে বিভিন্ন কাৰণবশত পিতৃকৃত ঋণ পৰিশোধ কৰাৰ বাবে পুত্ৰ দায়বদ্ধ নহয়।

**गोपशौण्डिकशैलूषरजकव्याधयोषिताम्।**
**ऋणं दद्यात्पतिस्तोषां यस्माद्वृत्तिस्तदाश्रया।।१२।।**

**भावार्थः –**

पत्न्या गृहीतं ऋणं पत्या न परिशोधितव्यमिति यद्यपि पूर्वमेवोक्तं, तथापि यासां स्त्रीणां पतिः गोपाः, मद्यव्यापारिणः, नटाः, रजकाः, लुब्धकाः च तासां पतिभिः भार्याकृतम् ऋणमपि परिशोधं कर्तव्यम् । यतोहि स्त्रियाः साहाय्येन ते जीवनं यापयन्ति।

**অসমীয়া অনুবাদ –**

পত্নীকৃত ঋণ স্বামীয়ে পৰিশোধ কৰিব নালাগে বুলি পূৰ্বতে উল্লেখ কৰি অহা হৈছে যদিও যিসকল স্ত্রীৰ স্বামী গোপালক, মদৰ ব্যৱসায়ী, নাট্যজীৱি, ধোবা তথা চিকাৰী হয়; সেইসকল স্বামীয়ে পত্নীকৃত ঋণ পৰিশোধ কৰিব লাগে। কিয়নো স্ত্রীসকলৰ সাহায্যতে এওঁলোকে জীৱিকা নির্বাহ কৰে।

**प्रतिपन्नं स्त्रिया देयं पत्या वा सह यत्कृतम्।**
**स्वयंकृतं वा यदृणं नान्यत्स्त्री दातुमर्हति।।१३।।**

**भावार्थः –**

प्रस्तुतश्लोकेऽस्मिन् कस्यां परिस्थित्यां स्त्रिया ऋणपरिशोधं कर्त्तव्यम् तस्मिन् सन्दर्भे प्रोक्तम् । पत्युः मरणासन्नकाले प्रवासकाले पत्या एकाकिना स्वामीस्त्रीणां मिलितरूपेण वा गृहीतऋणं अथवा पत्न्या स्वस्य कृते गृहीतं ऋणं- एतत्सर्वं पत्न्या परिशोधं कर्तव्यम्। इतः भिन्नं किमपि ऋणं परिशोधनार्थं पत्नी दायबद्धा न भवति।

**অসমীয়া অনুবাদ –**

কোনবোৰ পৰিস্থিতিত স্ত্রীয়ে ঋণ পৰিশোধ কৰিব লাগে সেই সন্দর্ভত প্রস্তুত শ্লোকফাকিত আলোচনা কৰা হৈছে। স্বামীৰ মৰণাপন্ন অৱস্থাত অথবা প্রবাসযাত্রাকালত স্বামী-স্ত্রীয়ে একেলগে লোৱা ঋণ অথবা পত্নীয়ে নিজৰ বাবে লোৱা ঋণ - এই সকলোবোৰ পত্নীয়ে পৰিশোধ কৰিব লাগিব। ইয়াৰ বাহিৰে আন কোনো ঋণ পৰিশোধৰ বাবে পত্নীগৰাকী দায়বদ্ধ নহয়।

**पितरि प्रोषिते प्रेते व्यसनाभिप्लुतेऽपि वा।**
**पुत्रपौत्रैर्ऋणं देयं निह्नवे साक्षिभावितम्।।१४।।**

**भावार्थः –**

पिता यदि ऋणग्रहणं कृत्वा परिशोधात् पूर्वमेव विदेशगमनं करोति, कस्यापि दूरारोग्यरोगे आक्रान्तो भवति, मृत्युवरणं वा करोति तर्हि पुत्र- पौत्रादिनाम् एतद्
दायित्वं भवति यत् तैः ऋणपरिशोधं कुर्यात् । यदि अधमर्णः ऋणपरिशोधनार्थम् नेच्छति तर्हि उत्तमर्णः साक्षीत्यादेः साहाय्यं लब्धुं शक्नोति।

**অসমীয়া অনুবাদ –**

পিতৃয়ে ঋণ গ্ৰহণ কৰি পৰিশোধ কৰাৰ পূৰ্ৱেই যদি বিদেশলৈ গমন কৰে, কোনো দু�ৰাৰোগ্য ৰোগত আক্ৰান্ত হয় নতুবা মৃত্যুবৰণ কৰে; তেনেস্থলত পুত্ৰ তথা পৌত্ৰই সেই ঋণ পৰিশোধ কৰিব। ঋণ পৰিশোধৰ সময়ত অধমর্ণই পৰিশোধৰ বাবে অনিচ্ছা প্ৰকাশ কৰিলে উত্তমর্ণই সাক্ষী আদিৰ সহায় ল'ব পাৰে।

**रिक्थग्राह ऋणं दाप्यो योषिद्ग्राहस्तथैव च।**
**पुत्रोऽनन्याश्रितद्रव्यः पुत्रहीनस्य रिक्थिनः।।१५।।**

**भावार्थः –**

उल्लिखितश्लोके ऋणग्राहकस्य, तस्य पुत्रस्य पौत्रस्य च विषये वर्णनं प्राप्यते। एतदतिरिक्तम् ऋणपरिशोधस्य अन्य अधिकारिणां क्रमविषयेऽपि अत्र चर्चा कृता अस्ति । रिक्थग्राहीव्यक्ति अधमर्णस्य ऋणं परिशोधयेत्। अत्र रिक्थग्राही इत्यनेन पदेन ऋणग्राहकस्य सम्पत्तेः उत्तराधिकारीं निर्दिशति । पुनः योषीद्ग्राही अर्थात् यः परस्य भार्यां स्वस्य रूपेण ग्रहणं करोति ,तेन स्वपत्न्याः पूर्वपतिना कृतम् ऋणं परिशोधितव्यम्। अनन्याश्रितद्रव्यपुत्रः पितुः ऋणं दापयेत्। ज्ञातव्यं यत् बहुपुत्रेषु यः पुत्रः मातृ-पितृभ्यः सम्पत्तिं प्राप्नोति सः 'अनन्याश्रितद्रव्यपुत्र' इति विवक्षितः । एतदतिरिक्तं यस्य पुत्रः नास्ति तस्य धनस्य उत्तराधिकारी एव ऋणपरिशोधनार्थं प्रतिबद्धो भवति ।

**অসমীয়া অনুবাদ –**

প্ৰস্তুত শ্লোকফাকিত স্বয়ং ঋণ গ্ৰহণ কৰোতা, তেওঁৰ পুত্ৰ আৰু তেওঁৰ পৌত্ৰৰ উপৰিও ঋণ পৰিশোধৰ আন অধিকাৰীসমূহৰ ক্ৰমসম্বন্ধে আলোচনা কৰা হৈছে। ৰিন্থগ্ৰাহী ব্যক্তিয়ে অধমর্ণজনৰ ঋণ পৰিশোধ কৰিব লাগে। ইয়াত ৰিক্থগ্ৰাহী বুলি ঋণ গ্ৰহণকাৰী জনৰ সম্পত্তিৰ উত্তৰাধিকাৰীক বুজোৱা হৈছে। আকৌ, য়োষিদগ্ৰাহী অর্থাৎ যিয়ে আনৰ স্ত্ৰীক নিজৰ বুলি গ্ৰহণ কৰিছে, তেওঁ নিজ পত্নীৰ পূৰ্ৱৰ স্বামীকৃত ঋণ পৰিশোধ কৰিব লাগে। অনন্যাশ্ৰিত দ্ৰব্য পুত্ৰই পিতৃৰ ঋণ পৰিশোধ কৰিব লাগে। উল্লেখনীয় যে, বহুত পুত্ৰৰ মাজত যি পুত্ৰই নিজ পিতৃ-মাতৃৰ পৰা সম্পত্তি লাভ কৰে সেই পুত্ৰকে ইয়াত 'অনন্যাশ্ৰিত দ্ৰব্যপুত্ৰ'ৰ সংজ্ঞা দিয়া হৈছে। এইবোৰৰ ওপৰিও যিগৰাকী পুত্ৰৰহিত ব্যক্তি, তেওঁৰ ঋণ পৰিশোধৰ বাবে তেওঁৰ সম্পত্তিৰ ভোগ কৰা সকল দায়বদ্ধ।

**भ्रातृणामथ दंपत्योः पितुः पुत्रस्य चैव हि।**
**प्रातिभाव्यमृणं साक्ष्यमविभक्ते न तु स्मृतम्।।१६।।**

**भावार्थः –**

भ्रातृणां पति-पत्न्योः पितृ-पुत्रयोः च मध्ये यदि सम्पत्तेः विभागं न भवति तर्हि तेषु कश्चनोऽपि प्रतिभू भवितुं, ऋणग्रहणं, साक्ष्यदानं वा कार्यं कर्त्तुं न शक्नोति।

**অসমীয়া অনুবাদ –**

ভাতৃসকলৰ মাজত, পতি-পত্নীৰ মাজত তথা পিতা-পুত্ৰৰ মাজত সম্পত্তিৰ বিভাজন নহ'লে তেওঁলোকৰ মাজৰ কোনো এজন ব্যক্তিয়েই প্ৰতিভু, ঋণগ্ৰহণ নতুবা সাক্ষদান আদি কামসমূহ কৰিব নোৱাৰে।

**दर्शने प्रत्यये दाने प्रातिभाव्यं विधीयते।**
**आद्यौ तु वितथे दाप्यावितरस्य सुता अपि।।१७।।**

**भावार्थः –**

प्रतिभूः वा प्रातिभाव्यम् इति विश्वासं जनयितुं केनचित् सह कृतः सन्धिः। अस्य प्रतिभुवः त्रिप्रकाराः भवन्ति - दर्शनं, प्रत्ययः, दानं च। दर्शनं प्रतिभूः सः भवति, यः कश्चन व्यक्तिः अभियुक्तं द्रष्टुम् इच्छति, तदा दर्शयामि इति आश्वासनं ददाति। अन्यस्मिन् पक्षे, प्रत्ययः प्रतिभूः सः भवति यः अन्येषां मनसि विश्वासं जनयितुं यत्नं करोति। पुनः, दानस्य प्रसङ्गे, यदा अधमर्णः धनं प्रत्यर्पयितुं विफलः भवति, तदा एषः प्रतिभुः तद्धनं परिपूरयितुं वचनं ददाति। एषु त्रि प्रकारेषु प्रथमद्वयं, अर्थात् दर्शनं प्रत्ययश्च, यदि प्रतिभुवः वचनं मिथ्या भवति, तर्हि अनेन प्रतिभुवा उत्तमर्णं ऋणदायकाय धनं दातव्यम्। तृतीयस्य, अर्थात् दानस्य प्रसङ्गे यदि तत्स्थितिः भवति, तर्हि प्रतिभुवः पुत्रः अपि यथावश्यकं धनं प्रत्यर्पयितुं दायित्वं वहति ।

**অসমীয়া অনুবাদ –**

প্ৰতিভূ অথবা প্ৰাতিভাব্য হৈছে বিশ্বাস জন্মোৱাৰ অৰ্থে অন্য ব্যক্তিৰ লগত কৰা চুক্তি। এই প্ৰতিভূৰ ৩ টা প্ৰকাৰ হৈছে - দৰ্শন, প্ৰত্যয় আৰু দান। দৰ্শন প্ৰতিভূ হৈছে সেইজন, যিজনে কোনো ব্যক্তিয়ে অভিযুক্তক দৰ্শনৰ ইচ্ছা কৰিলে নিজে দৰ্শন কৰাম বুলি আশ্বাস দিয়ে। আনহাতে প্ৰত্যয় প্ৰতিভূৱে নিজৰ জৰিয়তে আনৰ মনত বিশ্বাস জন্মাবৰ বাবে চেষ্টা কৰে। আকৌ, দানৰ ক্ষেত্ৰত ধন লোৱা ব্যক্তিজনে ধন ঘূৰাই নিদিলে এই শ্ৰেণীৰ প্ৰতিভূৱে সেই ধন পৰিশোধৰ প্ৰতিশ্ৰুতি দিয়ে। ইয়াৰ ভিতৰত প্ৰথম দুটা অৰ্থাৎ দৰ্শন আৰু প্ৰত্যয়ৰ ক্ষেত্ৰত প্ৰতিভূৰ কথা মিছা হ'লে প্ৰতিভূৱে

ঋণপ্রদাতাজনক ধন দিব লাগে আৰু একে পৰিস্থিতি তৃতীয়টো অর্থাৎ দানৰ ক্ষেত্রত হ'লে প্রতিভূৰ পুত্রও প্রয়োজনানুসৰি ধন ঘূৰাই দিয়াৰ বাবে দায়বদ্ধ হ'ব।

**दर्शनप्रतिभूर्यत्र मृत: प्रात्ययिकोऽपि वा।**
**न तत्पुत्रा ऋणं दद्युर्दद्युर्दानाय ये स्थिता:।।१८।।**

**भावार्थ: –**

त्रिषु प्रकारकेषु प्रतिभूषु दर्शन-प्रत्ययरूपीणोः मृत्योर्भवति तर्हि तयो: पुत्राभ्याम् ऋणपरिशोधनं नावश्यकम् । परन्तु दानप्रतिभोः क्षेत्रे तस्य पुत्रैः एव ऋणं परिशोधं कर्त्तव्यम्।

**অসমীয়া অনুবাদ –**

তিনিপ্রকাৰৰ প্রতিভূৰ ভিতৰত প্রথম দুই প্রকাৰৰ প্রতিভূ যেনে দর্শন প্রতিভূ আৰু প্রত্যয় প্রতিভূৰ ক্ষেত্রত যদি কোনো কাৰণবশত তেওঁৰ মৃত্যু হয় তেনে পৰিস্থিতিত তেওঁলোকৰ পুত্রসকলে সেই ঋণ পৰিশোধ কৰিব নালাগে। আনহাতে দান প্রতিভূৰ ক্ষেত্রত তেওঁৰ পুত্রসকলেই সেই ঋণ পৰিশোধ কৰাটো অনিবার্য।

**आधि: प्रणश्येद् द्विगुणे धने यदि न मोक्ष्यते।**
**काले कालकृतो नश्येत्फलभोग्यो न नश्यति।।१९।।**

**भावार्थ: –**

ऋणस्य विषये बन्धकस्वरूपेण स्थापितं द्रव्यमेव" आधिः" इति कथ्यते। कृतकालं च अकृतकालं च इति आधेः प्रकारद्वयम् । यस्य आधेः कालावधिः निर्दिष्टः अस्ति, सः कृतकालः आधिः। यस्य निश्चितः कालः निर्दिष्टः नास्ति, सः अकृतकालः आधिः। उत्तमर्ण अधमर्णं प्रदत्तस्य ऋणस्य सवृद्धिकं धनपरिमाणं यावत् पर्यन्तं द्विगुणं भवति तावत् पर्यन्तम्, अधमर्णेन ऋणपरिशोधं कर्तव्यम् अन्यथा आधिः नष्टो भवति (प्रत्यर्पणीयं न भवति) । परन्तु तत्र आधिः यदि उद्यानं भूमि: वा स्यात् यच्च फलभोग्यम तादृशो आधिः न विनश्यते । कृतकाल-आधिः अकृतकाल-आधिश्च गोप्यः भोग्यः इति भेदेन द्विधा । अनयो: गोप्य आधिः उत्तमर्णेन रक्षनीयः न च भोग्यः । भोग्य धाधि: उत्तमर्णेन न भोग्यो भवति ।

**অসমীয়া অনুবাদ –**

ঋণৰ ক্ষেত্রত বন্ধক হিচাপে ৰখা সামগ্রীক আধি বুলি কোৱা হয়। কৃতকাল আৰু অকৃতকাল হিচাপে আধি ২ প্রকাৰৰ। যিসমূহ আধিৰ বাবে এটা নির্দিষ্ট সময়সীমা নির্ধাৰণ কৰা হয় সি কৃতকাল আধি আৰু য'ত কোনো নির্দিষ্ট সময়ৰ কথা

নাথাকে সেয়াই অকৃতকাল আধি। ঋণদাতাগৰাকীয়ে অধমর্ণক প্রদান কৰা ঋণৰ ধন যদি সুদসহ দ্বিগুণ হোৱা পর্যন্ত অধমর্ণই টকা ঘূৰাই দি স্বকৃত আধি মুক্ত কৰি নিয়াত অসমর্থ হয়, তেন্তে সেই আধিত অধমর্ণৰ অধিকাৰ নাশ হৈ সেই আধি সম্পূর্ণৰূপে উত্তমর্ণগৰাকীৰ হ'ব। অৰশ্যে উদ্যান, ভূমি আদি যাৰ ফল ভোগ কৰা যায়, এইবোৰ ক্ষেত্রত আধি নষ্ট হৈ নাযায়। কৃতকাল আৰু অকৃতকাল আধি গোপ্য আৰু ভোগ্য ভেদে পুনৰ ২ ভাগত বিভক্ত। ইয়াৰে প্রথমবিধ অর্থাৎ গোপ্য আধি উত্তমর্ণই ভোগ কৰিব নোৱাৰে কেৱল ৰক্ষণাবেক্ষণহে দিব পাৰে। আনহাতে ভোগ্য শীর্ষক দ্বিতীয়বিধ আধি আকৌ উত্তমর্ণৰ দ্বাৰা ভোগ কৰাৰ যোগ্য।

**गोप्याधिभोगे नो वृद्धि: सोपकारेऽथ हापिते।**
**नष्टो देयो विनष्टश्च दैवराजकृतादृते।।२०।।**

**भावार्थ**: –

पूर्वमेवोल्लिखितं यत् गोप्य आधि रक्षणीय इति कारणात् उत्तमर्णेन भोगस्य अयोग्यः। एवं सति उत्तमर्ण: यदि गुप्ताधिं भुङ्क्ते तर्हि अधमर्णात् देयऋणस्य
वृद्धिं ग्रहीतुं न शक्नोति। परन्तु यदि आधि केनचित् कारणेन अनुपयोगी भवति तर्हि वृद्धिः न दातव्या। उल्लेखनीयं यत् आधि आंशिकविकृतं क्षतिग्रस्तं वा भवति चेत् पूर्वं यथासीत्तथा प्रदातव्यः। द्रष्टव्यं यत् दैववशात् राज्ञः कोपात् वा यः आधिः नष्टो भवति तत् उत्तमर्णेन न प्रदातव्यः । परन्तु अधमर्णाय सवृद्धिकमूल्यं निश्चयेन दातव्यं भवति।

**অসমীয়া অনুবাদ –**

পূর্ৱতে উল্লেখ কৰি অহা হৈছে যে, গোপ্য আধি ৰক্ষণীয়, সেয়েহে ই উত্তমর্ণৰ দ্বাৰা ভোগৰ অযোগ্য । তেনেস্থলত, উত্তমর্ণই গোপ্য আধি ভোগ কৰিলে অধমর্ণৰ পৰা পাব লগা ঋণৰ সুদ ল'ব নোৱাৰিব । অৰশ্যে সবৃদ্ধিক আধি কিবা কাৰণত ব্যৱহাৰৰ অযোগ্য হ'লে সুদ দিব নালাগে । কিন্তু আধি বিকৃত অথবা নষ্ট হ'লে তাক পূর্ৱৰৎ পুনৰ তৈয়াৰ কৰি দিব লাগিব । আকৌ, এই আধি মূলৰ পৰাই বিনষ্ট হোৱাৰ পৰিপ্রক্ষিতত উত্তমর্ণই তাৰ মূল্য দিব লাগিব । এইখিনিতে মন কৰিবলগীয়া যে, দৈৱবশত নতুবা ৰাজৰোষত পৰি নষ্ট হোৱা আধিৰ বাবে উত্তমর্ণই মূল্য দিব নালাগে । অন্যথা অধমর্ণক সবৃদ্ধিক মূল্য দিব লাগিব নতুবা অন্য আধি স্থাপন কৰিব লাগিব ।

**अग्रगते: निरीक्षणम्**

**प्रश्नः** ६. गोपालानां पत्न्याः ऋणं कः प्रत्यावर्तणं करोति?

**प्रश्नः** ७. पितुः मृत्योरनन्तरं कः ऋणं परिशोधयति?

**प्रश्नः** ८. प्रतिभूः किम्?

**प्रश्नः** ९. साक्ष्यदानं कर्तुं कः असमर्थः?

**प्रश्नः** १०. आधिः किम् ?

## १४.४ ऋणादानप्रकरणम् - संक्षिप्तालोचनम्

पूर्वमेवोल्लिखितं यत् याज्ञवल्क्यस्मृतेः 'व्यवहाराध्यायः' इति 'शीर्षकस्य द्वितीयोऽध्यायः पञ्चविंशतिप्रकरणैः युक्तोऽस्ति। अध्यायस्यास्य तृतीयप्रकरणे अर्थात् ऋणादानप्रकरणे ऋणादान-ऋणादानस्योपायाः, यथासमयेन ऋणपरिशोधे न कृते अकरणात् अधमर्णस्य दण्डविषये तथा च ऋणविषयकानि अन्यानि बहूनि तथ्यानि आलोचितानि।

प्रकरणस्य प्रारम्भे एव आचार्ययाज्ञवल्क्येन ऋणस्य वृद्धिं प्रसङ्गे आलोचनं कृतम्। सबन्धकऋणप्रसङ्गे उत्तमर्णः ऋणस्य अशीतिभागानाम् एकभागः वृद्धिरूपेण गृह्णीयात् अपि च अबन्धकऋणसन्दर्भे ब्राह्मण- क्षत्रिय- वैश्य- शूद्र इति वर्णानुसारं क्रमशः २/३/४/५ प्रतिशतं व्याजं गृह्णाणीयादिति ।

अधमर्णेन यत् धनम् उत्तमर्णं प्रति वृद्धिरूपेण दातव्यमस्ति तत् यदि यथासमये दातुं न शक्नोति तर्हि ऋणपरिशोधसमये राज्ञा अधमर्णात् देयधनस्य १० प्रतिशतं पुनश्च उत्तमर्णादपिन्याय विचारस्य व्ययरूपेण ५ प्रतिशतं दण्डरूपेण स्वीकुर्यात्। पुनः अधमर्ण: यदि निम्नजातेः निर्धनः भवति तर्हि उच्चजातेः ऋणदाता अर्थात् उत्तमर्णः तेन निर्धनेन अधमर्णेन स्वकार्यं कारयति। परन्तु अधमर्णः धनहीनः सन्नापि ब्राह्मणोः भवति चेत् तेन उत्तमर्णस्य गृहे क्षमकरणस्य कापि आवश्यकता नास्ति। तदा तस्य अधमर्णस्य एकमेव दायित्वं भवति यत् तेनः केवलं उत्तमर्णं शनैः शनैः स्वसामर्थ्यानुसारं धनप्रदानं कुर्यात्।

जानन्त्येव सर्वे जना: यत् पितुरभावे पितृऋणं सर्वदा पुत्रेण एव दातव्यं भवति। परन्तु कतिपयेषु विशेषपरिस्थितिषु अस्य व्यतिक्रमः परिलक्ष्यते।

उदाहरणरूपेण – मद्यपान - कामसम्भोग - राजदण्ड - द्यूतक्रीडावशात् पित्रा गृहीतधनं पुत्रेण परिशोधं न कर्तव्यम्।

उल्लेखनीयं यत् पूर्ववदेव कतिपयेषु परिस्थितिषु पत्नीकृतऋणं पतिना परिशोधितव्यम्। उदाहरणरूपेण वक्तुं शक्यते मद्यव्यापारिणां, गोपालानां, नाट्यकलाकारानां, रजकानाम् अपि च व्याधादीनां पत्नीकृतऋणं ताषां स्वामिभिः अवश्यमेव दातव्यम्। यतोहि तेषां भार्या अपि स्वपतीन् जीवनयापनार्थं साहाय्यं कुर्वन्ति। एतदतिरिक्तं

केषुचित् परिस्थितौ स्वव्यतिरिक्तेभ्य अन्येभ्य: ऋणं दातुम् अपि स्त्रिय: दायबद्धं भवति। यथा - स्वस्य कृते कृतं ऋणं स्त्रीभि: स्वयमेव दातव्यम्। इतोपि पतिपत्न्यो: संयुक्तरूपेण गृहीतं ऋणमपि भर्तु: मृत्योरनन्तरं पत्न्या एव परिशोधितव्यम्।

प्रकरणेऽस्मिन् दर्शन-प्रत्यय-दानरूपिणः प्रतिभूत्रयस्य, आधे: प्रसङ्गस्यापि च वर्णनं प्राप्यते। आधिरूपेण गृहीतं धनं यदि वृद्धया सह द्विगुणं भवति तर्हि उत्तमर्ण: तस्य आधे: पूर्णस्वामित्वं लब्धुं शक्नोति। तस्मिन् आधौ अधमर्णस्य कोऽपि स्वामीत्वं न भविष्यति। परन्तु उल्लेखनीयं यत् सर्वविधेषु आधिषु एष: नियम: न प्रवर्तते। उदाहरणरूपेण वक्तुं शक्यते यत् फलयुक्तभूमि-उद्यानादे: प्रसङ्गे निर्दिष्टसमयस्य पश्चादपि आधे: उपरि अधमर्णस्यैव स्वत्तं भवति। अत्र अधमर्णस्य आधे: हानिर्न भवति। पुन: गोप्यभोग्यादय: नानाविधाधे :भेदानां विषये चर्चा कृतास्ति। अत्र उक्तमस्ति - गोप्य आधि: उत्तमर्णस्य भोगस्य कृते अयोग्य:। एतेषां कृते भोग्य आधिरेव भोगोपयोगी। गोप्य आधि: यदि उत्तमर्णेन भोज्यते तर्हि अधमर्णेन वृद्धिः न दातव्या इतोपि भोग्य आधे: भोक्तृकाले आधि नष्टा चेत् उत्तमर्णेन तस्य उचितमूल्यं दातव्यं भवति। यदि आधिविकृति: दैववशात् राष्ट्रविप्लववशात् वा भवति तर्हि उत्तमर्णेन तस्य किमपि मूल्यं न दातव्यम्।

## १४.५ अध्यायस्य असमीयासारांशः

যাজ্ঞবল্ক্যস্মৃতিৰ "ব্যৱহাৰ অধ্যায়" শীৰ্ষক দ্বিতীয়টো অধ্যায় ২৫ টা প্ৰকৰণৰ সমষ্টি । ইয়াৰে তৃতীয়টো প্ৰকৰণ ' ঋণাদান প্ৰকৰণত ঋণদান, ঋণৰ আদানৰ উপায়, যথাসময়ত ঋণ পৰিশোধ নকৰিলে অধমৰ্ণৰ প্ৰাপ্য দণ্ড আদি বিষয়ৰ লগতে ঋণৰ লগত জড়িত আন বহুতো তথ্য বিশদভাৱে আলোচিত হৈছে।

প্ৰকৰণটিৰ আৰম্ভণিতে আচাৰ্য্য যাজ্ঞবল্ক্যই ঋণৰ বৃদ্ধি তথা সুদৰ হাৰৰ প্ৰসংগত আলোচনা দাঙি ধৰিছে। সবন্ধক ঋণৰ ক্ষেত্ৰত ঋণদাতাই প্ৰদান কৰা ঋণৰ আশীভাগৰ এভাগ সুদ হিচাপে গ্ৰহণ কৰিব আৰু অবন্ধক ঋণৰ ক্ষেত্ৰত বৰ্ণানুসৰি ব্ৰাহ্মণ, ক্ষত্ৰিয়, বৈশ্য আৰু শূদ্ৰই যথাক্ৰমে শতকৰা ২,৩,৪ আৰু ৫ ভাগ সুদ গ্ৰহণ কৰিব।

অধমৰ্ণৰ দ্বাৰা উত্তমৰ্ণৰ ঋণ পৰিশোধৰ সময়ত দিবলগা টকাৰ শতকৰা দহভাগ ৰজাই দণ্ডৰূপে গ্ৰহণ কৰাৰ লগতে উত্তমৰ্ণৰ পৰাও বিচাৰৰ খৰচ হিচাপে শতকৰা ৫ ভাগ গ্ৰহণ কৰিব। আকৌ, ঋণ গ্ৰহণকৰোতা অৰ্থাৎ অধমৰ্ণজন হীনজাতিৰ নিৰ্ধন হ'লে উচ্চবৰ্ণৰ ঋণদাতা অৰ্থাৎ উত্তমৰ্ণই তেওঁৰ দ্বাৰা নিজৰ কৰ্ম কৰাব । কিন্তু অধমৰ্ণজন ধনহীন ব্ৰাহ্মণ হ'লে তেওঁ উত্তমৰ্ণৰ ঘৰত কৰ্ম কৰাৰ কোনো প্ৰয়োজন নাই। তেওঁ কেৱল লাহে লাহে উত্তমৰ্ণক ঋণ কৰিলেই হ'ল ।

আমি সকলো এই বিষয়ে অৱগত যে, পিতাৰ অবিহনে পিতৃঋণ সদায় পুত্ৰই পৰিশোধ কৰে। কিন্তু বিশেষ কিছু পৰিস্থিতিত ইয়াৰ ব্যতিক্ৰম পৰিলক্ষিত হয় । এনে কিছুমান পৰিস্থিতি হৈছে - সুৰাপান, কামসম্ভোগ, পাশাখেল আদিৰ বাবে পিতৃয়ে লোৱা ধন, ৰাজদণ্ড, পত্নীকৃত অথবা ধূর্ত্তক দিবলগীয়া ধন পুত্ৰই পৰিশোধ কৰিব নালাগে । উল্লেখযোগ্য যে কিছুমান বিশেষ পৰিস্থিতিত পত্নীকৃত ঋণ স্বামীয়ে পৰিশোধ কৰাটো বাঞ্ছনীয়। উদাহৰণস্বৰূপে সুৰাবিক্ৰেতা,

গোপালক, নাট্যজীৱি আৰু ব্যাধ প্ৰভৃতি ব্যক্তিসকলৰ পত্নীকৃত ঋণ তেওঁলোকৰ স্বামীয়ে পৰিশোধ কৰিব লাগিব । কিয়নো এওঁলোকৰ পত্নীসকলে স্বামীৰ জীৱিকাত সহায়ৰ হাত আগবঢ়ায় । ইয়াৰোপৰি স্ত্ৰী কিছুমান পৰিস্থিতিত নিজৰ বাহিৰেও আনৰ ঋণ পৰিশোধ কৰাৰ বাবে দায়বদ্ধ । উদাহৰণস্বৰূপে স্ত্ৰীয়ে নিজৰ বাবে লোৱা ঋণ নিজে শোধ কৰাৰ লগতে স্বামী স্ত্ৰীয়ে যুটীয়াভাৱে গ্ৰহণ কৰা ঋণো স্বামীৰ মৃত্যু হ'লে পত্নীয়ে পৰিশোধ কৰিব লাগিব ।

দৰ্শন প্ৰত্যয় আৰু দান হিচাপে ৩ প্ৰকাৰৰ প্ৰতিভূৰ লগতে আধিৰ প্ৰসংগও উক্ত ঋণাদান প্ৰকৰণত উপস্থাপন কৰা হৈছে । আধিৰূপে ৰাখি ঋণ দিয়া ধন যদি সুদসহ দ্বিগুণ হয়, তেন্তে সেই আধিত সম্পূৰ্ণৰূপে উত্তমৰ্ণই নিজৰ অধিকাৰ সাব্যস্ত কৰিব পাৰিব । সেই আধিত অধমৰ্ণৰ কোনো ধৰণৰ মালিকীস্বত্ব নাথাকিব । অৱশ্যে সকলো ধৰণৰ আধিৰ ক্ষেত্ৰত এই নিয়ম প্ৰযোজ্য নহয় । উদাহৰণস্বৰূপে উল্লেখ কৰিব পাৰি ফলযুক্ত ভূমি, উদ্যান আদিৰ ক্ষেত্ৰত সময় উকলি গ'লেও সেই আধিৰ ওপৰত অধমৰ্ণৰ মালিকীসত্বৰ কোনো ধৰণৰ ব্যাঘাত নজন্মে। আকৌ, গোপ্য ভোগ্য প্ৰভৃতি আধিৰ ভেদসমূহৰ বিষয়ে আলোচনা কৰি কোৱা হৈছে যে - গোপ্য আধি উত্তমৰ্ণৰ ভোগৰ বাবে অযোগ্য । ভোগ্য আধিহে এওঁলোকে ভোগ কৰিব পাৰে। এনেস্থলত, গোপ্য আধি উত্তমৰ্ণই ভোগ কৰিলে অধমৰ্ণই কোনো ধৰণৰ সুদ দিব নালাগে কিন্তু ভোগ্য আধিৰ ক্ষেত্ৰত ভোগ কৰাৰ কালছোৱাত যদি আধি নষ্ট হয় তেন্তে উত্তমৰ্ণই তাৰ উচিত মূল্য প্ৰদান কৰাটো বাঞ্ছনীয় । অৱশ্যে আধিৰ এই বিকৃতৰূপ যদি দৈৱবশত অথবা ৰাষ্ট্ৰবিপ্লৱবশত হয়, তেন্তে উত্তমৰ্ণই তাৰ বাবে কোনো ধৰণৰ মূল্য দিব নালাগে ।

## ৭ ১৪.৬ महत्त्वपूर्णश्लोकानां व्याख्या

**१. अशीतिभागो वृद्धिः स्यान्मासि मासि सबन्धके।**
**वर्णक्रमाच्छतं द्वित्रिचतुष्पञ्चकमन्यथा।।१।।**

श्लोकोऽयं याज्ञवल्क्यस्मृतेः व्यवहाराध्याये ऋणादानप्रकरणे समुपलभ्यते।सबन्धक-अबन्धकऋणसन्दर्भे वृद्धिः (व्याजः इति भाषायाम्) श्लोकेऽस्मिन् आलोचिता वर्तते। इदानीं सबन्धक-अबन्धकऋणं किमिति जिज्ञासाजाते सतित्वात् वक्तुं शक्यते यत् यस्य ऋणस्य ग्रहणसमये अधमर्णः विश्वासार्थं स्वस्य कापि सम्पद् बन्धकरूपेण उत्तमर्णस्य पार्श्वे स्थापयति सः सबन्धकः पुनः बन्धकरहितः यः ऋणं वर्तते सः तु अबन्धकेति उच्यते। ज्ञातव्यं यत् सबन्धकऋणप्रसङ्गे अधमर्णः उत्तमर्णस्य पार्श्वे बन्धकरूपेण यः द्रव्यः स्थापयति, प्रतिमासं तस्य स्थापितद्रव्यस्य मूल्यस्य अशीतिभागानाम् एकभागः वृद्धिरूपेण दातव्यम्। पुनः अबन्धकऋणसन्दर्भे भिन्नानां वर्णानां कृते भिन्नवृद्धिः परिलक्ष्यते। उदाहरणरूपेण अबन्धकऋणप्रसङ्गे ब्राह्मणेनः द्विप्रतिशतं, क्षत्रियेण त्रिप्रतिशतं, वैश्येन चतुःप्रतिशतं शूद्रेण च पन्चप्रतिशतं धनं वृद्धिरूपेण दातव्यमासीत।

२. **दर्शने प्रत्यये दाने प्रातिभाव्यं विधीयते।**
**आद्यौ तु वितथे दाप्यावितरस्य सुता अपि ।।१७।।**

श्लोकोऽयं याज्ञवल्क्यस्मृते: व्यवहाराध्याये ऋणादानप्रकरणे समुपलभ्यते।

परिवारे ज्येष्ठजनस्य अनुपस्थितौ ऋणपरिशोधस्योपाया: अत्र वर्णितास्सन्ति। लघु-लघुपरिवाराणामपेक्षया संयुक्तपरिवारेषु जनानां संख्या अधिका: परिदृश्यन्ते। अत: परिवारस्य पालनार्थं पोषणार्थं वा एका सबलार्थिकावस्था नितरामापद्यते। साधारणतया परिवारस्य जना: मिलितरूपेण ऋणग्रहणं कुर्वन्ति। यद्यपि तस्य ऋणस्य परिशोधं तु परिवारस्य मूलजनेन एव कर्त्तव्यम्। यदि स: व्यक्ति: कदाचित् विदेशभ्रमणार्थं गच्छति अथवा तस्य मृत्युर्भवति तर्हि परिवारस्य ये जना: ऋणस्य भोगं कुर्वन्ति तै: एव ऋणं परिशोधितव्यम्।

३. **आधि: प्रणश्येद् द्विगुणे धने यदि न मोक्ष्यते।**
**काले कालकृतो नश्येत्फलभोग्यो न नश्यति।।१९।।**

श्लोकोऽयं याज्ञवल्क्यस्मृते: व्यवहाराध्याये ऋणादानप्रकरणे समुपलभ्यते।

श्लोकेऽस्मिन् बन्धककृतद्रव्येषु कस्य स्वत्तं भविष्यतीति विषये वर्णनमुपलभ्यते। पूर्वमेवोल्लिखितं यत् "आधिर्नाम गृहीतस्य द्रव्यस्य उपरि विश्वासार्थम् अधमर्णेनोऽधिक्रियते" इति । अर्थात् अधमर्णेन ऋणग्रहणसमये उत्तमर्णस्य विश्वासार्थं या सम्पद् उत्तमर्णस्य स्थाप्यते सा एव बन्धकरूपेण ज्ञायते। उल्लेखनीयं यत् नानाकारणवशात् अधमर्ण: उत्तमर्णात् ऋणग्रहणं करोति। परन्तु यथासमयेन गृहीतस्य ऋणस्य अपरिशोधने वृद्धि दातव्या भवति। एवं प्रतिदिनं वृद्धेः वृद्धिर्भवति। यदि उत्तमर्णेन अधमर्णाय प्रदत्तों ऋणं वृद्धया सह द्विविगुणं भवति, तथा च ऋणपरिशोधस्य निर्दिष्टकालोऽपि व्यतीते सति आधिः नश्यति अर्थात द्रव्यदानेन न मोक्ष्यते । उल्लेखनीयं यत् उद्यान-भूमीत्यादय: येभ्य: द्रव्येभ्य: फलभोग: भवति तादृशी आधिः नष्टा न भवति ।

## ✓ १४.७ अग्रगत्या: निरूपणम् -

**प्रश्न: १। उत्तरम्** - प्रतिमासं सबन्धकऋणस्य अशीतिभागानामेकभाग: वृद्धिः भवति।

**प्रश्न: २। उत्तरम्** - ऋणदाता एव उत्तमर्ण अस्ति ।

**प्रश्न: ३। उत्तरम्** - यः ऋणं गृह्णाति स एव अधमर्णः ।

**प्रश्न: ४। उत्तरम् -** यः व्यवसायार्थं वनं गच्छति सः दशप्रतिशतं ऋणं दास्यति ।

**प्रश्न: ५। उत्तरम्** - यः उत्तराधिकारीरूपेण प्राप्तं धनं भुङ्क्ते सः रिक्थिन् इति उच्यते ।

**प्रश्न: ६। उत्तरम्** - गोपालानां पत्न्याः ऋणं तेषां पतयः दास्यन्ति ।

**प्रश्न: ७। उत्तरम्** - पित मृत्योरनन्तरं तेषां पुत्राः पौत्राः वा ऋणं परिशोधयन्ति ।

**प्रश्न: ८। उत्तरम्** - यः पुरुषः न्यायालये एतद् विश्वासं ददाति यत् वादी न्यायालयस्य अन्यथाचरणं नकरिष्यति इति सः एव प्रतिभू ।

**प्रश्न: ९। उत्तरम्** - प्रतिभू साक्ष्यदानं कर्तुमअसमर्थो भवति ।

**प्रश्नः १०। उत्तरम्** - बन्धकरूपेण स्थापितः सम्पत्ति एव आधिः।

## ⑦ १४.८ अभ्यासप्रश्नाः

• वस्तुनिष्ठप्रश्नाः

प्रश्नः १. अबन्धकऋणे ब्राह्मणस्य कियति वृद्धि भवति ?

प्रश्नः २. कारितावृद्धि का ?

प्रश्नः ३. यः व्यवसायार्थं समुद्रं गच्छति सः कियत्ि वृद्धिं दास्यति ?

प्रश्नः ४. मृत्योरनन्तरं कः ऋणं परिशोधयति कुटुम्बिनाम्।

प्रश्नः ५. दर्शनप्रतिभूः किम् करोति ?

• लघुप्रश्नाः

प्रश्नः ६.उत्तमर्णः अधमर्णश्च कः ? संक्षेपण लिखतु।

प्रश्नः ७. वृद्धेःकति प्रकाराः सन्ति ? काः च ताः ?

प्रश्नः ८. कानि ऋणानि पुत्रेण न परिशोधितव्यानि ?

• दीर्घप्रश्नाः

प्रश्नः ९. ऋणादानस्य विषयसारं संक्षेपेण आलोच्यताम्।

प्रश्नः १०. कानि ऋणानि पत्न्या न परिशोधितव्यानि आलोच्यताम्।

*****